Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

# पञ्चाचार्यपञ्चसूत्राणि

(कारिका-वृत्ति-तात्पर्यसहितानि)

शैवभारती शोधप्रतिष्ठानम् जङ्गमवाडीमठः, वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शोधग्रन्थमाला-१०८

# पञ्चाचार्यपञ्चसूत्राणि

## ( कारिका-वृत्ति-तात्पर्यसहितानि )

*कारिकाकृत:*
विद्यावाचस्पतय:
श्रीमत्काशीविश्वाराध्यज्ञानसिंहासनाधीश्वरा:
**श्रीजगद्गुरवश्चन्द्रशेखरशिवाचार्यभगवत्पादाः**

❁

*वृत्ति-तात्पर्यकार:*
**प्रो० कमलेशझाविद्यावाचस्पतिः**
विभागाध्यक्ष:-धर्मागमविभाग:,
संकायप्रमुख:-संस्कृतविद्याधर्मविज्ञानसंकाय:
काशीहिन्दूविश्वविद्यालय:, वाराणसी।

**शैवभारतीशोधप्रतिष्ठानम्**
जङ्गमवाडीमठः, वाराणसी

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

*प्रकाशक:*
**शैवभारतीशोधप्रतिष्ठानम्**
डी ३५/७७, जङ्गमवाडीमठ:
वाराणसी-२२१००१

© शैवभारती शोधप्रतिष्ठान
प्रथमावृत्ति : २०२३

ISBN 978-93-82639-47-3
मूल्य : रु. ३००.०० (तीन सौ रुपये मात्र)

अक्षर संयोजन :
**डिजाइन प्वाइंट,** वाराणसी

मुद्रक:
**त्वरित मुद्रण**
गदग

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीमत्काशीविश्वाराध्यज्ञानसिंहासनस्य
पूर्वाचार्याणां दिव्यसन्निधौ



ग्रन्थपुष्पसमर्पणम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रीजगद्गुरुरेणुकादिपञ्चाचार्येभ्यः
अगस्त्यादिपञ्चमहर्षिभ्यः पञ्चसूत्रोपदेशः









CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

## कारिकाकृतः



विद्यावाचस्पतयः
श्रीमत्काशीजगद्गुरवः
श्रीचन्द्रशेखरशिवाचार्यभगवत्पादाः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

## अद्यतनानां श्रीजगद्गुरूणां पञ्चाचार्याणां शुभाशंसनम्

सन्ति जगत्यस्मिन् बहवः सनातनाः धर्माः। तेषु मुख्यतमो धर्मो वीरशैवः। अस्य धर्मस्य आद्योपदेशकः शिवः। अतोऽयं धर्मः शिववत् सनातनः पवित्रश्च। सर्वेषां हितकारकोऽयं धर्मः। सृष्टेरादौ ब्रह्मणः प्रार्थनानुसारं शिवकृता सृष्टिः गणसृष्टिः। भगवान् शिवः कृतयुगे स्वसंकल्पमात्रेण एकाक्षराद्याचार्यान् स्वकीयेभ्यः सद्योजातादिवक्त्रेभ्यः प्रकटीकृत्य तान् सर्वान् दीक्षयित्वा तेषामुत्तमाङ्गेषु इष्टलिङ्गं धारयित्वा च तेभ्यः कामिकादिवातुलान्तानाम् उत्तरे भागे स्थितं वीरशैवसिद्धान्तं प्रबोध्य दण्ड-कमण्डलुप्रदानेन जगद्गुरुत्वमपि प्रादात्। एते च महाचार्याः शिवसृष्टेभ्यः भद्रकाल्यादिस्वशक्तिसहितेभ्यः वीरनन्द्यादिगणेभ्यः विधिवद्दीक्षां कृत्वा वीरशैववंशोत्पत्तेर्मार्गं प्रशस्तं कृतवन्तः। एतेभ्यो वीरनन्द्यादिगणेभ्यः समुत्पन्नोऽयं वंशः वीरशैव इत्यभिधीयते।

एकाक्षरादयः पञ्चाचार्याः शिवादेशानुसारेण प्रतियुगं प्रसिद्धेभ्यः शिवलिङ्गेभ्यः प्रकटीभूय देवदानवमानवादीन् दीक्षयित्वा शिवाद्वैतसिद्धान्तप्रतिपादकं वीरशैवधर्मं प्रतिष्ठापयामासुः। द्वापरयुगे अगस्त्यादिमहर्षिभ्यः प्रबोधितानि पड्विडादिपञ्चसूत्राणि शिवागमेषु सुप्रसिद्धानि। एतेषु पञ्चसूत्रेषु पञ्चवर्णसूत्रस्य भाष्यं काशीपीठस्य ज्ञानमन्दिरग्रन्थालये उपलब्धमासीत्। अन्येषां सर्वेषां नाममात्रं परिचय आसीत्। एतन्न्यूनतां परिहर्तुं विदुषा श्रीमता काशीज्ञानसिंहासनाधीश्वरेण विद्यावाचस्पतिना जगद्गुरुणा श्रीचन्द्रशेखरशिवाचार्येण पञ्चानामपि सूत्राणां कारिकारूपेण अर्थविवरणं कृतमिति परमः संतोषः। एतासां कारिकाणां संस्कृतमयी वृत्तिः हिन्दी-भाषायां तात्पर्यं च विद्यावाचस्पतिना आगमशास्त्रविदुषा कमलेशझामहाभागेन कृतमिति ज्ञात्वा वयं सर्वेऽपि पञ्चाचार्याः अतीवानन्दमनुभवामः। एवं कारिका - वृत्ति - तात्पर्यसहितं ग्रन्थरत्नमिदं 'पञ्चाचार्यपञ्चसूत्राणि' इति नाम्ना काशीपीठस्य शैवभारती-शोधप्रतिष्ठानेन लोककल्याणार्थं प्रकाश्यते। ग्रन्थोऽयमपूर्वः। पञ्चपीठानां शाखामठीयाः सर्वे शिवाचार्याः स्वस्वभक्तेभ्यः पञ्चसूत्राणां प्रबोधनं कृत्वा कृतयुगे बोधितानामाचार्याणाम् उपदेशस्य प्रचारं करिष्यन्तीत्याशास्महे। ग्रन्थरचनायां सहकारिणे विद्वद्वराय विद्यावाचस्पति- कमलेशमहाभागाय मङ्गलाशीर्वादाः। सर्वेभ्यो वाचकेभ्यश्च शुभाशीर्वादाः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

# पञ्चाचार्यपञ्चसूत्राणि

श्रीजगद्गुरुणा रेणुकभगवत्पादेन महर्षये अगस्त्याय उपदिष्टं
**१) प्रथमं सूत्रं 'पड्विडिः' (पद्विधिः-पदविधिः)**

श्रीजगद्गुरुणा दारुकभगवत्पादेन महर्षये दधीचये उपदिष्टं
**२) द्वितीयं सूत्रं ''वृष्टिः''**

श्रीजगद्गुरुणा घण्टाकर्णभगवत्पादेन महर्षये व्यासाय उपदिष्टं
**३) तृतीयं सूत्रं 'लम्बनम्'**

श्रीजगद्गुरुणा धेनुकर्णभगवत्पादेन महर्षये सानन्दाय उपदिष्टं
**४) चतुर्थं सूत्रं 'मुक्तागुच्छः'**

श्रीजगद्गुरुणा विश्वकर्णभगवत्पादेन महर्षये दूर्वाशाय उपदिष्टं
**५) पञ्चमं सूत्रं 'पञ्चवर्णः'**

**पड्विड्यादीनि सूत्राणि पञ्चाचार्यकृतानि च।**
**शिवागमोपलब्धानि शिवभावप्रदानि हि।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

# विषयानुक्रमणिका


१. प्रथमाध्यायः
**उद्देशप्रकरणम्** ५-७

२. द्वितीयाध्यायः
**कृतयुगीनमैतिह्यम्** ८-४०

३. तृतीयाध्यायः
**त्रेतायुगीनमैतिह्यम्** ४१-७०

४. चतुर्थाध्यायः – **द्वापरयुगीनमैतिह्यम्**
**आचार्यरेणुकेन अगस्त्यमुनये पद्विधिसूत्रोपदेशः** ७१-११५

५. पञ्चमाध्यायः – **द्वापरयुगीनमैतिह्यम्**
**दारुकभगवत्पादेन महर्षिदधीचये वृष्टिसूत्रोपदेशः** ११६-१३९

६. षष्ठाध्यायः – **द्वापरयुगीनमैतिह्यम्**
**घण्टाकर्णेन व्यासाय लम्बनसूत्रोपदेशः** १४०-१५३

७. सप्तमाध्यायः – **द्वापरयुगीनमैतिह्यम्**
**धेनुकर्णभगवत्पादेन सानन्दमहर्षये मुक्तागुच्छ-सूत्रोपदेशः** १५४-१६८

८. अष्टमाध्यायः – **द्वापरयुगीनमैतिह्यम्**
**विश्वकर्णभगवत्पादेन दूर्वाशाय महर्षये पञ्चवर्णमहासूत्रोपदेशः** १६९-१९०

९. नवमाध्यायः
**श्रीरम्भापुरीपीठस्य कलियुगीनमैतिह्यम्** १९१-२१३

१०. दशमाध्यायः
**श्रीमदुज्जयिनीपीठस्य कलियुगीनमैतिह्यम्** २१४-२२३

११. एकादशाध्यायः
**श्रीमत्केदारपीठस्य कलियुगीनमैतिह्यम्** २२४-२२८

१२. द्वादशाध्यायः
**श्रीशैलपीठस्य कलियुगीनमैतिह्यम्** २२९-२३८

१३. त्रयोदशाध्यायः
**श्रीमत्काशीपीठस्य कलियुगीनमैतिह्यम्** २३९-३३६


CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



# उद्देशाख्यः प्रथमाध्यायः

पञ्चाननास्यसम्भूतान् पञ्चाक्षरमनूपमान्।
पञ्चसूत्रकृतान्नौमि पञ्चाचार्यान् जगद्गुरून्।।१।।

आचार्याणां हि सर्वेषां चारित्र्यं पालनं खलु।
उपदेशं च तेषां वै ह्यपूर्वं परिकीर्त्यते।।२।।

अतो ह्यस्मिन् महाग्रन्थे तेषां चारित्र्यमुत्तमम्।
उपदेशमपूर्वं च लिख्यते भक्तितो मया।।३।।

सनातनाश्च ते सर्वे शिवभावसमन्विताः।
नित्यमुक्ता निरातंका मुक्तिमर्गोपदेशकाः।।४।।

अत एव हि तेषां वै नास्ति जन्म महीतले।
न योनियन्त्रप्रपीडा च नास्ति तेषां कदाचन।।५।।

प्रकटीभूय लिङ्गाद्वै लिङ्गतत्त्वं प्रबोध्य च।
पुनर्लिङ्गे विलीनानां लिङ्गलीला विलिख्यते।।६।।

शिवादेशं समासाद्य कृताद्युगचतुष्टये।
भूयो भूयः समागत्य पञ्चाराध्या हि भूतले।।७।।

दीक्षात्रयेण निर्दग्ध्वा जीवानां च मलत्रयम्।
लिङ्गत्रयमुपादिश्य लिङ्गतत्त्वमबोधयन्।।८।।

एकाक्षरस्तस्था चैव द्व्यक्षरस्त्र्यक्षरस्तथा।
चतुःपञ्चाक्षरश्चैते पञ्चाचार्याः कृते युगे।।९।।

एते सर्वे महाचार्याः देवान् ब्रह्मादिकान् किल।
विधिवद्दीक्षयित्वा च शिवाद्वैतमतबोधयन्।।१०।।

त्रेतायुगे समारब्धे पुनः पञ्च गणाःकिल।
एकवक्त्रादिरूपेण प्रादुरासन् महीतले।।११।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सर्वेऽपि ते महाचार्याः यक्षान् रक्षास्तथैव च।
दानवान् दीक्षयित्वा च लिङ्गतत्त्वमबोधयन्।।१२।।

द्वापरे च युगे प्राप्ते पञ्चाचार्या त एव हि।
लिङ्गेभ्यश्च समुद्भूय सूत्रान् पञ्च प्रबोधयन्।।१३।।

रेणुकाख्यो महाचार्यो ह्यगस्त्याय महर्षये।
सम्बोध्य 'पद् विधिं सूत्रं' तद्द्वारा जगमुद्धरत्।।१४।।

दारुकाख्यो महाचार्यो ऋषये च दधीचये।
प्रबोध्य वृष्टिसूत्रं वै जीवतत्त्वं न्यबोधयत्।।१५।।

घण्टाकर्णो महाचार्यो व्यासाय ऋषये किल।
उक्तत्वा च लम्बनं सूत्रं शिवतत्त्वमबोधयत्।।१६।।

धेनुकर्णो महाचार्यः सानन्दाय महर्षये।
मुक्तागुच्छं महासूत्रं बोधयित्वा तमब्रवीत्।।१७।।

दृश्यमानं जगत्सर्वं षट्त्रिंशत्तत्त्वरूपकम्।
जानीहि मौक्तिकं गुच्छं शिवरूपं शिवात्मकम्।।१८

विश्वकर्णो महाचार्यो दूर्वाशकोपशान्तये।
पञ्चवर्णं महासूत्रं संबोध्य तं समुद्धरत्।।१९।।

एवं पञ्च गणाः सर्वे ह्यवतीर्य महीतले।
अगस्त्यादिमहर्षिभ्यःसूत्रान् पञ्च समादिशन्।२०।।

एतानि पञ्च सूत्राणि पञ्चाचार्यकृतानि च।
आद्यानीति प्रसिद्धानि सूत्राणि खलु भारते।।२१।।

जीवेशौ बन्धमोक्षौ च। जगद्रूपं तथैव च।
पञ्चैते वीषया मुख्याः सूत्रेणात्र निरूपिताः।।२२।।

कलौ युगे च सम्प्राप्ते पञ्चाचार्याःपुनर्भुवि।
शिवादेशं समासाद्य शिवलिङ्गादिहाऽभवन्।।२३।।

रेवणो मरुलश्चैकोरामःपण्डित एव च।
विश्वाराध्य इति ख्याता आचार्याश्च कलौ युगे।।२४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



एते सर्वे महाचार्या नृपान् संदीक्ष्य वै किल।
दीक्षयित्वा प्रजाः सर्वाः शिवाद्वैतमबोधयन्।।२५।।

महनीयेषु पीठेषु गुरुशिष्यपरंपरा।
अनादिकालतोऽद्यान्तमक्षुन्ना हि विराजते।।२६।।

उपर्युक्तानि सूत्राणि पञ्चाचार्यकृतानि च।
शिवागमोपलब्धानि शिवभावप्रदानि हि ।।२७

एतानि पञ्चसूत्राणि दार्शनिकानि वै किल।
सिद्धान्ते वीरशैवाख्ये प्रसिद्धान्यादिकालतः।।२८।।

दुरूहानां च सूत्राणां ह्यर्थजिज्ञासुना मया।
चिन्तितं हि बहोः कालात् तदर्थं यतितं बहु ।।२९।।

सिद्धान्ताख्यानि तन्त्राणि श्रीसिद्धान्तशिखामणिम्।
पुराणानि च शैवानि कोशाश्च विविधाः खलु।।३०।।

आलोक्य च समालोच्य चिन्तयित्वा त्वहर्निशम्।
चर्चयित्वा च विद्वद्भिर्नानाशास्त्रविशारदैः।।३१।।

कारिका रचिता ह्येता पञ्चसूत्रार्थबोधिकाः।
बालानां सुखबोधाय प्रयत्नोऽयं मया कृतः।।३२।।

सर्वेषां कारिकाणां च वृत्तिः संस्कृतभाषया।
लिखिता कमलेशेन ह्यागमार्थविवेकिना।।३३।।

तेनैव विदुषा ह्यत्र राष्ट्रभाषामयं शुभम्।
वृत्तेस्तात्पर्यमेतेन कृतं लोकहिताय च ।।३४।।

ग्रन्थोऽयं शीघ्रमेवैव भाषासु विविधासु च।
प्रकाश्यते ह्यनूद्यैव सर्वकल्याणहेतवे।।३५।।

अतो जिज्ञासवःसर्वे पञ्चसूत्राणि वै किल।
श्रद्धया च समभ्यस्य फलं वाञ्छितमाप्नुयुः।।३६।।

इति उद्देशाख्यः प्रथमाध्यायः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ द्वितीयाध्यायः ॥

# कृतयुगीनमैतिह्यम्

**स्वातन्त्र्यशक्त्योल्लसितः सुतन्त्र-प्रवर्तकः शाश्वतधर्मवाहः।**
**शम्भुर्जयेत् तत्कृतविश्ववास्यः स्वच्छः स्वतन्त्रः समदृक् कृपालुः॥१॥**

## वृत्तिः

अन्नपूर्णां विशालाक्षीं विश्वनाथं परात्परम्।
गुरुं रामेश्वरं वन्दे शिवानुग्रहकारिणम्॥१॥

पञ्चसूत्रकृतो दिव्यान् पञ्चाननमुखोद्गतान्।
पञ्चाक्षरमयान् वन्दे पञ्चाचार्यान् जगद् - गुरून्॥२॥

यच्छतः परमाह्लादं सूत्रकर्तॄन् जगद्गुरून्।
दिव्यानामग्रणीन्नौमि पञ्चाचार्यान् गणेश्वरान्॥३॥

श्रीविश्वनाथकृपया कमलेशविप्रः
श्रीचन्द्रशेखरगुरोः शिवकारिकायाः।
श्रीसूत्रपञ्चकपदार्थविवेचिकायाः
श्रीवृत्तिमातनितुमीशमयीं यतिष्ये॥४॥

स्वस्वभावभूता पराम्बा शक्तिः ब्रह्महरिरुद्रादिभिरपि स्तूयमाना शिवस्योल्लासिका ह्लादिनी जयति। तामेनां समाश्रितः श्रीतन्त्रश्रुतिशास्त्राणां प्रवर्तकः सत्यसनातनधर्मवृषभवाहनो महेशः स्वस्वातन्त्र्यविनिर्मितविश्वाधिष्ठानभूमिः समदृष्टिरनुग्रहमूर्तिः स्वच्छः स्वतन्त्रः सर्वज्ञः सर्वकर्ता विजयते तमेनं प्रणमन् सद्गुरुः शिवाचार्यः श्रीविश्वाराध्यपीठाधिपतिर्जगद्गुरुरत्रभवान् श्रीचन्द्रशेखरशिवाचार्यो महास्वामी सर्वलोककल्याणहेतवे श्रीवीरशैवागमदर्शनसर्वस्वभूतं पञ्चसूत्रबीजम् अङ्कुरयितुं सुकुमारमतीनपि परमार्थभूतस्वात्मशिवतत्त्वबोधोदयेन अन्तश्चमत्कर्तुं श्रीपञ्चसूत्रकारिकां चिकीर्षन् ग्रन्थादौ मङ्गलमातनोति - स्वातन्त्र्येति।

"पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान-बलक्रिया चे"ति श्रुतेः "चितिः स्वतन्त्रा विश्वसिद्धिहेतुरि"ति स्मृतेश्च स्वातन्त्र्यशक्तिः शिवस्य स्वभावो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



जयति। एतत्स्वातन्त्र्यमहिम्ना भगवान् शिवः विश्वोत्तीर्णपदादविच्युतः सन्नेव विश्वमयतां दधद् भूमिं षट्त्रिंशत्तत्त्वमयीं स्पृशति।

श्रीवीरशैवाचार्यैः सैषा स्वातन्त्र्यशक्तिः शिष्यबुद्धावाकलयितुं चिद्, आनन्दः, एषणा, ज्ञानं क्रियाशक्तिश्चेति नैकधा प्रविभज्य विमृश्यते। या अभेदमयी विश्वोत्तीर्णावस्था प्रभोः, तत्र चिदानन्दमयी द्विप्रकारा शक्तिः विजृम्भते। अथ विश्वमयी याऽवस्था तत्र इच्छाज्ञानक्रियामयी त्रिप्रकारा शक्तिरपि पदं धत्ते। तदेवं विश्वोत्तीर्णस्य सतः विश्वमयतयावभासने चिच्छक्तिप्राधान्ये शिवतत्त्वम्, आनन्दशक्तिप्राधान्ये शक्तितत्त्वम्, इच्छाशक्तिप्राधान्ये सदाशिवतत्त्वम्, ज्ञानशक्तिप्राधान्ये ईश्वरतत्त्वम्, क्रियाशक्तिप्राधान्ये तु शुद्धविद्यातत्त्वं समुल्लसतीति शिवादिविद्यान्तं तत्त्वपञ्चकं शुद्धः सर्गः परिगीयते॥१॥

**पञ्चाननमुखोद्भूतान् पञ्चाक्षरमनूपमान्।**
**पञ्चसूत्रकृतो वन्दे पञ्चाचार्यान् जगद्गुरून्॥२॥**

पद्विधिरित्येवमादिपञ्चसूत्ररचयितारो दिव्या गणेश्वराः श्रीशिववक्त्रसमुद्गता एकाक्षरादिसंज्ञान्विताः पञ्चाक्षरमन्त्रवदाराध्याः जगद्गुरवः जयन्ति तान्नौमिइत्येवम् यस्य देवे पराभक्तिर्यथा देवे तथा गुराविति स्मारं स्मारं सबहुमानम् अभिवन्दते ज्ञानसिंहासनाधीश्वरो महास्वामी पञ्चाननेति॥२॥

**शिवेशानमुखोद्भूतान् नत्वा सर्वान् गुरूनिह।**
**ग्रन्थारम्भं करिष्यामि सिद्धिर्भवतु मे सदा॥३॥**

**एकदन्तं महाकायं गजवक्त्रं चतुर्भुजम्।**
**ऋद्धिसिद्धिपतिं वन्दे सर्वकामार्थसिद्धये॥४॥**

श्रीविश्वाराध्यपीठं श्रीकाश्याम् आनन्दवने यद् ज्ञानसिंहासनसमलङ्कृतं तदधीशः पञ्चाचार्यपरम्परामण्डनः महास्वामी जगद्गुरुः श्रीमानत्रभवान् श्रीचन्द्रशेखरशिवाचार्यः सद्गुरुकृपां शुद्धां समाश्रितः श्रीगणेशं स्तुवन् द्वापरे पञ्चाचार्य- रचितानां पञ्चसूत्राणां निगमागमसिद्धान्तार्थगर्भाणां श्रीवीरशैवसम्प्रदाये सुप्रथितानां स्फुटार्थाम् अभिनवां कारिकां सर्वभक्तजनमुपकर्तुं विरचयन् विजयते शिवेशानेत्यादि॥३-४॥

**गोत्रमूलं महाशूरं तारकासुरनाशकम्।**
**प्रपद्येऽहं सदा स्कन्दं प्रणवार्थप्रबोधकम्॥५॥**

**प्रकटीभूय लिङ्गाद्वै लिङ्गतत्त्वं प्रबोध्य च।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**पुनर्लिङ्गे विलीनानाम् आचार्याणां श्रये पदम्।।६।।**

**श्रीविश्वाराध्यपीठस्य ज्ञानसिंहासने स्थितः।**
**शिवाचार्यो महास्वामी श्रीकाश्यां चन्द्रशेखरः।७।।**

**सद्गुरोः शिवरूपस्य कृपामाश्रित्य निर्मलाम्।**
**श्रीवीरशैव - सूत्राणां कुर्वेऽहं कारिकां नवाम्।।८।।**

**कैलासे शिवविश्वेशः वीरशैवं सुतन्त्रकम्।**
**श्रीदेव्या प्रार्थितो देवो गणपान् समुपादिशत्।।९।।**

**ईशाज्ञया महीं प्राप्तैः पञ्चाचार्यैर्विनिर्मितम्।**
**तन्त्रार्थसूचनात् सूत्रं वन्दे दिव्यं महार्थकम्।।१०।।**

**ईशं पञ्चशिवाचार्यगुरून्नत्वा शिवाशया।**
**सूत्रार्थसुखबोधाय कारिकैषा वितन्यते।।११।।**

कृतत्रेतायुगयोरिव द्वापरे युगे श्रीकैलासमधिश्रितो विश्वेश्वरो भगवान् श्रीदेव्या पार्वत्या सम्प्रार्थितः निगमागमश्रुतिप्रतिपाद्यमर्थं श्रीवीरशैवाचार्यसमभिनन्दितं पञ्चभ्यो गणेश्वरेभ्यः समुपदिष्टवान्। श्रीशिवाज्ञया महीतलमुपागतैः तैः पञ्चभिराचार्यैः उपदिष्टानां श्रीतन्त्रशास्त्रमहार्थानाम् सारसूचकानि यानि पञ्चसूत्राणि विनिर्मितानि तेषां सुसुखम् अर्थबोधः सुकुमारमतिभ्योऽपि यथा प्रकाशेत तथा प्रणतेश्वरपञ्चाचार्यः श्रीचन्द्रशेखर- शिवाचार्यः परमशिवतात्पर्यावद्योतिनीं कारिकामारचयति गोत्रमूलमित्यादिकाम्।।५-११।।

**शास्त्राणां सूत्ररूपेण लोकार्पणकला शुभा।**
**प्राचीना वर्तते तावदनूचानैः समादृता।।१२।।**

**लोके सूत्रोपदेष्टारः पञ्चाचार्याः सुविश्रुताः।**
**तानाचार्यवरान् वन्दे वीरशैवप्रवर्तकान्।।१३।।**

अनायासेन शास्त्रप्रतिपाद्यमर्थं जिज्ञासुजनबुद्धौ यथा समाकलितं भवेत् तथा सूत्रप्रणयनं नाम कला सर्वजनोपकारिणी प्राचीना परिपाटी अनूचानगुरुभिराद्रियततमाम्। इमां कलां श्रितः पञ्चाचार्येषु सम्भृतादरभावश्चन्द्रशेखरमहास्वामी मुहुरभिवन्दते सुविज्ञैरभिवन्दनीयेषु शास्त्राणामित्यादिकारिकाभ्याम् ।।१२-१३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पद्विधिर्वृष्टिरित्येतल्लम्बनं मुक्तगुच्छकम्।
पञ्चवर्णमिति प्रोक्तं दिव्यं तत् सूत्रपञ्चकम्।।१४।।

पद्विधी रेणुकेनैतदगस्त्याय प्रबोधितम्।
दधीचिमुनये वृष्टिर्दारुकेण निबोधितम्।।१५।।

व्यासाय घण्टकर्णेन लम्बनं नाम सूत्रकम्।
धेनुकर्णमहार्येण सानन्दाय महर्षये।।१६।।

मुक्तागुच्छमिति प्रोक्तमद्भुतार्थ – प्रकाशकम्।
क्रोधिने त्वत्रिपुत्राय दूर्वाशाय महर्षये।।१७।।

पञ्चवर्णं महासूत्रं विश्वकर्णेन बोधितम्।
पञ्चैते परमाचार्या अवतीर्य युगे युगे।।१८।।

देवदानवगन्धर्वान् मुनीनथ महामुनीन्।
दीक्षया परिशोध्यैव तत्त्वं चैव महत्तरम्।।१९।।

सम्प्रबोध्य महीलोके धर्मसंस्थापनं व्यधुः।
तदेषां युगभेदेन चारित्र्यमुत्तमोत्तमम्।।२०।।

शिवागमेषु यत् प्रोक्तं वीरशैवसुदर्शने।
गुरुतो यदभिज्ञातं कुर्वे तत्सारकारिकाम्।।२१।।

यानि दिव्यानि सूत्राणि पञ्चभिराचार्यैर्विरचितानि तानि पञ्च उद्देष्टुं कारिकावतरति पद्विधिरत्यादिः। प्रथमं सूत्रं विद्यते पद्विधिरिति, द्वितीयं सूत्रं वृष्टिरिति, तृतीयं लम्बनमिति चतुर्थं मुक्तगुच्छकमिति पञ्चमन्तु पञ्चवर्णम् इति। तत्र पद्विधिरिति यत् प्रथमं दिव्यसूत्रं तद् आचार्यरेणुको भगवान् अगस्त्यमुनये समुपदिदेश। यद् द्वितीयं दिव्यं सूत्रं तद् आचार्यदारुको भगवान् दधीचिमुनये समुपदिदेश। यत् तृतीयं दिव्यं सूत्रं तद् आचार्यघण्टाकर्णो भगवान् व्यासमुनये समुपदिदेश। यच्चतुर्थं दिव्यं सूत्रं तद् आचार्यधेनुकर्णो भगवान् सानन्दमुनये समुपदिदेश। अथ यत् पञ्चमं दिव्यं सूत्रं पञ्चवर्णमिति तद् आचार्यविश्वकर्णो भगवान् अत्रिपुत्राय क्रोधास्त्राय दूर्वाशाय महर्षये प्रबोधितवान्। एते परमाचार्याः आचार्यरेणुकप्रभृतयः प्रतियुगं भिन्ननामभाजः श्रीशिवाज्ञया भूतलमवतीर्णाः देवान्, दानवान्, गन्धर्वान्, मुनीनथ मानवान् दीक्षाविधिना शोधनपुरःसरं तत्त्वव्रातं परमं तत्त्वं च प्रबोधयन्तः वीरशैवधर्मसंस्थापनं कुर्वन्ति।।१४-२१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**अयमाशयः**—अनुग्रहकृत्यपरायणो भगवान् भवः कल्पारम्भे कृतयुगे यान् पञ्चगणेश्वरान् वीरशैवशास्त्ररहस्योपदेशं विधाय दीक्षायोजनादिविधिना संयोज्य धर्मोपदेशार्थं प्रेषितवान् तानेव भिन्ननामधारिणो गणेश्वरान् त्रेतायुगेऽपि तदेवोद्दिश्य भूतले अवतारितवान्। तद्वद् द्वापरे भिन्ननामाक्षरान् तान् गणेश्वरान् वीरशैवधर्म-प्रबोधनाय भगवान् भूतनाथः पार्वतीपतिः दीक्षितान् भुवि अवतारितवान्। ह्रसितमेधसो जनान् द्वापरे आगमशास्त्रप्रतिपाद्यविषयान् सम्यगवगमयितुं दिव्यानि सूत्राणि विरचितवन्तो गणेश्वरगुरवः पञ्चाचार्यनाम्ना प्रथन्ते—रेणुकाचार्यः, दारुकाचार्यः, आचार्यघण्टाकर्णः, आचार्यधेनुकर्णः आचार्य-विश्वकर्णश्चेति। धर्मोपदेशेन सर्वजन-बुद्धिशोधनार्थाय समादिष्टा इमे आचार्याः पूज्या गणेश्वरा जगदम्बिकायाः विश्वेश्वरस्य चाशिषं प्राप्य तयोः पित्रोराज्ञां शिरोधार्यां विधाय भूतलमवतीर्णाः सम्बभूवुः।

तदेवं युगभेदेन पञ्चानामप्येषां यत् परमम् उत्तमं चरितं शिवागमेषु विशिष्य वीरशैवदर्शनेषु वर्णितं भवति, गुरुभिर्यद् गीयमानं भवति वैचित्र्यचित्रितं, तदीयं सारतत्त्वं चायं चायं प्रमुदितान्तरङ्गो गायन् स्फुटार्थां सूत्रकारिकां रचयितुमपक्रमते—पद्विधिरित्यादिना कारिकाष्टकोपोद्घातमुखेन महास्वामिवर्यः सुधीश्चन्द्रशेखर-शिवाचार्यः॥१४-२१॥

## पदार्थप्रबोधनं जगत्सृष्टिश्च

**पदार्थो द्विविधः प्रोक्तः शिवेन परमात्मना।**
**आद्यःस्वतन्त्र इत्युक्तः परतन्त्रो द्वितीयकः॥२२॥**

**स्वतन्त्रस्तु शिवो ज्ञेयः स चैको नित्य एव च।**
**शिवादन्यत् जगत्सर्वं परतन्त्रं भवेद् ध्रुवम्॥२३॥**

**परतन्त्रःपदार्थोऽपि पुनर्द्वेधा विभज्यते।**
**चेतनोऽचेतनश्चेति संसारोऽयं प्रकीर्तितः॥२४॥**

**चेतनेषु च सर्वेषु वीरनन्द्यादयो गणाः।**
**एकाक्षरादयःसर्वे नित्यमुक्ता भवन्ति हि॥२५॥**

**सृष्टिस्थित्यन्तकर्तारो ब्रह्मविष्णुमहेश्वराः।**
**तथैव मानुषाः सर्वे नित्यसंसारिणो मताः॥२६॥**

**अस्ति सच्चित्सुखाकारमलक्षणपदास्पदम्।**
**निर्विकल्पं निराकारं निर्गुणं निष्प्रपञ्चकम्॥२७॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवम्।**
**प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितम्।।२८।।**

**स्वप्रकाशं पराकाशमनौपम्यमनामयम्।**
**सर्वज्ञं सर्वगं शान्तं सर्वशक्ति-निरङ्कुशम्।।२९।।**

**लीनं तिष्ठति तत्रैव चेतनाचेतनं जगत्।**
**स्वात्मलीनं जगत्कार्यं स्वप्रकाश्यं तदद्भुतम्।।३०।।**

**शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया।**
**स्वरूपमादधे किञ्चित् सुखस्फूर्तिविजृम्भितम्।।३१।।**

वीरशैवदर्शने द्विविधः पदार्थः प्रतिपाद्यते आद्यः स्वतन्त्रः, स च एकः नित्यः आनन्दमयः चिन्मयः शिवः। द्वितीयस्तु परतन्त्रः स च द्विविधः चेतनः अचेतनश्च। अयं संसारः परतन्त्रः। वीरनन्दिप्रभृतयः गणाः चेतनाः एकाक्षरादयः नित्यमुक्ताः चेतना अथ तद्भिन्नास्तु ब्रह्मादयः मानवादयश्च अनादि-संसारिणः स्वतंत्रस्य शिवस्य आराधकाः सन्ति। भगवान् शिवः सच्चित्सुखमयः निर्विकल्पः निराकारः निष्प्रपञ्चः अपरिच्छिन्नः प्रपञ्चोत्तीर्णः प्रमाणानां जनकः स्वप्रकाशः सर्वज्ञः सर्वशक्तिमान् विभुः शान्तश्च नित्यमुक्तः स्वमहिम्नि प्रतिष्ठितः राराजते। चराचरात्मकं सर्वं जगत् तस्मिन्नेव लीनं सन्तिष्ठते। जगतः सिसृक्षायां महेश्वरः सुखस्फूर्तिविजृम्भितम् स्पन्दसुन्दरं स्वरूपम् आकलितवान् इति आवेदयितुं कारिकाकृत् प्राह "पदार्थोद्विविधः" इत्यादिकाः कारिकाः।।२२-३१।।

**तदीया परमा शक्तिः सच्चिदानन्दलक्षणा।**
**तदिच्छयाऽभवत्साक्षात् तत्स्वरूपानुकारिणी।।३२।।**

**स शम्भुर्भगवान् देवः सर्वज्ञः सर्वशक्तिमान्।**
**जगत्सिसृक्षुःप्रथमं ब्रह्माणं सर्वदेहिनाम्।।३३।।**

**स्रष्टारं तं हि सृष्ट्वा च शङ्करः सर्वशक्तिमान्।**
**सर्वज्ञःसकला विद्याः सानुग्रहमुपादिशत्।।३४।।**

**अधीत्य सकला विद्या ब्रह्मा विश्वनियामकात्।**
**निर्मातुमखिलान् लोकान् समुद्यमपरोऽभवत्।।३५।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



निर्माणे कृतयत्नोऽपि जगतां स शिवाज्ञया।
न समर्थोऽभवत्कर्तुमज्ञानान्मायया वृतः॥३६॥

चिन्तितो हि पुनर्ब्रह्मा प्रार्थयामास शङ्करम्।
उपायं वद मे शम्भो जगत्सृष्टौ जगत्पते॥३७॥

एवं सम्प्रार्थितःशम्भुर्ब्रह्मणा विश्वयोनिना।
उपायमवदत् तस्मै जगत्सृष्टिप्रवर्तनम्॥३८॥

ज्ञातोपायोऽपि स ब्रह्मा प्रवृत्तोऽपि च निर्मितौ।
न समर्थोऽभवत् कर्तुं नानारूपमिदं जगत्॥३९॥

पुनस्तं प्रार्थयामास विश्वयोनिर्जगत्पतिम्।
सृष्टिं विधेहि यद्दृष्ट्वा भगवन्! करवाण्यहम्॥४०॥

प्रार्थनां तां समाकर्ण्य शम्भुर्विश्वनियामकः।
ससर्जात्मसमप्रख्यान् गणानेकाक्षरादिकान्॥४१॥

गोत्रप्रवर्तकांश्चैव वीरनन्द्यादिकान् गणान्।
एवं गणान् हि संसृज्य दर्शयामास शङ्करः॥४२॥

ब्रह्मा गणस्य तां सृष्टिं दृष्ट्वा हर्ष - समन्वितः।
ससर्ज च जगत् सर्वं नानारूपसमन्वितम्॥४३॥

शिवेन रचिता सृष्टिर्वर्णाश्रमविवर्जिता।
ब्रह्मणा रचिता सा तु वर्णाश्रमसमन्विता॥४४॥

अथ तदीया शक्तिः तदिच्छया तत्स्वरूपानुकारिणी बभौ। सर्गादौ भगवान् भवः ब्रह्माणं ससर्ज। असौ सानुग्रहं ब्रह्माणमुपदिष्टवान् सकला विद्याः। शिवादिष्टः जगत्स्रष्टुं कृतप्रयत्नोपि ब्रह्मा अज्ञानात् स्रष्टुं न शशाकेति सृष्टेरुपायं शिवं पप्रच्छ। शिवादुपदिष्टोपायोऽपि स जगत्स्रष्टुमसमर्थोऽभवत्। अथ विश्वयोनिः जगदीश्वरं शिवं सम्प्रार्थ्य प्राह–भवान् सृष्टिं विदधातु-तद्दृष्ट्वा जगत्सृष्टिं कर्तुं प्रभवाणि। विश्वनियन्ता शम्भुः ब्रह्मणः प्रार्थनां श्रुत्वा एकाक्षरदीन् गणान् गोत्रप्रवर्तकान् वीरनन्दिप्रभृतींश्च सृष्ट्वा ब्रह्माणं दर्शयामास। गणसृष्टिं विलोक्य हर्षप्रकर्षान्वितः ब्रह्मा नानारूपसमन्वितं जगत् ससर्ज। शिवसृष्टिः वर्णाश्रमविवर्जिताऽभूत्। ब्रह्मरचिता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सृष्टिस्तु वर्णाश्रमसमन्विताऽभूत्॥३२-४४॥

अथ सृष्ट्वा गणान् सर्वान् महादेवो महेश्वरः।
तेषु पञ्चगणान् मुख्यानाहूयेत्थं समादिशत्।।४५।।

एकाक्षरादयःपञ्च यूयं गच्छत भूतले।
भूलोकं हि समुद्धर्तुं धर्मस्थापन-हेतवे।।४६।।

तदर्थं दीयते दीक्षा गुरुत्वं च प्रदीयते।
इत्युक्त्वा स महादेवः गणान् स्वान्तिकमाह्वयत्।।४७।।

गणानेकाक्षरादीन्स उपावेश्य स्वसम्मुखम्।
आत्मलिङ्गं समेभ्योऽदात् सहर्षं मन्त्रपूर्वकम्।।४८।।

शिवादेशानुसारेण गणा एकाक्षरादयः।
उत्तमाङ्गे सदा लिङ्गं भाले चैव त्रिपुण्ड्रकम्।।४९।।

सर्वाङ्गेषु च रुद्राक्षान् धृत्वा दण्डकमण्डलुम्।
शिवेशानमुखोद्भूतान् ह्यागमान् शिवबोधितान्।।५०।।

श्रुत्वा शिवमुखादेव शिवाद्वैतपरं परम्।
वीरशैवमहातन्त्रमेकोत्तरशतस्थलम् ।।५१।।

कृतकृत्या गणाःसर्वे नत्वा शङ्करसद्गुरुम्।
अस्मदर्थं किमाज्ञेति प्रार्थयेयुर्मुहुर्मुहुः।।५२।।

गणानां प्रार्थनां श्रुत्वा महादेवः समब्रवीत्।
भवन्तः सर्व एवैते जगद्गुरुपदे स्थिताः।।५३।।

आचार्यत्वस्य सम्प्राप्त्या पञ्चाचार्यपदेन च।
प्रसिद्धिर्भवतां भूयात् भूतले मानवर्धिनी।।५४।।

इतः परं भवन्तो हि गणान्वीरादिकान् स्वकान्।
तच्छक्तिसहितान् सर्वान् दीक्षयन्तु यथोचितम्।।५५।।

वीरेण नन्दिना चैव भृङ्गिणा वृषभेण च।
स्कन्देनेति गणेनैव वीरशैवो विवर्धते।।५६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वंशस्य वीरशैवस्य मूलं यूयं गणेश्वराः।
अतो वंशविशुद्ध्यर्थं दीक्ष्यतां भो गणाधिपाः।।५७।।

शिवादेशानुसारेण यथाशास्त्रं यथाविधि।
वीरादयो गणाःसर्वे मन्त्रक्रमसुदीक्षिताः।।५८।।

भद्रकाल्या युतो वीरो गुरुणैकाक्षरेण च।
कुण्डलिन्या युतो नन्दी गुरुणा द्व्यक्षरेण च।।५९।।

ह्लादिन्या सहितो भृङ्गी त्र्यक्षरेण महात्मना।
भद्रायुतो वृषश्चैव चतुरक्षरयोगिना।।६०।।

देवसेनायुतःस्कन्दो वेल्लिना परिबृंहितः।
दीक्षितो हि महाज्ञानी पञ्चाक्षरगणेन च।।६१।।

स्वशक्तिसहिता एते गणा वीरादयःशुभाः।
धर्मदीक्षां गृहीत्वा तु शिवसंस्कारिणोऽभवन्।।६२।।

शिवसृष्टान् गणान् सर्वानेवमेव गणेश्वराः।
दीक्षयित्वा तु सर्वान्वै शिवाज्ञां पर्यपालयन्।।६३।।

कृतारम्भे महादेवो जगत्कल्याणहेतवे।
गणानेकाक्षरादीन् तानाहूयेत्थं समादिशत्।।६४।।

शिवाद्वैतपरं शास्त्रं वेदागमसुबोधितम्।
स्थापयिष्यथ भूलोके सर्वेषां हितकारकम्।।६५।।

तदर्थं भारते वर्षे पञ्चस्थानेषु भूतले।
दिव्यां जनिं समासाद्य साधयिष्यथ हीप्सितम्।।६६।।

श्रुत्वेमन्तु शिवादेशं भयभीता गणास्तदा।
आर्तभावेन देवेशं प्रार्थयामासुरीदृशम्।।६७।।

देवदेव महादेव जनिं मा देहि भूतले।
योनिस्तु मानुषी तत्र महादुःखविवर्धिनी।।६८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



यथा नो मानुषो भावो न भवेत् पृथिवीतले।
तथा प्रसादं देवेश विधेहि करुणाकर।।६९।।

इति सम्प्रार्थितो देवो गणैर्विह्वलमानसैः।
मा भैष्ट मम भक्तानां भीतिरेष्यति वा कुतः।।७०।।

नित्यमुक्तेषु युष्मासु भवबन्धभयःकुतः।
तन्तुना किं नु बध्येत मत्तो मदगजो बली।।७१।।

अतो निर्भीतयो गत्वा देवान् संस्कृत्य भूतले।
शिवाद्वैतं परं शास्त्रं स्थापयन्तु यथाविधि।।७२।।

अनादिकालतो ज्योतिर् लिङ्गरूपेण वै खलु।
विराजे भुवि सर्वत्र पश्यन्तु मम वैभवम्।।७३।।

पञ्चस्थानेषु भूलोके विराजेऽहं विशेषतः।
सोमेशःकोल्लिपाकीति सिद्धेशोज्जयिनी मता।।७४।।

द्राक्षारामस्य भीमेशो मल्लेशः श्रीगिरिस्थितः।
काश्यां श्रीविश्वनाथश्च स्वस्वरूपाणि पञ्च मे।।७५।।

आद्यः कृतयुगो ह्यत्र भूलोके प्रचलिष्यति।
समुद्धरत भो देवान् भोगप्रबलवासनान्।।७६।।

युगेऽस्मिन् जन्ममात्रेण कृतकृत्या जनाः किल।
युगोऽसौ कृत आख्यात आद्योऽयं सम्प्रकीर्तितः।।७७।।

साम्प्रतं देवराज्ये वै देवाज्ञापालनव्रताः।
आयुष्मन्तो जनाः सर्वे सत्यनिष्ठा निरामयाः।।७८।।

परोपकारिणः सर्वे शोकहीना दयापराः
धर्मो यत्र चतुष्पादस्स स्वर्णयुग उच्यते।।७९।।

एतादृशे स्वर्णयुगे गणा यूयं महीतले।
संस्कारयत देवान् स्वान् धर्मदीक्षासु तत्परान्।।८०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मदीयलिङ्गसंभूतान् महिमातिशयोज्ज्वलान्।
विस्मितास्त्रिदशाःसर्वे वो भजन्तु मदाज्ञया।।८१।।

अनौपम्यं च माहात्म्यं मम तावद् महीतले।
प्रकाशयन्तु सर्वत्र वेदमार्गानुसारतः।।८२।।

## गणानांलिङ्गावतारः पीठस्थापनं च

शिवादेशं समासाद्य गणा एकाक्षरादयः।
प्रादुर्भूतास्तु लिङ्गेभ्यो ध्यायन्तः शिवमानसाः।।८३।।

त्रिलिङ्गे सोमनाथाद्वै गणो ह्येकाक्षरःखलु।
सिद्धेशात्तु महालिङ्गात् द्व्यक्षरो गणनायकः।।८४।।

भीमनाथान्महालिङ्गात् त्र्यक्षरो गणपुङ्गवः।
मल्लेशाख्यान्महालिङ्गाद् गणपश्चतुरक्षरः।।८५।।

काश्यां विश्वेशलिङ्गाच्च पञ्चाक्षरमहागणः।
ज्योतिर्लिङ्गसमुद्भूता गणपाःपञ्च सम्मताः।।८६।।

एकाक्षरो द्व्यक्षरश्च त्र्यक्षरश्चतुरक्षरः।
पञ्चाक्षर इमे पञ्चाचार्याः ख्याताः कृते युगे।।८७।।

एकाक्षरेण मलये स्थापितं वीरपीठकम्।
द्व्यक्षरेणोज्जयिन्यान्तु पीठं सद्धर्मसंज्ञकम्।।८८।।

हिमालये तु वैराग्यं स्थापितं त्र्यक्षरेण तत्।
चतुरक्षरनाम्ना वै प्रसिद्धेन गणेन च।।८९।।

स्थापितं श्रीगिरौ सम्यक् सूर्यपीठं कृते युगे।
पञ्चाक्षरेण गुरुणा काश्यां श्रीज्ञानपीठकम्।।९०।।

एवं वै पञ्चपीठानि लोककल्याणहेतवे।
स्थापितानि महीभागे वर्तन्ते सूर्यचन्द्रवत्।।९१।।

भूरिभर्गो महादेवो ब्रह्मादीन् देवतागणान्।
समादिदेश दीक्षायै जन्मसाफल्यहेतवे।।९२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मम पञ्चमुखोद्भूताःपञ्चाचार्या हि भूतले।
पञ्चपीठानधिष्ठाय जगद्गुरुपदे स्थिताः।।९३।।

प्रतापमतुलं तेषां मत्तोऽपि महिमाधिकाः।
मल्लोकसर्वलोकानां जगद्गुरुवरोत्तमाः।।९४।।

गत्वा तत्सन्निधौ यूयं दीक्षां सम्प्राप्य वै किल।
भोगक्षोभं परित्यज्य योगयुक्ता भवन्त्विति।।९५।।

शिवादेशं समाकर्ण्य श्रद्धया सर्वदेवताः।
यथेच्छं पञ्चपीठेषु गत्वा सेवां समर्प्य च।।९६।।

सेवातुष्टमहाचार्यदीक्षां लिङ्गं समन्त्रकम्।
कृतकृत्याः समासाद्य लिङ्गाङ्गसङ्गिनोऽभवन्।।९७।।

सम्प्राप्य नीलिमे लिङ्गे ब्रह्मविष्णू च दैवते।
बैल्वकन्तु महालक्ष्मी रत्नलिङ्गं सरस्वती।।९८।।

हैमं लिङ्गं महादुर्गा वैद्रुमं नागदेवताः।
वस्वष्टं चान्द्रकान्तं तु विश्वेदेवास्तु राजतम्।।९९।।

कुमारौ पार्थिवं लिङ्गं स्फाटिकं वरुणः शुभः।
दिवाकरस्ताम्रलिङ्गं मौक्तिकं तु सुधाकरः।।१००।।

सुशिष्या देवदेवस्य लिङ्गमन्त्रौ समाप्नुयुः।
सर्वे देवगणाः सद्यो दीक्षाजालेन यन्त्रिताः।।१०१।।

आचार्येभ्यस्तुपञ्चभ्यो नित्यसंसारिणः शुभाः।
मन्त्रेष्टलिङ्गतात्पर्यप्रबोधनमवाप्नुवन् ।।१०२।।

एवं कृतयुगे देवाः दीक्षां स्वीकृत्य लिङ्गकम्।
उत्तमाङ्गे धारयन्तो ह्यभवन् वीरशैवकाः।।१०३।।

पञ्चाचार्यैःप्रदत्तं तु तल्लिङ्गमधुनापि च।
देवानामुत्तमाङ्गेषु प्रत्यक्षं राजते विराट्।।१०४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गणसृष्ट्यनन्तरं भगवान् महादेवः मुख्यान् पञ्चगणानाहूय समादिशत्—एकाक्षरादयः यूयं पञ्च भूतलं गत्वा धर्मं प्रतिष्ठाप्य भूलोकमुद्धरत—इति एतदर्थं युष्मभ्यं दीक्षां गुरुतां चादधामि इत्यभिधाय तेभ्यः शम्भुः मन्त्रपूर्विकाम् दीक्षाम् आत्मलिङ्गं च प्रादात्। एते तावद् एकाक्षरादयो गणेश्वराः उत्तमाङ्गे लिङ्गं भाले त्रिपुण्ड्रं गलादिषु रुद्राक्षं च धारयन्तः एकोत्तरशतस्थलं वीरशैवतन्त्रं शिवात् प्रापुः। (तदानीं भूलोकेपि देवानां साम्राज्यमासीत्।) देवराज्ये कृतयुगे जन्ममात्रेण जनाः कृतार्था भवन्ति। तत्र चतुष्पादो धर्मो वर्धते। स्वर्णयुगेऽपि देवा यथा प्रमादाद् भोगविलासेषु सक्ता न भवेयुस्तथा धर्मदीक्षाविधिना तान् संस्कारयन्त्विति समादिशन्नाह शिवः — त्रिदशा; आश्चर्यचकिताः सन्तः मदीय लिङ्गसम्भूतान् युष्मान् मदाज्ञया भजेयुः, वेदतन्त्रानुसारं मम माहात्म्यं महीतले यथा प्रसरेत् भवद्भिस्तथाऽनुष्ठीयताम्। लब्धशिवादेशाः एकाक्षरादयः शिवमानसाः लिङ्गेभ्यः प्रादुरभवन्। त्रिलिङ्गे सोमनाथलिङ्गात् एकाक्षरः, सिद्धेशलिङ्गाद्द्व्यक्षरः, भीमनाथात् त्र्यक्षरः, मल्लेशलिङ्गात् चतुरक्षरः, काशीविश्वेशलिङ्गात्तु पञ्चाक्षरः इत्येवं पञ्चगणेश्वराः कृतयुगे भूलोकमलंचक्रुः।

मलये एकाक्षरेण वीरपीठम्, उज्जयिन्यां द्व्यक्षरेण सद्धर्मपीठं, हिमालये त्र्यक्षरेण वैराग्यपीठम्, श्रीगिरौ चतुरक्षरेण सूर्यपीठं, काश्यां पञ्चाक्षरेण ज्ञानपीठम् इति पीठपञ्चकं सुचिरद्युति सूर्यचन्द्रवत् स्थापितं राजते।

अथ महादेवः ब्रह्मादीन् देवगणान् जन्मसाफल्य-हेतवे समादिशत्—जगद्गुरुभ्यः पञ्चभ्यः दीक्षां सम्प्राप्य भोगक्षोभवर्जं यूयं योगयुक्ता भवन्त्विति। आदेशमवाप्य देवाः पीठेषु गत्वा सेवया आचार्यान् तोषयित्वा दीक्षां मन्त्रं लिङ्गञ्चावाप्य आराधनापरायणा लिङ्गाङ्गसामरस्यं जग्मुः। ब्रह्मा विष्णुश्च नीलिमलिङ्गं प्राप्तवान्। महालक्ष्मीः बैल्वम्, सरस्वती रात्नं, महादुर्गा हैमं, नागदेवाः वैद्रुमं, चान्द्रकान्तं तावदष्टवसवः, विश्वेदेवास्तु राजतं लिङ्गमिष्टमापुः। अश्विनीकुमारौ पार्थिवं लिङ्गं, वरुणः स्फाटिकं लिङ्गम्, दिवाकरः ताम्रलिङ्गं, सुधाकरः मौक्तिकं लिङ्गं प्रापुः। तदेवं सर्वे देवाः देवाधिदेवमहादेवस्य लिङ्गमन्त्रप्राप्त्यै पीठेषु समुपस्थिताः, इत्थं गणेश्वरसद्गुरुभिश्च प्रेम्णा देवताजालं दीक्षाजालेन यन्त्रितमभूत्।

नित्यसंसारिणं देवगणमपि गणेश्वर-सद्गुरवः दीक्षादानपुरःसरं मन्त्रेष्टलिङ्ग-बोधभक्तिसम्भृत-मुक्तिश्रियालंकृतान् तानकुर्वन्। तदेवं कृतयुगे देवगणाः दीक्षाग्रहण-पुरःसरं गुरुप्रदत्तमिष्टलिङ्गं शिरसा धारयन्तः वीरशैवाः सन्तः कृतकृत्याः सम्बभूवुः। पञ्चाचार्यैः प्रदत्तं लिङ्गं सम्प्रत्यपि देवविग्रहेषु उत्तमाङ्गे धार्यमाणं प्रत्यक्ष-मवलोक्यते॥४५-१०४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।वीरसिंहासने देवानामुपदेशः।।

आचार्यपञ्चकैरेवं दीक्षिताः सर्वदेवताः।
मिलित्वा ह्येकदा सर्वे मलयाद्रिमुपागताः।।१०५।।

मन्दारचन्दनैस्तत्र तरुमण्डलमण्डिते।
भद्रातीरे सुरम्ये च वीरसिंहासने स्थितम्।।१०६।।

सद्योजातमुखोद्भूतं हरित्कन्थाविभूषितम्।
धृताश्वत्थसुदण्डं च पूर्वाशायाः पतिं तथा।।१०७।।

वीरगोत्राधिनाथं च नकारप्रणवाधिपम्।
भूमितत्त्वाधिनाथं च प्रसादमन्त्रजापकम्।।१०८।।

कमण्डलुं हरिद्वर्णं दधानमभयप्रदम्।
ऋग्वेदपाठकं वीरं वीरसिंहासनाधिपम्।।१०९।।

एकाक्षरशिवाचार्यं दृष्ट्वा तुष्टा हि देवताः।
प्रणिपत्य तदा सर्वे प्रार्थयामासुरीदृशम्।।११०।।

दीक्षिता हि वयं सर्वे वीरशैवमते परे।
भवान् मा वीरपीठेशो वीरशब्दं प्रबोधय।।१११।।

जिज्ञासां सर्वदेवानां श्रुत्वा ह्येकाक्षरो गुरुः।
बभाषे शान्तया वाचा प्रसन्नवदनस्तदा।।११२।।

वीरशब्दस्य तत्त्वार्थःशिवेन परमात्मना।
आगमेषु विशेषेषु विस्तरेण विवेचितः।।११३।।

स एव सारतो ह्यत्र मयापि कथ्यतेऽधुना।
भो देवाः सावधानेन श्रृणुत ह्यात्मशान्तये।।११४।।

वीरास्तु बहवःसन्ति धनेन च बलेन च।
दुर्लभा हि जगत्यस्मिन् भक्त्या वीराः समन्ततः।।११५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अत्रोक्तं यद्धि वीरत्वं भक्तेरुत्कर्षकारणम्।
तादृशो हि महाभक्तो वीर इत्यभिधीयते।।११६।।

वियोगे चेष्टलिङ्गस्य व्रते चैव परिच्युतौ।
तृणवत् प्राणसन्त्यागो वीरव्रतमिहोच्यते।।११७।।

अत एव हि भो देवा दीक्षायां प्राप्तलिङ्गकम्।
उत्तमाङ्गे सदाकालं धारयन्त्ववधानतः।।११८।।

एककालं द्विकालं वा त्रिकालं वा यथेप्सितम्।
पूजयन्त्विष्टलिङ्गन्तु ह्युपचारैर्दिने दिने।।११९।।

इष्टलिङ्गस्य पूजायां श्रेष्ठं तत् करपीठकम्।
बाह्यपीठार्चनं वर्ज्यं सदाकालं हि भो बुधाः।।१२०।।

शिरोव्रतमिदं प्रोक्तं व्रतानामुत्तमोत्तमम्।
पालयन्ति च ये भक्त्या वीरास्ते प्राणयोगतः।।१२१।।

वीरशब्दस्य चान्यार्थो सामाजिकमिहोच्यते।
विरोधरहितो योऽसौ वीर इत्यभिधीयते।।१२२।।

निर्वैरःसर्वभूतेषु रागद्वेषाद्विमुच्यते।
रागद्वेषाद्विमुक्तश्चेन्मुक्तिमाप्नोति शाश्वतीम्।।१२३।।

वीरशब्दस्य तत्त्वार्थो विद्यायां रमणार्थकः।
विद्यायां रमते यस्तु वीर इत्यभिधीयते।।१२४।।

यस्याङ्गे हि सदा लिङ्गं निर्वैरो यो हि जन्तुषु।
विद्यायां रमते यस्तु विज्ञेयो वीर एव सः।।१२५।।

एकाक्षरशिवाचार्यो ब्रह्मादीन् देवतागणान्।
सम्यक् सम्बोध्य वीरार्थं सर्वान् तान् व्यसृजत्खलु।।१२६।।

वीरशैवधर्मदर्शनप्रबोधकेषु पञ्चाचार्येषु प्रत्येकम् शिवाचार्यात् एकैकस्मिन् पीठे दीक्षितास्ते ते देवाः संघीभूय मलयाद्रिं सम्प्राप्य सद्योजातमुखोद्भूतं वीरसिंहासने स्थितं वीरगोत्राधिनाथम् एकाक्षरशिवाचार्यमुपगम्य वीरशब्दार्थं प्रपच्छुः। वीरव्रतधारिणो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भक्तिमन्तः शिरोव्रतमनुतिष्ठन्तः विरोधहिताः सन्तो निर्वैराः शिवब्रह्मविद्यायां रमैवसाधकास्तेवीरा इत्युच्यन्ते। इत्येवमुत्तरं श्रीशिवाचार्यमुखात् श्रुत्वा सन्तुष्टा बभूवुः। एकाक्षराद् सद्गुरोः शिवाचार्याद् वीरशैवधर्मदर्शनसम्प्रदायस्य वीरशब्दाभिप्रायं सम्यग् अवबुध्य ब्रह्मादयो देवाः आचार्यानुज्ञया मलयाद्रितः प्रस्थाय व्योममार्गेण महाकालपुरीम् उज्जयिनीं नाम नगरीं प्रतिजग्मुः॥१०५-१२६॥

## ।।उज्जयिन्यां देवानामुपदेशः।।

ततो ब्रह्मादिदेवा वै प्रणिपत्य महागुरुम्।
उत्थाय व्योममार्गेण महाकालपुरीं गताः।।१२७।।

तत्र शिप्रानदी मध्ये स्नात्वा च कालकालकम्।
भक्त्या सम्पूज्य सर्वे ते वटक्षेत्रं समागताः।।१२८।।

शिप्रातीरे वटक्षेत्रे सिद्धेशस्य हि सन्निधौ।
धर्मपीठे समासीनं द्व्यक्षरं परमं गुरुम्।।१२९।।

वामदेवमुखोद्भूतं रक्तकन्थाधृतं विभुम्।
दक्षिणाशापतिं देवं नन्दिगोत्राधिनायकम्।।१३०।।

जलतत्त्वाधिपं चैव पलाशदण्डधारिणम्।
धृतं कमण्डलुं ताम्रं यजुर्वेदस्य बोधकम्।।१३१।।

सद्धर्माधिपतिं शान्तं मायामन्त्रस्य जापकम्
महाकायं महाचार्यं दृष्ट्वा ते सर्वदेवताः।।१३२।।

प्रणिपत्य तदा सर्वे प्राञ्जलिविनयान्विताः।
धर्मतत्त्वप्रबोधाय प्रार्थयामासुरीदृशम्।।१३३।।

भो गुरो धर्मपीठेश वयं सद्धर्मदीक्षिताः।
निगूढं धर्ममाहात्म्यं निबोधय महाप्रभो।।१३४।।

निशम्य प्रार्थनां तेषां द्व्यक्षरो हि महागुरुः।
सुष्ठु पृष्टं हि भो देवा शृण्वन्तु धर्ममार्गकम्।।१३५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिवेन विहितो धर्मो दशधा ह्यागमेषु च।
तमाचरन्महाभक्त्या प्रसादमधिगच्छति॥१३६॥

अधर्मं नाचरेत् किञ्चित् सदा धर्मं समाचरेत्।
तं च कामविनिर्मुक्तं बोधपूर्वकमन्वहम्॥१३७॥

धर्म एव समस्तानां भोगमोक्षैककारणम्।
न हेयो धर्ममार्गस्तु बुद्धिमद्भिः कदाचन॥१३८॥

धर्मेण साध्यते ह्यर्थः कामस्य साधकोऽपि सः।
मोक्षप्राप्तिस्तु तेनैव धर्मस्सर्वार्थसाधकः॥१३९॥

अकामश्च सकामश्च धर्मस्तु द्विविधः स्मृतः।
सुखमामुष्मिकं लभ्यं सकामेनैव निश्चितम्॥१४०॥

जीवस्तु क्षीणपुण्यःसन् पुनर्मर्त्यं विशत्यसौ।
पतनाद् भीतिमानेषः स्वर्गस्थोऽपि सुखी कुतः॥१४१॥

सकामः पुरुषो लोके क्लिश्यते क्लेशपञ्चकैः।
तत्रत्यौ द्वेषरागौ तु तस्य संसारकारणौ॥१४२॥

कर्मणां च विपाकेन पुनर्वासनया तथा।
देवतिर्यङ्मनुष्यादिजातिभेदे व्यवस्थितः॥१४३॥

कर्ममार्गरतेनाथो जात्यायुर्भोगभोगिना।
स्वर्गे वा यदि वा भूमौ कुत्र विश्रान्तिराप्यते॥१४४।

मोहाख्ये हि कटाहेऽस्मिन् सूर्यचन्द्राग्निना खलु।
रात्रिदिवेन्धनेनैव कालो जीवान् पचत्यसौ॥१४५॥

अकामो धर्मकृत् प्राज्ञः कर्तव्यं कुरुते सुधीः।
शुद्धान्तःकरणो भूत्वा मुमुक्षुः स जयत्यसौ॥१४६॥

निष्कामेन कृते धर्मे मनःशुद्धिःसुनिश्चिता।
तस्यां शुद्धौ भवेज्ज्ञानं ज्ञानान्मोक्षोऽभिजायते॥१४७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ज्ञानेन तृप्तिमापन्नो ज्ञानी धर्मं न संत्यजेत्।
धर्माचारं परं दृष्ट्वा प्रवर्तन्ते हि लौकिकाः।।१४८।।

आचार एव जीवानामलङ्काराय कल्प्यते।
तद्धीनः पुरुषो लोके सदा भवति निन्दितः।।१४९।।

आचारः परमो धर्मो ह्याचारःपरमं धनम्।
ज्ञानमाचारहीनं चेन्न तद्भवति सिद्धये।।१५०।।

लोकान् सर्वान् समुद्धर्तुमादिदेवः शिवः किल।
आगमे बोधयामास पञ्चाचारान् फलप्रदान्।।१५१।।

लिङ्गाचारः सदाचारः शिवाचारस्तृतीयकः।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः।।१५२।।

गुरुणा दत्तलिङ्गाद्वै भिन्नो देवो न भूतले।
इति भावानुसन्धानं लिङ्गाचारः स उच्यते।।१५३।।

धर्मार्जितेन सन्तृप्तिः द्रव्येण क्रियतेऽन्वहम्।
गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः।।१५४।।

शिव एव परं ब्रह्म पञ्चकृत्यपरायणः।
गतिर्नास्ति ततस्त्वन्या शिवाचारो हि कीर्तितः।।१५५।।

शिवभक्तजनाः सर्वे श्रेष्ठा ये पृथिवीतले।
तेषां भृत्योऽहमित्येतद् भृत्याचार इति स्मृतः।।१५६।।

शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च।
श्रृणोति नो यतो निन्दां गणाचारस्ततो मतः।।१५७।।

एतान् पञ्चविधान् दिव्यान् ह्याचारान् शिवबोधितान्।
श्रद्धया ह्याचरन् योगी जीवन्मुक्तो भविष्यति।।१५८।।

एष एव हि भो देवाः परो धर्मः प्रकीर्तितः।
आचरन्तः शुभान्धर्मान् परं श्रेयो ह्यवाप्स्यथ।।१५९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**उपदेशं महाचार्यात् सम्प्राप्ताः सर्वदेवताः।**
**रहस्यं धर्मतत्त्वस्य ज्ञात्वा संतोषमाप्नुवन्।।१६०।।**

**एवं सम्बोध्य चाचार्यो द्व्यक्षरो हि महागुरुः।**
**श्रद्धया परयोपेतान् सर्वान् तान् व्यसृजत् किल।।१६१।।**

उज्जयिनीमवाप्य ब्रह्मादयो देवाः कृतशिप्रापुण्यसलिलावगाहाः वटक्षेत्रे सिद्धेशसन्निधौ सद्धर्मपीठासीनं श्रीवामदेवमुखोद्भूतं नन्दिगोत्राधिनाथं जलतत्त्वाधीशं यजुर्वेदबोधसमुद्दीप्तं श्रीद्व्यक्षरशिवाचार्यं समुपगम्य धर्मतत्त्वप्रबोधाय प्रार्थयामासुः। धर्म एव कामस्य, अर्थस्य मोक्षस्य च साधकः परमः सुहृद् विद्यते। इत्येवं प्रबोधयन् सद्गुरुः श्रीमान् द्व्यक्षरशिवाचार्यः अकामः सकामश्चेति धर्मस्य प्रभेदद्वयं प्रतिपादयन् सकामस्य जीवस्य धर्मफलं स्वर्गादिकं, क्लेशमये संसारे आवर्ताद् आवर्तान्तरं पततस्तस्य मोहमये कटाहे कालेन पच्यमानता चेति प्रतिपादितम्। अकामस्य जीवस्य तु धर्मानुष्ठानेन मनसः अन्तःकरणस्य विशुद्धिः, सद्गुरोः शिवाचार्याद् ज्ञानप्राप्तिः, शिवस्य प्रभोः शास्त्रेषु प्रतिपादितं यत्स्वरूपं तज्ज्ञानमुञ्चोदेति- अथ शिवाभेदमयस्य मोक्षस्य परमपुरुषार्थस्य सम्प्राप्त्या कृतकृत्यतावाप्तिः भवतीति प्रतिपादयामास। ज्ञानमवाप्य वीरशैवः धर्मं न त्यजेत्। धर्माचारं विना ज्ञानम् आगमेषु निन्द्यते। भगवान् शिवः फलप्रदान् पञ्च आचारान् आगमेषु ग्राहयति। ते च पञ्चाचारः प्रथन्ते— **१. लिङ्गाचारः २. सदाचारः ३. शिवाचारः, ४. भृत्याचारः अथ च ५. गणाचाराः।**

शिवाचार्यगुरोः दीक्षापुरःसरं प्राप्तं यद् इष्टलिङ्गम् तस्य भावानुसन्धानं **लिङ्गाचारः** इत्यभिधीयते। धर्मार्जितद्रव्येण गुरोः लिङ्गस्य जङ्गमस्य च विधीयमाना सन्तृप्तिः **सदाचारः** इत्याख्यायते। ब्रह्मशब्देनापि संकीर्त्यमानः भगवान् शिवः पञ्चकृत्यपरायणः सर्वेषां जीवानां शास्त्रसम्मतं भोगं मोक्षं च विदधाति न तदन्यः काचन गतिरिति मननं **शिवाचार** इत्युच्यते। ये केचन शिवभक्ताः श्रेष्ठाः प्रेष्ठाश्च तान् प्रति या भावना— शिवभक्तानामहं भृत्योऽस्मि—इत्येवमात्मा सा **भृत्याचार** इत्याख्यायते।

शिवः, शिवभक्तः, शिवधर्मः, तदुपजीव्यं यत् कृत्यं तस्यैतस्य समस्तस्य निन्दां श्रोतुमपि यः सर्वथा असहनस्तिष्ठति सोऽयं तदीयः **गणाचारः**।

श्रीगुरुं, शास्त्रं, पञ्चविधम् आचारं च स्वप्रयत्नजागृत्या श्रद्दधानः शिवभक्तः प्रेयः, परमं श्रेयश्चावाप्य जीवन्मुक्तः समनुमोदते। तदेवं द्व्यक्षरशिवाचार्यगुरोः धर्माचारमाहात्म्यम् अवबुध्य ब्रह्मादयो देवाः कृतार्थतामन्वभूवन्। अथ शिवाचार्यानुज्ञया व्योममार्गेण हिमाद्रौ वैराग्यपीठं प्रति प्रतस्थिरे ब्रह्मादयो देवाः।।१२७-१६१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।वैराग्यपीठे देवानामुपदेशः।।

ततो देवा हि ते सर्वे प्रणम्य श्रीगुरुं मुहुः।
उत्थाय व्योममार्गेण हिमाद्रिं समुपागताः।।१६२।।

उत्तुंगशिखरे रम्ये क्षेत्रे केदारसंज्ञके।
वैराग्यधर्मपीठे वै राजमानं महागुरुम्।।१६३।।

अघोरमुखसञ्जातं नीलकन्थाधरं प्रभुम्।
वेणुदण्डधरं चैव पश्चिमाधिपतिं तथा।।१६४।।

भृङ्गिगोत्राधिनाथं च शिकारप्रणवार्चितम्।
लौहं कमण्डलुं हस्ते दधानं लिङ्गधारिणम्।।१६५।।

तेजोमयं त्रिकालज्ञमग्निभूताधिपं तथा।
बोधकं सामवेदस्य सूक्ष्ममन्त्रस्य जापकम्।।१६६।।

प्रसन्नवदनं शान्तं सर्वसिद्धिप्रदं प्रभुम्।
वैराग्यधर्मपीठेशं दृष्ट्वा त्र्यक्षरनामकम्।।१६७।।

कृत्वा दण्डप्रणामं तु ब्रह्माद्या देवतास्तदा।
त्र्यक्षरं प्रार्थयामासुः प्राञ्जलि व्याप्तकीर्तयः।।१६८।।

वैराग्यस्य महामेरुर्भवानेको हि भूतले।
अतोऽस्मान् सम्प्रबोध्यैव कृतार्थयितुमर्हति।।१६९।।

विनयावनतैर्देवैरुक्तं श्रुत्वा महागुरुः।
तदा बभाषे तानेव श्रृण्वन्तु मम देवताः।।१७०।।

वैराग्यस्य महामार्गः सुलभो नैव देहिनाम्।
अमृतत्त्वं न चैवाप्यं वैराग्येण विना क्वचित्।।१७१।।

कर्मणा प्रजया चैव पुष्कलेन धनेन वा।
अमृतत्त्वं न कस्यापि सुलभं कुत्रचिद् भवेत्।।१७२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



'त्यागेनैकेति' श्रुत्या वै बोधितं विस्तरेण च।
अतोऽमृतत्वलाभाय त्यागमेकं समाश्रयेत्।।१७३।।

त्याग एको गुणःश्लाघ्यः पश्यतां जगतीतले।
त्यागादेव हि पूज्यन्ते पशवःपादपाः किल।।१७४।।

ऐहिकामुष्मिकाणान्तु फलानां भोगवासना।
बध्नाति सर्वजीवान् सा मोचकोऽत्र सुदुर्लभः।।१७५।।

सुखं हि क्षणिकं दत्वा रागो बध्नाति मानसम्।
रागबद्धमनस्कस्तु विषयाब्धौ निमज्जति।।१७६।।

वासना खलु जीवानां विचित्रा हि विशृङ्खला।
बद्धाःसदैव धावन्ति मुक्तास्तिष्ठन्ति निश्चलाः।।१७७।।

आशापाशशतैर्बद्धा भविनो भवचक्रके।
भ्रमन्त्यहर्निशं सर्वे विश्रान्तिकथया विना।।१७८।।

'तेन त्यक्तेन' वाचा तु त्याग एव प्रशंसितः।
त्यागेन सद्गुणेनैव ह्याप्तकामो भविष्यति।।१७९।।

देवाःखलु भवन्तो हि भोगलालसमानसाः।
भोगेन को नु वा तृप्तो भोगो रागप्रवर्धकः।।१८०।।

भोगेन जायते रागो रागो बीजं भवस्य च।
रागेण जायते क्रोधः क्रोधान्मोहःप्रजायते।।१८१।।

सम्मोहात्स्मृतिविभ्रंशस्ततो बुद्धिर्विनश्यति।
एवं विषयरागेण सर्वनाशो भविष्यति।।१८२।।

शब्दादिविषयान् सर्वान् भक्षयन्तीन्द्रियाणि हि।
आहाराः खलु तेषां ते प्रवृत्तिस्तु स्वभावजा।।१८३।।

इन्द्रियाणां गणाध्यक्षो मन इत्यभिधीयते।
तदेव हि परं भोक्ता भोगं भुक्त्वा न तृप्यति।।१८४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पूर्येत वस्तुभिः कैश्चिद् महाकाशमहोदरम्।
हुताशनोऽपि तृप्येत दग्ध्वा सर्वं कदाचन।।१८५।।

विषयाणां तु भोगेन कल्पकोटिशतैरपि।
मनो न तृप्तिमायाति क्षणिके सा कुतो भवेत्।।१८६।।

आज्येन समिधा चैव हूयमानो हुताशनः।
नैव शाम्यति तद्वद्धि भोगेन कस्यचिन्मनः।।१८७।।

विषया विनिवर्तन्ते विरक्तस्यैव योगिनः।
तस्मान्मनो-निवृत्त्यर्थं वैराग्यं परमाश्रयेत्।।१८८।।

एवं वैराग्यपीठे वै त्र्यक्षराख्यान्महागुरोः।
श्रुत्वा महोपदेशं तु परां शान्तिं समाप्नुवन्।।१८९।।

तुष्टान् देवान् हि तान् दृष्ट्वा त्र्यक्षरः सन् गुरुर्महान्।
श्रीशैलशिखरं गन्तुं प्रेम्णा देवान् समादिशत्।।१९०।।

हिमाद्रौ केदारसंज्ञके उत्तुङ्गशिखरे वैराग्यपीठाधीश्वरं अघोरवक्त्रसम्भूतं पश्चिमदिशाधिपतिं सामवेदविशेषज्ञं त्र्यक्षरनामविभूषितं ब्रह्मादयः वैराग्यस्वरूपप्रबोधनाय समुपगम्य प्रार्थितवन्तः। अथ विनीतान् ब्रह्मादीन् वैराग्य-पीठाधीश्वर; त्र्यक्षरशिवाचार्यः प्राह— वैराग्यमतिदुर्लभं वस्तु। तेन विना अमृतत्वं नैव सुलभम्। "त्यागेनैकेन अमृत्वमानशुरि"ति श्रुत्या सुस्पष्टं त्यागात्मकवैराग्यस्यैव अमृतत्वावाप्तौ साधनत्वं प्रतिपाद्यते। लोकेऽपि त्यागास्य माहात्म्यं द्रष्टुं सुलभम्। ये पशवः गोप्रभृतयः ये वा वृक्षा आम्रादयस् ते दुग्धादिकं वा फलादिकं वा उत्पाद्यापि मानवादीनां कृते समर्पयन्ति न स्वयं भुञ्जते-तदेतत् त्यागस्य माहात्म्यं येन पूज्यता पशूनां वृक्षादीनां च सुस्पष्टं प्रथते। ऐहिकानाम् आमुष्मिकाणांच कर्मफलानां भोगार्थम् अभिलाष एव रागात्मा, मानवान् संसारबन्धे सततम् उपनिपातयति।यदि अकामः सन् कर्मफलत्यागम् आत्मसात् कुरुते जनः तदा बन्धाद् उत्तीर्णो भवति। रोगप्रवर्धकं भोगम् अभिलषन्तो देवाः तत्र रज्यन्तः भविनो भवन्ति। रागस्य प्रयोज्यः क्रोधः, क्रोधाद् मोहः, मोहात् स्मृतिविभ्रमः, तस्माच्च बुद्धिनाशः तस्मात् तु महान् अनर्थः इत्येवं बुद्धिनाशात् प्रणश्यति जनः। तदेवं त्यागविमुखस्य भोगोन्मुखस्य विषयान् शब्दादीन् प्रति यो रागः स एव मानवस्य प्रणाशे हेतुः। यस्तु कर्मफलभोगाभिलाषं विना भोगत्यागः, एतदेव किल वैराग्यमुच्यते। अस्ति हि वैराग्यात्मनः त्यागस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अमृतत्वप्राप्तौ हेतुतेति निष्कर्षः। श्रोत्रादीनि इन्द्रियाणि शब्दादीन् भुञ्जते। इन्द्रियगणाध्यक्षभूतं मनः सर्वं भोग्यं भोगं भोगं मुहुर्मुहुर्नैव तृप्यति। कदाचिद् वस्तुभिः महाकाशमहोदरमपि पूर्तिमियात्। हुताशनः सर्वं जगदिन्धनं दग्ध्वा शाम्येत् किन्तु सदा विषयान् कल्पोटिशतैरपि भुञ्जतो जनस्य मनस्तु नैव तृप्येदिति निश्चित्य शमो दमश्चास्थेयः। शमदमाभ्यां वैराग्यं गृहीत्वा यः किल विरक्तः वीरशैवः साधको महायोगी स एव शिवाचार्याद् शैवशास्त्रप्रतिपाद्यं शिवस्वरूपं रमभिजानन् मुक्तिं जीवन्मुक्तिं च लभमानो, धर्माचरणं विदधानः, जगति आनन्दप्रसरणविधया विचरन् सर्वान् उपकुर्वाणो जयशीलो भाति। तदेवं वैराग्यस्य स्वरूपं, माहात्म्यम्, उपादेयत्वं समाश्रयणीयत्वं लोकानामप्युपकारित्वं जीवन्मुक्तिपर्यन्तपुरुषार्थ-प्रदायित्वं च श्रीत्र्यक्षर-शिवाचार्याद् अवबुध्य कृतार्थाः ब्रह्मादयो देवाः सद्गुरोरनुज्ञामवाप्य व्योममार्गेण श्रीगिरिशैलपीठं प्रति प्रस्थानं कृतवन्तः॥१६२-१९०॥

## ॥श्रीशैलपीठे देवानामुपदेशः॥

ततो ब्रह्मादयो देवाः प्रणम्य श्रीगुरुं तदा।
उत्थाय व्योममार्गेण सम्प्रापुः श्रीगिरिं शुभम्॥१९१॥

सूर्यसिंहासने तत्र ह्युपविष्टं महागुरुम्।
तत्पुरुषमुखोद्भूतं श्वेतकन्थाधरं प्रभुम्॥१९२॥

न्यग्रोधहस्तं वाकारप्रणवेन प्रपूजितम्।
उदीच्याधिपतिं देवं वायुतत्त्वाधिनायकम्॥१९३॥

अथर्वसद्गुरुं चैव स्थूलमन्त्रस्य जापकम्।
कांस्यं कमण्डलुं चैव दधानं शान्तरूपिणम्॥१९४॥

पतिं वृषभगोत्रस्य रविदीप्तिसमद्युतिम्।
समदृष्टिं गुरुं दृष्ट्वा चतुरक्षरनामकम्॥१९५॥

प्रणिपत्य सुराः सर्वे प्रार्थयामासुरीदृशम्।
समदृष्टिं विधायैव समुद्धर जगद्गुरो॥१९६॥

प्रार्थनां देवतानां स श्रावं श्रावं महागुरुः।
ध्यात्वा क्षणं महादेवमाह तान् सुसमाहितः॥१९७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विषम एष संसार ईश्वरेण विनिर्मितः।
विषमे कारणं तावत् प्राणिनां कर्म केवलम्।।१९८।।

अथापि ह्यात्मरूपेण विषमेष्वपि राजते
समोऽसौ सच्चिदानन्दो मालासु सूत्रवद्यथा।।१९९।।

बाह्यदृष्टिं परित्यज्य समे सक्तो हि यो भवेत्।
स एव समदृष्टिः स्यात् तां विना मुच्यते नहि।।२००।।

जीवं बध्नाति दृष्टिर्हि दृष्टिरेव विमोचयेत्।
विषमा बन्धहेतुः स्यात् समा मुक्तेस्तु साधनम्।।२०१।।

स्वदृष्टेर्विषमत्वात्तु प्राण्येष समलोचनः।
कालादनादितो नूनं नित्यबद्ध उदाहृतः।।२०२।।

लोचनयोः समत्वेऽपि दृष्टेर्विषमकारणात्।
रागद्वेषौ सदा कुर्वन् संसारी सम्-प्रकीर्त्यते।।२०३।।

विषमत्वं हि भो देवा संसारस्य विभूषणम्।
संसारस्य समत्वे तु व्यवहारः सुदुष्करः।।२०४।।

प्रतिद्वन्द्वित्वभावेन सर्वक्षेत्रेषु सर्वदा।
विघ्नः प्रजायते नित्यं सौहार्दं प्रविनश्यति।।२०५।।

अस्तु भो व्यवहारेषु विषमत्वं यथेप्सितम्।
गुर्वी हानिर्नवै तेन जीवानां क्वापि जीवने।।२०६।।

रागद्वेषविनिर्मुक्तो द्वन्द्वातीतो विमत्सरः।
हर्षामर्षसमः कोऽपि समदृष्टिर्विशिष्यते।।२०७।।

समः शत्रौ च मित्रे च लाभेऽलाभे तथा समः।
शीतोष्णसुखदुःखेषु समदृष्टिर्विशिष्यते।।२०८।।

निन्दायां संस्तुतौ वापि तथा मानापमानयोः।
नोद्विजन् वर्तमानो हि समदृष्टिर्विशिष्यते।।२०९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



यादृशी वर्तते दृष्टिः सृष्टिर्भवति तादृशी।
दृष्टिं शिवमयीं कृत्वा पश्येद्विश्वं शिवात्मकम्।।२१०।।

दिवान्धाः केचिदुच्यन्ते रात्रान्धा ह्यपरे किल।
समदृष्टिविहीनो यः सर्वथा अन्ध एव सः।।२११।।

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि।
यः पश्यति महायोगी स एव दृष्टिमान् मतः।।२१२।।

ब्रह्माण्डे विद्यमानेषु चेतनाचेतनेषु च।
यः पश्यति समं योगी समदृष्टिः स उच्यते।।२१३।।

समदृष्टिस्तु भो देवास् तृतीयं नेत्रमुच्यते।
तेनैव हि महादेवः शिव इत्यभिधीयते।।२१४।।

विश्वं शिवात्मकं जानन् स्वात्मानं शिवमेव च।
शिवादन्यन्न चास्तीति यो बुध्येच्छिव एव सः।।२१५।।

श्रीगिरौ सूर्यपीठे च चतुरक्षरसद्गुरुः।
देवान् सर्वान् प्रबोध्यैवं व्यसृजद्गौरवेण तान्।।२१६।।

ब्रह्मादयो देवाः प्रह्वीभावमागताः श्रीगिरिमध्ये तत्पुरुषमुखोद्भूतं वाकारप्रणवार्चितम् उदीच्यधिपतिं सूर्यसिंहासनाधिष्ठितं श्रीचतुरक्ष-शिवाचार्यम् अथर्ववेदविशेषज्ञं वायुतत्त्वाधिनायकं प्रार्थयामासुः— "अस्मान् विनीतान् समदृष्टीन् विधेहीति।"

प्रार्थितः श्रीचतुरक्षरशिवाचार्यः कृपालुस्तान् अनुगृह्णन् प्राह— ईश्वरेण निर्मितः संसारो विषमस्तत्र च हेतुः प्राणिनामेव कर्म, नान्यत्। सांसारिक-वस्तुस्वरूपपुष्पाणां विषमाणां ग्रथनाद् या माला सा एकस्मिन्नेव सूत्रे सच्चिदानन्दात्मनि समे समवलम्बते। भवन्तः बाह्य-सांसारिकवस्तुषु आस्थां विहाय सूत्रात्मनि सच्चिदानन्दे विषमाक्षे सत्यपि समदृष्टौ तस्मिन्नेव आस्थाविश्वासवन्तः सन्तः समां दृष्टिं प्राप्तुं समर्थाः सन्तः कृतार्था भवेयुः। विरूपाक्षः त्रिनेत्रः भगवान् समदृष्टिर्यतस्ततः नित्यमुक्तः अथ समाक्षोऽपि द्विनेत्रः प्राणी बद्धः संसारी क्लिश्यते। तत्र हेतुः जीवस्य विषमदृष्टिरेव। संसारस्य व्यवहार्यत्वे विषमता भूषणम्, विषमेऽपि संसारे जीवस्य तादृशी काचन हानिर्नास्त्येव। रागद्वेषादि-द्वन्द्वोत्तीर्णः सुख-दुःखयोः यः साधकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिवाचार्योपदेशमनुसरन् समतां समदृष्टिं वा समाकलयति स नूनं जीवन्नेव संसारबन्धाद् मुक्तो महीयते। अन्यथा कश्चिद् दिवान्धःदेवाः प्राणी कश्चिद् रात्राबन्धः, वस्तुतस्तु सर्वोपि समदृष्टेरुदयात् प्राक् सर्वथा अन्ध एवास्ति। यः सर्वभूतेष्वात्मानं पश्यति अथात्मनि सर्वभूतानि पश्यति स योगी समदृष्टिः सन् विशिष्यते। सेयं समदृष्टिरेव वस्तुतः भगवतः शिवस्य तृतीयं नेत्रमित्यभिधीयते। समदृष्टिमवाप्यैव साधकः विश्वं शिवात्मकं, स्वात्मानं शिवं च जानानः शिवादन्यत् किञ्चन नैवास्तीति विजानन् शिव एव भवतीति उपदेशं गृहीत्वा सर्वे देवाः गुरोरनुज्ञया श्रीशैल-शिखरात् श्रीकाशीनगरीं प्रति प्रस्थिता बभूवुः।।१९१-२१६।।

## ।।काशीपीठे देवानामुपदेशः।।

**श्रीशैलशिखरं दृष्ट्वा सम्पूताः सर्वदेवताः।**
**उत्थाय व्योममार्गेण प्रापुः काशीं प्रकाशिनीम्।।२१७।।**

**काशी काशी महाकाशी काशी सर्वप्रकाशिका।**
**पापस्य मोचिनी काशी महाज्ञानविवर्धिनी।।२१८।।**

**विष्णुनाथपुरी काशी मुक्तिभूमिस्तपःथली।**
**आनन्दकाननं काशी ह्यविमुक्तं हि शम्भुना।।२१९।।**

**रुद्रावासो महाकाशी श्मशानमिति कथ्यते।**
**वाराणसीति पर्यायो यस्याः सा भुवि विश्रुता।।२२०।।**

**क्षेत्राणां तद् महाक्षेत्रं तीर्थेषु सुप्रशंसितम्।**
**त्रैलोक्यवन्दिता काशी त्रिशूले स्थापिता जयेत्।।२२१।।**

**गङ्गायाःपश्चिमे तीरे पुण्यक्षेत्रं समुल्लसेत्।**
**उत्तराभिमुखी यत्र जह्नुकन्या प्रधावति।।२२२।।**

**एतादृशं शुभं वास्तु त्रिषु लोकेषु नास्ति वै।**
**ज्ञानवृद्धिकरं तद्धि निसर्गेण विनिर्मितम्।।२२३।।**

**काशी भुवोऽस्ति कैलासो देवानामपि दुर्लभा।**
**यत्र शम्भुर्महादेवस्त्यक्त्वा कैलासमागतः।।२२४।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मरणं मङ्गलं यत्र विभूतिश्च विभूषणम्।
कौपीनं यत्र कौशेयं भात्येषा काशिकापुरी।।२२५।।

एवं काशीं प्रशंसन्तो ब्रह्माद्याः सर्वदेवताः।
आजग्मुराश्रमं बैल्वमानन्दाख्ये वने स्थितम्।।२२६।।

आनन्दकानने रम्ये बिल्ववृक्षैःसमावृते।
ज्ञानसिंहासने तत्र ह्युपविष्टं महागुरुम्।।२२७।।

शिवेशानमुखोद्भूतं पीतकन्थाधरं विभुम्।
बिल्वदण्डधरं चैव यकारप्रणवार्चितम्।।२२८।।

आकाशाधिपतिं चैव ह्यूर्ध्वकाष्ठाधिपं तथा।
स्कन्दगोत्राधिनाथं च ह्यजपावेदपाठकम्।।२२९।।

कमण्डलुं च सौवर्णं दधानं मूलजापकम्।
गुरुं पञ्चाक्षरं दृष्ट्वा प्रहर्षुःसर्वदेवताः।।२३०।।

कृत्वा दण्डप्रणामं च प्राञ्जलिश्रीसुमण्डिताः।
ब्रह्माद्यादेवता भूयः प्रार्थयन्तोऽब्रुवन्मुदा।।२३१।।

भो कल्याणमहाभाग! शिवज्ञानमहोदधे।
आचार्यवर्य सम्प्राप्तान् रक्ष नो भवरोगिणः।।२३२।।

ज्ञानस्य हि महामेरुर्ज्ञानसिंहासनप्रभो।
केनोपायेन जीवानां मुक्तिः स्यादनपायिनी।।२३३।।

धृतश्रीभूतिरुद्राक्षान् दृष्ट्वा तान् लिङ्गधारिणः।
गुरुःपञ्चाक्षरःप्राह श्रृण्वन्तु खलु देवताः।।२३४।।

न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
ज्ञानेन प्राप्यते मुक्तिः ज्ञानं मुक्तेस्तु साधनम्।।२३५।।

शिवाद्वैतपरं ज्ञानं वेदसिद्धान्तसम्मतम्।
बोधयिष्यामि भो देवाः श्रृणुतैतत् समाहिताः।।२३६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वेदानामन्तिमो भागो वेदान्तः कथ्यते यथा।
तथैव ह्यागमानां तु सिद्धान्तः कथितो बुधैः।।२३७।।

राराजते तयोर्मध्ये मतैक्यं तु सनातनम्।
अतो भेदो न कर्तव्य एतयोस्तु कदाचन।।२३८।।

एक एव शिवः साक्षाच्चिदानन्दमयो विभुः।
भूतले जीवभूताःस्मस् तदंशा भूतले वयम्।।२३९।।

समुद्रस्य यथा बिन्दुः समुद्रान्नातिरिच्यते।
शिवांशोऽपि तथा जीवः शिवादन्यो न विद्यते।।२४०।।

अनाद्यविद्यासंबन्धाद् भेदोऽयं परिकल्पितः।
तदविद्यानिवृत्त्यर्थं योगज्ञाने च साधने।।२४१।।

भो! भो! देवा महाभागा! योगानां योग उत्तमः।
शिवयोगो हि तन्नूनं भुक्तिमुक्तिफलप्रदः।।२४२।।

शिवेन सह योगो यः शिवयोगः स एव हि।
योगेनानेन जीवो हि शिवसायुज्यमाप्यते।।२४३।।

भ्रमन्ति तं विना जीवा भवचक्रे सदा खलु।
स्वस्वकर्मानुसारेण नानायोनिषु यन्त्रिताः।।२४४।।

एतस्माद्योनिचक्रात्तु शिवयोगो हि तारकः।
तस्माद्देवाः प्रयत्नेन योगं कुर्वन्तु सर्वदा।।२४५।।

शरीरशुद्धिर्योगेन मनःशुद्धिस्तथैव च।
आरोग्यं प्राप्यते तेन योगः सर्वार्थसाधकः।।२४६।।

सर्वभोगप्रदो योगो योगःसायुज्यदायकः।
भवरोगकुठारः स शिवयोगस्तु कीर्तितः।।२४७।।

योगकाले करे वामे स्वेष्टलिङ्गं निधाय च।
पूजयेदुपचारेण भक्तिमान् लिङ्गतत्परः।।२४८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पूजाकाले त्विष्टलिङ्गं बाह्यपीठे न धारयेत्।
करपीठे कृतापूजा उत्तमा परिकीर्तिता।।२४९।।

वामहस्ततले स्थाप्य पूजयन्त्विष्टलिङ्गकम्।
पवित्रं सर्वपापघ्नं भवत्प्राणसमन्वितम्।।२५०।।

पूतात्मानो हि भो देवाः प्राणवद्धारयन्त्विदम्।
साधनं शिवयोगस्य प्रमुखं हीष्टलिङ्गकम्।।२५१।।

योगकाले हि तल्लिङ्गं करपीठे निधाय च।
निमेषहीनया दृष्ट्या स्वेष्टलिङ्गं निरीक्षयेत्।।२५२।।

स्वेष्टलिङ्गाऽकृति ज्योतिस् स्त्रिस्थाने भावयेदपि।
भ्रूमध्ये हृदये चापि मूलाधारे तथैव च।।२५३।।

एतेष्वेकतमे स्थाने शिवयोगबलेन तु।
यत्रानुभूयते ज्योतिस्तदेव प्राणलिङ्गकम्।।२५४।।

शिवोऽहमितिभावेन भावो यत्र विलीयते।
भावलिङ्गं तदाख्यातं सादरं शिवयोगिभिः।।२५५।।

प्रत्यहं प्रातरुत्थाय ह्युपचारैर्यथेप्सितैः।
अर्चयेदिष्टलिङ्गं तद् गुरूक्तविधिनाऽन्वहम्।।२५६।।

प्राणलिङ्गार्चनं प्रोक्तं विहितं यत् समाधिना।
शिवोहमितिभावेन भावलिङ्गार्चनं मतम्।।२५७।।

शिवोहमितिभावेन लोकभावो निवर्तते।
तदा शिवातिरिक्तं हि न किञ्चिदवशिष्यते।।२५८।।

भावना सर्वजीवानां कारणं बन्धमोक्षयोः।
बन्धो विश्वमयोभावो मुक्तिस्तद्विलयो मतः।।२५९।।

कीटभ्रमरन्यायेन शिवयोगेन साधकः।
शिवसायुज्यमाप्नोति नास्ति नास्त्यत्र संशयः।।२६०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गुह्यो गुह्यतमो योगः शिवयोगोऽत्र सारतः।
कथितो हि मया देवाः साधयध्वमहर्निशम्।।२६१।।

पञ्चाक्षराद्गुरोरेवं श्रुत्वा हि सर्वदेवताः।
प्रहृष्टहृदयाःसर्वे विनयादब्रुवन् खलु।।२६२।।

तवादेशानुसारेण नित्यं कर्म निरन्तरम्।
आचरन्तो हि योगेन चरमं प्राप्नुमः शिवम्।।२६३।।

देवानां वचनं श्रुत्वा पञ्चाक्षरमहागुरुः।
अनुगृह्य तथेत्युक्त्वा शिवं ध्यायन्स्थितोऽभवत्।।२६४।।

काश्यां बिल्ववने दिव्यं ज्ञानपीठं विनिर्मितम्।
पञ्चाक्षरेण गुरुणा लोककल्याणहेतवे।।२६५।।

तदाप्रभृति पीठेऽस्मिन् ज्ञानदानं प्रवर्तते।
प्रसृता भुवि पीठस्य धवला कीर्ति उत्तमा।।२६६।।

श्रीकाशी वाराणसीनाम्नाऽपि प्रथिता पापप्रमोचिनी सज्ज्ञानदायिनी विष्णुनाथपुरी महाश्मशानं श्रीशम्भुना अविमुक्तं क्षेत्रं शिवत्रिशूले स्थितं महाक्षेत्रं भुवः कैलास इत्याख्यायते। तत्र बैल्ववने आनन्दकानने ईशानमुखोद्भूतम् आकाशतत्त्वाधिपम् ऊर्ध्वदिशाधिष्ठातारं स्कन्दगोत्राधिनाथम् अजपावेद-पाठकम् ज्ञानसिंहासनाधीशं पञ्चाक्षरं श्रीसद्गुरु-शिवाचार्यमुपतस्थुर्ब्रह्मादयो देवाः। कृतदण्डप्रणामाः जीवानां मुक्तेरुपायं पप्रच्छुः। शिवज्ञानमेव मुक्तेः साक्षाद् उपाय इति प्राह सद्गुरुः। वेदस्य अन्तिमो निष्कर्षात्मा भागः वेदान्तः, अथ च तन्त्रागमस्य अन्तिमो भागः सिद्धान्त इत्युच्यते। अनयोः सर्वथा मतैक्यं विद्यते। सत्यपि जीवेशयोरैक्ये अनाद्यविद्यासम्बन्धाद् जीवानाम् शिवांशरूपता प्रतिभाति। यो हि योगानामुत्तमो योगः स शिवयोगः भुक्तिमुक्तिप्रदो भवति। शिवयोगो योनिचक्राद् जीवं त्रायते। योगसाधन-वेलायां साधकः वामहस्तपीठे इष्टलिङ्गं प्राणसमं प्रियं निधाय प्रपूजयति, उत्तमाङ्गे धारयति, भ्रूमध्ये हृदये मूलाधारे भावयन् प्राणलिङ्गमुपास्ते अथ शिवोऽहमिति भावनया प्रत्यहं भावलिङ्गं स्वात्माभेदेन भावयति। सोऽयं विश्वं भावयन् बन्धमनुभवति चेत् भावलिङ्गं भावयन्, कीटभ्रमरन्यायेन संसारबन्धाद् विनिर्मुक्तः विश्वविलयभावनया शिवयोगेन शिवसायुज्यरूपां मुक्तिमवाप्नोति। शिवयोगाद् ज्ञानोदयेन साधकः शिवात्मतामनुभवन् मुक्तः सन्नपि नित्यं कर्म समाचरन् विलसतीति पञ्चाक्षरात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सद्गुरोः शिवाचार्याद् अवबुध्य कृतार्थाः सन्तः स्वस्वस्थानं कृतार्थाः सन्तः संजग्मुरिति तान् अनुगृह्य श्री पञ्चाक्षरशिवाचार्यः शिवं ध्यायन् स्थितोऽभवत्। तदाप्रभृति अद्यापि लोककल्याणहेतवे ज्ञानसिंहासने पीठे काश्यां ज्ञानदान-परम्परा प्रचलति-तदेतदर्थमस्य पीठस्य विश्वस्मिन् विश्वे विशिष्टा ख्यातिः प्रसरति॥२१७-२६६॥

### हिन्दी तात्पर्य

## कृतयुग (सतयुग) का इतिहास

शास्त्रों के प्रवर्त्तक भगवान् महेश्वर - शिव का वाहन सत्य सनातन धर्मस्वरूप वृषभ है। भगवान की स्वस्वभाव-स्वरूपा पराम्बा स्वातन्त्र्य-शक्ति है जिनकी स्तुति ब्रह्मा, हरि एवं रुद्र प्रभृति देवगण भी सदैव करते रहते हैं। यह शक्ति, शिवा-भवानी प्रभृति नाम से लोक एवं शास्त्र में प्रसिद्ध है। भगवान् शिव के उल्लास का संवर्धन करने वाली यह ह्लादिनी शक्ति के रूप में शास्त्रों में वर्णित है। महेश्वर का विश्वोत्तीर्ण स्वरूप हो, आहोस्विद् विश्वमय स्वरूप हो, पराम्बा स्वातन्त्र्य-शक्ति शिवा से शिव का अवियुक्त स्वरूप निरन्तर विद्यमान रहता है। विश्वोत्तीर्ण स्वरूप से अप्रच्युत रहते हुए भगवान् शिव जगत्-सृष्टि-सापेक्ष विश्वमय स्वरूप में स्थित होते हैं। हम साधकगण सद्गुरु के मार्गदर्शन में शास्त्रीय आकलन करते हुए विश्वोत्तीर्ण शिव की दो शक्तियों— चिद् एवम् आनन्द का अभिमर्शन करते हैं। जबकि विश्वमय शिव का आकलन हम पाँच शक्तियों— चिद्, आनन्द, इच्छा, ज्ञान एवं क्रिया के अभिमर्शन के साथ करते हैं। नाम एवं अस्तित्व के आधार पर भगवान् शिव की अन्तरंग एवं अभेदस्वभावभूता पराम्बा शिवा को शास्त्रकारों ने स्वातन्त्र्यशक्ति शब्द से सम्बोधित किया है। यह एक होती हुई भी उपर्युक्त पंचविध रूपों में जिज्ञासुओं के अनायास बोध और बुद्धिवैशद्य हेतु प्रतिपादित की जाती है। यह शिवा शिव की निजैश्वर्य, सर्वस्व, सम्पद् एवं महिमा आदि नामों से जानी जाती है। विश्वसृष्टि संकल्प के समाकलन में शिव की उपर्युक्त शक्तियों की प्रधानता से पञ्चविध शुद्ध सर्ग प्रकट होता है। चितिशक्ति की प्रधानता से शिवतत्त्व, आनन्द शक्ति की प्रधानता से शक्तितत्त्व, इच्छा शक्ति की प्रधानता से सदाशिवतत्त्व, ज्ञानशक्ति की प्रधानता से ईश्वरतत्त्व एवं क्रियाशक्ति की प्रधानता से शुद्ध विद्यातत्त्व का प्राकट्य होता है। सृष्टि के ये पाँच तत्त्व शुद्ध अध्वा एवं शुद्ध-सर्ग के नाम से जाने जाते हैं।

उपर्युक्त स्वातन्त्र्य-शक्ति, भावोन्मुखता एवम् अभावोन्मुखता का स्वच्छन्द

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आकलन करने में पूर्ण सामर्थ्य रखती है। अत: स्वरूप-निषेध एवं ऐश्वर्य-निषेध का आकलन करने से स्वातन्त्र्य शक्ति का मायातत्त्व के रूप में प्राकट्य होता है जिसे हम अविद्या (अपूर्ण विद्या) अथवा अज्ञान (अपूर्ण ज्ञान) के रूप में अभिमर्शन करते हैं। मायातत्त्व से लेकर पुरुष-तत्त्व तक षट् कंचुक के रूप में असंख्य जीवों का प्राकट्य होता है जो कर्मफल के भोक्ता रूप में, भोग्य की अपेक्षा करने लगते हैं। परिणामस्वरूप, प्रकृतितत्त्व प्रकट होता है। भोग्य का यह सूक्ष्म स्वरूप है। इससे महत् तत्त्व, महत् से अहंकार, अहंकार से पञ्च तन्मात्र एवं एकादश इन्द्रियाँ तथा पञ्च तन्मात्राओं से पञ्च महाभूतों की उत्पत्ति होती है। इस प्रकार, शिव की विश्वमयी दशा के मौलिक तत्त्व ३६ हैं— शिव, शक्ति, सदाशिव, ईश्वर, शुद्धविद्या, माया, कला, विद्या, राग, काल, नियति, पुरुष, प्रकृति, महत्, अहंकार, शब्द तन्मात्र, स्पर्श तन्मात्र, रूप तन्मात्र, रसतन्मात्र, गन्ध तन्मात्र, मनस् श्रोत्र, त्वक्, चक्षुष्, जिह्वा (रसन), घ्राण, वाक्, पाणि, पाद, पायु, उपस्थ, आकाश, वायु, तेजस्, सलिल एवम् पृथ्वी।

भगवान् शिव निज ऐश्वर्य-महिमा स्वातन्त्र्य से निर्मित सम्पूर्ण विश्व के अधिष्ठान स्वयं ही होते हैं। वे समदृष्टि हैं। अनुग्रहमूर्ति हैं, स्वच्छ हैं, स्वतन्त्र हैं, सर्वज्ञ है एवं सर्वकर्ता हैं। विश्वोत्तीर्ण शिव चिन्मय आनन्दधाम एक एवं अखण्ड हैं। वे स्वस्वातन्त्र्य शक्ति के बल पर नानाविध अनन्त जीवों के रूप में व जगत् के रूप में प्रकट होते हुए असंख्य रूपों में भेदगर्भित अभेद रूप में विराजमान रहते हैं। वे अपने अनुग्रह से संसारी बद्ध जीवों को शास्त्र नियन्त्रित भोग एवं मोक्ष प्रदान करने हेतु वेद-तन्त्रों का अवतरण करने के साथ आचार्यों का भी अवतरण करते हैं। साधक का कर्तव्य है कि वह शिवाचार्य से प्रतिबोधित धर्माचरण के साथ शिवतत्त्वबोध एवं भोग-मोक्ष की प्राप्ति हेतु जागरूक रहता हुआ प्रयत्नशील बना रहे। ऐसे परम कारुणिक भगवान् शिव को प्रणाम करते हुए श्रीविश्वाराध्य ज्ञानसिंहासनपीठाधीश महास्वामी श्री चन्द्रशेखर शिवाचार्य सर्वलोक-कल्याणार्थ वीरशैवदर्शन-सर्वस्व पञ्चसूत्र-बीजों का अंकुरण-पुरःसर शिवतत्त्व बोध से साधकों को चमत्कृत करने हेतु पञ्चाचार्य पञ्च सूत्रों की कारिका का निर्माण किए हैं। अत: ग्रन्थ के आरम्भ में 'स्वातन्त्र्यशक्त्योल्लसितः' इत्यादि नमस्कारात्मक मंगल का आयोजन करते हैं। परास्य शक्तिः......इत्यादि श्रुति एवं 'चितिःस्वतन्त्रा.....' इत्यादि स्मृति से विशदीकृत भगवान् शिव की सर्वसामर्थ्यसमृद्ध स्वातन्त्र्य शक्ति स्वाभाविक महिमा रूप से सुप्रतिष्ठित है। शक्तिमान् शिव निज विश्वोत्तीर्ण पद से अच्युत स्थित रहते हुए संकल्पबलात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विश्वमय स्वरूप को धारण करते हुए ३६ तत्त्वों के रूप से भासमान होते हैं। ऐसे भगवान् हम सबकी आत्मा हैं और विश्व-वैभव को धारण करते हैं।

वीरशैव धर्मदर्शन के एकाक्षर प्रभृति पाँच शिवाचार्यों की वन्दना करते हुए कारिकाकार पञ्च सूत्रों की अतिशय महिमा से अभिमण्डित गुरुवन्दना के द्वारा निज शिवभक्ति एवं गुरुभक्ति से समुल्लसित हैं। आप ऋद्धि एवं सिद्धि के स्वामी एकदन्त प्रभु की वन्दना करते हुए गोत्रमूल स्कन्द— कार्तिकेय भगवान् की वन्दना करते हैं।

संस्कृत वाङ्मय में शास्त्रीय गहन विषयों को सूत्रशैली में आकलन करना व गुरु-शिष्य परम्परा से उसे संवर्धित करना प्राचीन काल से कला के रूप में प्रतिष्ठित रही है। वीरशैव धर्मदर्शन के विशाल वाङ्मय में जो ज्ञान-परम्परा सतयुग से चली आ रही है, उसे द्वापर युग के पाँच शिवाचार्यों ने ऋषिगण में अवतरित करने हेतु पाँच सूत्रों की रचना की।

रेणुकाचार्य ने अगस्त्य मुनि को 'पदविधिः' सूत्र का उपदेश एवं प्रबोधन कराया। दारुक शिवाचार्य ने दधीचि मुनि को 'वृष्टिः' द्वितीय सूत्र का प्रबोधन कराया। श्री घंटाकर्ण शिवाचार्य ने व्यास मुनि को 'लम्बनम्' सूत्र का उपदेश किया। धेनुकर्ण शिवाचार्य ने सानन्द महर्षि को 'मुक्तागुच्छम्' सूत्र का उपदेश किया। तद्वत् आचार्य विश्वकर्ण ने अत्रिपुत्र दूर्वाश महर्षि को 'पञ्चवर्णम्' सूत्र का उपदेश किया था।

।।इति द्वितीयाध्यायः।।

●

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ तृतीयाध्यायः ॥

## ।।त्रेतायुगीनमैतिह्यम्।।

शिवेशानमुखोद्भूतं ज्ञानसिंहासनाधिपम्।
पञ्चवक्त्रगुरुं वन्दे ह्यायुःकामार्थसिद्धये।।१।।

श्रीशिवाचार्यो ज्ञानसिंहासनाधीशम् ईशानमुखसम्भूतं पञ्चवक्त्रगुरुमायुःकामार्थसिद्धये वन्दमान आह— शिवेशानेति॥१॥

त्रेतायुगीनचारित्र्यमागमोक्तं सुदुर्लभम्।
संगृह्य लिख्यते ह्यत्र लोककल्याणहेतवे।।२।।

एकदा हि युगारम्भे कैलासशिखरे खलु।
रत्नसिंहासने तत्र ह्युपविष्टमुमापतिम्।।३।।

ब्रह्मादिदेवताः सर्वे लक्ष्म्यादिशक्तयस्तथा।
यक्षो-रक्षांसि गन्धर्वाः किन्नराद्या गणास्तथा।।४।।

आदित्या वसवो रुद्राः सिद्धा विद्याधरोरगाः।
पिशाचा दानवा दैत्या परितस्तं सिषेविरे।।५।।

सदाशिवमुखोद्भूता एकवक्त्रादयो गणाः।
आगत्य च सभामध्येऽसेवन्त पार्वतीपतिम्।।६।।

तदेवं सर्वदेवीय - सेवया तोषितो हरः।
आशुतोषो महादेवो ह्यादिदेश गणान् किल।।७।।

मम पञ्चमुखोद्भूता मत्तोऽपि महिमान्विताः।
नित्यमुक्ता निरातंका निर्लेपा निरुपद्रवाः।।८।।

धृतश्रीभूतिरुद्राक्षा लिङ्गाङ्कितमनोहराः।
एकादिपञ्चवक्त्रान्ता गणश्रेष्ठा गुणान्विताः।।९।।

कालचक्रानुसारेण युगोऽयं परिवर्तितः।
अधुना शुभमारब्धस्त्रेताख्यो हि महायुगः।।१०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आद्ये युगे भवद्भिस्तु ह्यवतीर्य महीतले।
धर्मेण वीरशैवेन प्रत्यबोध्यन्त देवताः।।११।।

पुनरेव महीभागे लिङ्गेभ्यो ह्यवतीर्य च।
यक्षराक्षसगन्धर्व - गणान् सम्बोध्य भो गणाः।।१२।।

सद्धर्मं सर्वथा सम्यक् प्रतिष्ठापयत द्रुतम्।
समुद्धरत भूलोकमेतत्कार्यं महत्तरम्।।१३।।

कालचक्रप्रभावेण धर्मो विस्मर्यते किल।
उपदेशस्ततो ह्यस्य कर्तव्यो हि भवेन्मुहुः।।१४।।

आवृत्तिर्व्यवहारस्य बन्धनाय प्रकल्प्यते।
धर्मस्य पुनरावृत्तिर्न बन्धायापि मुक्तये।।१५।।

अतः संभूय वै गत्वा धर्मतत्त्वं विबोध्य च।
संघशक्तिं प्रतिष्ठाप्य ह्युद्धरन्तु जनान् किल।।१६।।

श्रुत्वा शिवस्य चादेशमेकवक्त्रादयो गणाः।
सोमेश्वरादिलिङ्गेभ्यः प्रादुरासन् महीतले।।१७।।

त्रिलिङ्गाख्ये प्रदेशे च कोल्लिपाकपुरे किल।
सोमेश्वरमहालिङ्गादेकवक्त्रो महागणः।।१८।।

मध्ये च भारते देशे शिप्रातीरे महोज्ज्वले।
वटक्षेत्रस्य सिद्धेशाद् द्विवक्त्राख्यो महागुरुः।।१९।।

आन्ध्राख्ये सत् प्रदेशे च द्राक्षारामपुरे तथा।
भीमनाथान्महालिङ्गात् त्रिवक्त्रो गणपुङ्गवः।।२०।।

आन्ध्रे चैव प्रदेशे च श्रीशैलाख्ये महास्थले ।
मल्लेशाख्यान्महालिङ्गाच्चतुर्वक्त्रो महागणः।।२१।।

महाश्मशानसत्क्षेत्रे काशिकानगरे किल।
विश्वेश्वरमहालिङ्गात् पञ्चवक्त्रो गणेश्वरः।।२२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



एवं पञ्चगणाःसर्वे शिवादेशानुसारतः।
धर्मस्थापयितुं लिङ्गात् प्रादुर्भूता महत्तमाः।।२३।।

एकवक्त्रो द्विवक्त्रश्च त्रिवक्त्रश्चतुराननः।
पञ्चवक्त्रेश्च पञ्चैते पञ्चाचार्याःप्रकीर्तिताः।।२४।।

एते पञ्च शिवाचार्यास्त्रेतायामवतीर्य च।
संस्थिताः स्वस्वपीठेषु धर्ममार्गप्रबोधकाः।।२५।।

अधिष्ठितेषु पीठेषु ह्याचार्येषु तदा खलु।
आदिदेवो महादेवो दैत्यान्व्यज्ञापयत् किल।।२६।।

पूर्वदेवा हि भो दैत्या मम पञ्चमुखोद्गताः।
पञ्चाचार्या हि भूलोके भवत्कल्याण-हेतवे।।२७।।

अवतीर्णा महीभागे भवतां गुरवः खलु।
गत्वा गुरोश्च सान्निध्यं सेवां कुर्वन्तु भक्तितः।।२८।।

शिवादेशानुसारेण दैत्या यक्षास्तथैव च।
गन्धर्वा राक्षसाश्चैव यथेच्छं गुरुसन्निधौ।।२९।।

गत्वा कृत्वा च सेवां च पञ्चपीठेषु वै खलु।
कारुण्यं च गुरोर्लब्ध्वा शुक्रशिष्या हि दीक्षिताः।।३०।।

पञ्चाचार्या हि दीक्षायां शक्तिपातं परीक्ष्य च।
लौहं मारकतं चैव ह्यायस्कान्तं तथैव च।।३१।।

लिङ्गं प्रदाय सर्वेभ्यो वामहस्ततले तथा।
मन्त्रं पञ्चाक्षरं चैव निगूढं समुपादिशन्।।३२।।

विभज्य दीक्षिताः सर्वे दानवा यक्षराक्षसाः।
गन्धर्वाः किन्नराः सर्वे पिशाचा गुह्यकास्तथा।।३३

ज्ञातुमैच्छन्विशेषेण धर्मतत्त्वं गुरोःकिल।।
गत्वा च पीठमेकैकं विदुर्धर्मं सनातनम्।।३४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



त्रेतायुगारम्भे कैलासशिखरे समासीनं देवदेवमुमापतिम् सशक्तयो देवगणाः यक्षःप्रभृतयः एकवक्त्रप्रभृतयो गणाश्च सिषेविरे परितः स्थिताः। कृतयुगे देवान् प्रति प्रतिबोधित-वीरशैवधर्माः भोगणाः? यूयं त्रेतायुगारम्भे महीतलमवतीर्य पुनः सर्वेभ्यो रक्षोयक्ष-प्रभृतिभ्यः सद्धर्मोपदेशेन भूलोकमुद्धरतेत्यादिदेश। कालचक्रप्रभावेण विस्मृतस्य धर्मस्य आवृत्त्या उपदेशः मुक्तये कल्पते। शिवाज्ञां शिरसि धृत्वा सोमेश्वर-महालिङ्गाद् एकवक्त्रः, सिद्धेश्वरलिङ्गाद् द्विवक्त्रः, भीमनाथमहालिङ्गात् त्रिवक्त्रः, मल्लेशलिङ्गात् चतुर्वक्त्रः विश्वेश्वर-महालिङ्गात् पञ्चवक्त्रश्चेति पञ्चाचार्याः प्रादुर्बभूवुः। एतेषु स्वस्वपीठेषु अधिष्ठितेषु सत्सु देवदेवेन महादेवेन दैत्यान् प्रतिप्रोक्तं— हे दैत्याः! पूर्व-युगे यूयं देवाः आस्त सम्प्रति मदाज्ञया पञ्चसु पीठेषु गत्वा सेवया पञ्चाचार्य-सान्निध्यं लभध्वम्। ततः सेवापरायणा दैत्याः पञ्चाचार्य-कारुण्यं लब्ध्वा शुक्राचार्य-शिष्याः सन्तोऽपि पञ्चाचार्येभ्यो गुरुभ्यः लब्धदीक्षाः बभुः। पञ्चाचार्याः दैत्येभ्यो, दानवेभ्यः, यक्षरक्षः प्रभृतिभ्यश्च दीक्षाविधौ शक्तिपात-परीक्षणं विधाय यथायथं तेभ्यः लौहं मारकतं आयस्कान्तं चेष्टलिङ्गं प्रदाय मन्त्रदानेन समनुगृहीतवन्तः। एकैकं पीठं गत्वा दैत्यप्रभृतयः सद्गुरुभ्यः सनातनं वीरशैवधर्मं सदाचारं च जगृहुः॥२-३४॥

## ॥वीरसिंहासने धर्मोपदेशः॥

दानवा यक्षगन्धर्वा व्योममार्गेण वै खलु।
मलयाद्रिं समागत्य वीरसिंहासने किल॥३५॥

उपविष्टं महाचार्यमेकवक्त्रं महागुरुम्।
हरित्कन्थां दधानं च हरिद्वर्णं कमण्डलुम्॥३६॥

लिङ्गधारणसंयुक्तमश्वत्थदण्डधारिणम्।
त्रिपुण्ड्राङ्कितसर्वाङ्गं भस्मतत्त्वविवेकिनम्॥३७॥

रुद्राक्षधारिणं चैव रुद्रतत्त्वप्रबोधकम्।
तेजसा दीप्यमानं तं ददृशुर्दानवादयः॥३८॥

तदन्तिकं समागत्य प्रणिपत्य च सादरम्।
प्राञ्जलि प्रार्थयेयुस्ते ह्येकवक्त्रं महागुरुम्॥३९॥

शिवस्यादेशमासाद्य भयभक्तिसमन्विताः।
दीक्षिता हि वयं सर्वे वीरशैवमते परे॥४०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रोतुकामा वयं सर्वे महामन्त्रस्य विस्तरम्।
अतोऽध्यापय भो स्वामिन् 'न'कारप्रणवाक्षरम्।।४१।।

दैत्यानां रक्षसां चैव मन्त्रार्थविषये किल।
जिज्ञासां सम्यगाकर्ण्य ह्येकवक्त्रो महागुरुः।।४२।।

बभाषे शान्तया वाचा सर्वानुद्दिश्य सद्गुरुः।
लब्धदीक्षा हि यूयं भो धन्यभागा न संशयः।।४३।।

संरक्ष्योऽदीक्षितेभ्योऽयं मन्त्रः सद्भिः समादृतः।
कथ्यते भक्तिशालिभ्यः शुश्रूषुभ्यो महत्तरः।।४४।।

यदुक्तं शम्भुना पूर्वमस्मानुद्दिश्य वै किल।
तदेव कथ्यते सर्वैः श्रूयतां सावधानतः।।४५।।

नकारादियकारान्ता वर्णाः पञ्चात्र सम्मताः।
प्राणभूता हि मन्त्रेऽस्मिन् प्रत्येकं प्रणवात्मकम्।।४६।।

नकार आदिमो वर्णो धरातत्त्वमुदीरितम्।
ब्रह्मा हि दैवतं ह्यस्य ह्यधिदैवतमुच्यते।।४७।।

सावित्री शक्तिरित्युक्ता पृथिव्याः कारणं किल।
अनुष्टुप्-छन्दसा युक्तं वासिष्ठार्षं तथैव हि।।४८।।

दिशस्तु पूर्वमित्युक्तं सद्योजातं तु ब्रह्मकम्।
आयुधं वज्रामेवोक्तं कला निवृत्तिरेव च।।४९।।

कठिनो हि गुणः प्रोक्तश्चक्रं तु चतुरश्रकम्।
ज्वलदग्नेःप्रकाशस्तु करणं मन एव च।।५०।।

प्राणवायुसमायुक्तं घ्राणं ज्ञानेन्द्रियं भवेत्।
इत्येवं षोडशानां तु नकाराक्षरमुच्यते।।५१।।

एकवक्त्रमुखादेव नकारप्रणवं खलु।
श्रुत्वा दैत्यादयःसर्वे प्राबुध्यन् सर्वमेव हि।।५२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ततः सर्वेऽपि संभूय लब्ध्वा चाज्ञां गुरोः किल।
व्योममार्गेण तेनैवोज्जयिनीं नगरीं गताः।।५३।।

अथ दानवाः यक्षगन्धर्वप्रभृतयश्च प्राप्तवीरशैवदीक्षाः सङ्घीभूय व्योममार्गेण प्रस्थिताः श्रीसद्गुरुम् एकवक्त्रं शिवाचार्यं भस्मतत्त्व-प्रबोधिनं रुद्रतत्त्वप्रबोधकम् उपगम्य "न"-कार प्रणवाक्षररहस्यं पप्रच्छुः। जिज्ञासमानेभ्यः आत्मनः शिष्यताम् इच्छद्भ्यः दानवप्रभृतिभ्यो दीक्षितेभ्यः तत्र भवान् एकवक्त्रः शिवाचार्यः प्राह— "नमः शिवाय" इत्येतस्मिन् महामन्त्रे प्रत्येकं वर्णः नकारप्रभृतिः प्रणवात्मा प्राणात्मा च राजते। तत्र आद्यः नकारवर्णः षोडशार्थान् आत्मसात् कुरुते— १. धरा तत्त्वम् २. ब्रह्मा देवता ३. सावित्री शक्तिः ४. कारणं पृथिवी ५. अनुष्टुप् छन्दः ६. वसिष्ठ ऋषिः, ७. पूर्वा दिक् ८. ब्रह्म सद्योजातसंज्ञम् ९. आयुधं वज्रं १०. निवृत्तिः कला ११. गुणः काठिन्यम् १२. चतुरश्रकं चक्रम् १३. ज्वलदग्निस्वरूपः प्रकाशः १४. करणं मनः १५. प्राणात्मा वायुः १६. घ्राणम्-इन्द्रियम् इति। तदेवं दानवादयो जिज्ञासवः शिवाचार्यात् नकारप्रणवार्थं विज्ञाय तदनुज्ञया व्योममार्गेण उज्जयिनीं पुरी- मापुः।।३५-५३।।

## ।।सद्धर्मसिंहासने धर्मोपदेशः।।

कालभीतिविनिर्मुक्ताः कालकालस्य सन्निधौ।
यत्र भक्तास्तु वर्तन्ते पुरी सोज्जयिनी मता।।५४।।

उत्तराभिमुखी यत्र शिप्रा नाम्नी नदी खलु।
रवौ सिंहस्थिते यत्र कुम्भपर्व समुल्लसेत्।।५५।।

तत्रैव हि वटक्षेत्रे नाम्ना सिद्धेश्वरेण वै।
राजते श्री-महादेवः सर्वसिद्धिप्रदायकः।।५६।।

तत्रैवानतिदूरे च सिद्धसद्धर्मसंज्ञके।
सिंहासनगतं श्रीलं द्विवक्त्रं श्रीगुरुं महः।।५७।।

वामदेवमुखोद्भूतं रक्तकन्थाधरं विभुम्।
दक्षिणाशापतिं देवं नन्दिगोत्राधिनायकम्।।५८।।

जलतत्त्वाधिपं चैव पालाशदण्डधारिणम्।
यजुर्वेदविदांश्रेष्ठं श्रिततामकमण्डलुम्।।५९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सद्धर्माधिपतिं शान्तं मायामन्त्रस्य जापकम्
महाकायं महाचार्यं दृष्ट्वा ते सर्वदानवाः।।६०।।

प्रणिपत्य तदा सर्वे नयभक्तिसमन्विताः।
'म'कारमन्त्रबोधाय प्रार्थयामासुरार्यकम्।।६१।।

तेषां तद्वचनं श्रुत्वा द्विवक्त्रो हि महागुरुः।
बभाषे तान् समुद्दिश्य 'म'कारप्रणवं किल।।६२।।

पुरारिणा पुरा काले प्रोक्तो यस्तु शिवागमे।
तदेव प्रोच्यते यूयं शृणुध्वं सुसमाहिताः।।६३।।

मकारं जलरूपं च देवो विष्णुस्तथैव च।
लक्ष्मीः शक्तिरिति प्रोक्तमाधारो जलमेव च।।६४।।

त्रिष्टुप् छन्दस्तु सम्प्रोक्तं विश्वामित्र ऋषिर्मतः।
स्थानं दक्षिणतो वक्त्रं ब्रह्म वै वामदेवकम्।।६५।।

आयुधं पद्ममेवोक्तं प्रतिष्ठाख्यकलायुतम्।
गुणस्तु द्रवसंयुक्तश्चक्रमर्धसुधाकरः।।६६।।

सोमस्यैव प्रकाशश्च करणं बुद्धिरेव च।
अपानवायुसंयुक्तं जिह्वा ज्ञानेन्द्रियं भवेत्।।६७।।

अर्थानां षोडशानां तु मकारोवाचकः स्मृतः।
शिवेन कथितं सर्वं यथावत् बोधितं मया।।६८।।

द्विवक्त्रगुरुणा प्रोक्तं सर्वं ज्ञात्वैव ते किल।
तदादेशं तु संप्राप्य जग्मुः सर्वे हिमालयम्।।६९।।

यः कालकालो महाकालः, तदधिष्ठिता पूः उज्जयिनी। अत्र भक्ताः कालभीतिमुक्ता भान्ति। अत्र प्रवाहमयी शिप्रा पुण्यसलिला उत्तराभिमुखी राजते। सिंहस्थे भानौ अत्र कुम्भपर्वसमुल्लासो जनसम्मर्दम् समाकृष्य पापापनोदनपुरःसरं पुण्योपचयेन योजयति। अत्र किल वटक्षेत्रे सर्वसिद्धिदः शिवः सिद्धेश्वरो राजते। तदन्तिके वामदेवमुखोद्भूतः जलतत्त्वाधिपः दक्षिणाधिपतिः नन्दिगोत्राधिपः यजुर्वेदविद् मायामन्त्रजापकः श्रीद्विवक्त्रः शिवाचार्यः सद्धर्मपीठम् अधितिष्ठति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तमुपसृत्य दानवप्रभृतयः अघोरमन्त्रस्य मकार प्रणवार्थं प्रतिपादियितुं प्रार्थितवन्तः। अथैते श्रीगुरुशिवाचार्यमुखाद् मकारप्रणवस्य षोडश अर्थान् विदुः— १. जलं तत्त्वम् २. देवो विष्णुः ३. लक्ष्मीः शक्तिः ४. आधारः जलम् ५. छन्दः त्रिष्टुप् ६. ऋषिः विश्वामित्रः ७. दक्षिणवक्त्रं स्थानम् ८. वामदेवो ब्रह्म ९. आयुधं-पद्मः १०. कला-प्रतिष्ठा ११. द्रवत्वं गुणः १२. अर्द्धचन्द्रः चक्रम् १३. प्रकाशः सोमः १४. करणं बुद्धिः १५. वायुः अपानः १६. ज्ञानेन्द्रियं जिह्वा चेति। तदेवं मकारप्रणवार्थं विज्ञाय दानवप्रभृतयः हिमालयं जग्मुः॥५४-६९

## ॥वैराग्यसिंहासने धर्मोपदेशः॥

भारतस्योत्तरे देशे हिमेनाच्छादिते किल।
नगानामधिपस्तत्र राजते हि हिमालयः॥७०॥

तत्रास्ति संगमोऽपूर्वो मध्येपर्वतमेव च।
मधुगङ्गासरस्वत्योर्मन्दाकिन्याश्च संगमः॥७१॥

तस्मिन् संगमतीरे वै ऊँकारेश्वरसन्निधौ।
आवृते पञ्चकेदारैः स्थानमेकं हि राजते॥७२॥

वैराग्यनामकं तत्र महत् सिंहासनं खलु।
कालात् शाश्वतिकादेव राजते भ्राजते किल॥७३॥

तस्मिन् सिंहासने चैव ह्युपविष्टं महागुरुम्।
अघोरमुखसञ्जातं नीलकन्थाधरं प्रभुम्॥७४॥

वेणुदण्डधरं चैव पश्चिमाधिपतिं तथा।
भृङ्गिगोत्राधिनाथं च शिकारप्रणवार्चितम्॥७५॥

सल्लिङ्गधारिणं चैव श्रितलौहकमण्डलुम्।
तेजोरूपं त्रिकालज्ञमग्निभूताधिपं तथा॥७६॥

बोधकं सामवेदस्य सूक्ष्ममन्त्रस्य जापकम्।
प्रसन्नवदनं शान्तं सर्वसिद्धिप्रदं प्रभुम्॥७७॥

वैराग्यधर्मपीठेशं दृष्ट्वा त्रिवक्त्रमेव च।
कृत्वा दण्डप्रणामं तु दैत्या यक्षाश्च राक्षसाः॥७८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



त्रिवक्त्रं प्रार्थयामासुर्विद्याविनयसंयुताः।
उज्जयिन्यां वयं सर्वे द्विवक्त्रात् सुमहागुरोः।।७९।।

'म'कारप्रणवं ज्ञात्वा मुदिता ह्यभवाम वै।
इदानीं श्रोतुमिच्छामस्त्वन्मुखाद्धि महागुरो।।८०।।

'शि'कारप्रणवं चैव साहित्यमपि तत्पुनः।
दैत्यानां तद्वचः श्रुत्वा त्रिवक्त्रो हि महागुरुः।।८१।।

बभाषे शान्तया वाचा शिवं ध्यायन् मुहुर्मुहुः।
शिवागमेषु भो दैत्या यदुक्तं शम्भुना पुरा।।८२।।

यथावदुच्यते तद्धि श्रृणुध्वं सुसमाहिताः।
शिकारो वह्निरूपस्तु रुद्रस्तत्राधिदैवतम्।।८३।।

गौरीशक्तिसमायुक्तश्चाधारश्चाग्निरेव च।
उष्णिक् छन्दःसमायुक्तं जमदग्निर्ऋषिस्तथा।।८४।।

स्थानं पश्चिमतो वक्त्रमघोरं ब्रह्म चैव हि।
स्वस्तिकायुधमेवोक्तं विद्यानाम कलाऽपि च।।८५।।

गुणो दीप्त्यनुसंयुक्तश्चक्रं त्र्यश्रकमेव च।
तडितां तु प्रकाशश्च करणं त्वहमाकृतिः।।८६।।

व्यानवायुसमायुक्तं नेत्रं ज्ञानेन्द्रियं भवेत्।
इत्येवं षोडशानां तु 'शि'काराक्षरमुच्यते।।८७।।

शिकारस्य स्वरूपं तु यथावद्बोधितं मया।
इतः परं गिरिं गत्वा 'व'कारप्रणवस्य तु।।८८।।

विस्तरं ज्ञायतां दैत्या येन पूता भविष्यथ।
त्रिवक्त्राज्ञां समाकर्ण्य नत्वा च तं मुहुर्मुहुः।।८९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**तदादेशानुसारेण सर्वे ते दानवादयः।**
**उत्थाय व्योममार्गेण श्रीगिरिं समुपागमन्।।९०।।**

नाकवासिनामपि श्लाघ्ये भारतवर्षे हिमालयो नाम नगाधिराजः देवतात्मा उत्तरस्यां दिशि मानदण्ड इव स्थितो राजते। तत्र गङ्गा-सरस्वती-मन्दाकिनीनां संगमो विलसति। तत्-तीरे ॐकारेश्वरसन्निधौ पञ्चकेदारैः समावृतं वैराग्यसिंहासनं विलसति। तत्रोपविष्टं शिकारप्रणवार्चितम् अग्नितत्त्वाधिपम् अघोरमुखोद्गतं भृङ्गिगोत्रा धिनाथं सामवेदविशेषज्ञं सप्रह्वीभावम् उपगम्य दैत्यदानवयक्षादयः शिकारप्रणवाक्षरं प्रबोधयितुं त्रिवक्त्रं शिवाचार्यं सविनयं प्रार्थयामासुः। शिकारप्रणवार्थो यथा भगवता भवेन तन्त्रागमेषु प्रतिपादितस्तथैव शिकारप्रणवस्य षोडश अर्थाः शिवाचार्येण प्रतिपादिताः। तद्यथा— १. वह्निः तत्त्वम् २. रुद्रः देवता ३. गौरी शक्तिः ४. आधारः अग्निः ५. उष्णिक् - छन्दः ६. जमदग्निः ऋषिः ७. स्थानम्- पश्चिमवक्त्रम्, ८. अघोरं ब्रह्म ९. आयुधं-स्वस्तिकम् १०. विद्या-कला ११. गुणो दीप्तिः १२. चक्रं-त्र्यश्रम् १३. विद्युत्-प्रकाशः १४. करणम् - अहमाकृतिः १५. व्यानो वायुः १६. नेत्रं ज्ञानेन्द्रियं चेति। अथ त्रिवक्त्राद् गुरोः शिकारप्रणवाक्षरस्य अर्थं विदित्वा तदनुज्ञया दैत्यादयः व्योममार्गेण श्रीगिरिं प्रति प्रस्थितवन्तः।।७०-९०।।

## ।।सूर्यसिंहासने धर्मोपदेशः।।

**आन्ध्रे चैव प्रदेशे च श्रीशैलाख्ये महास्थले।**
**मल्लिकार्जुनलिङ्गस्य सन्निधौ हि विराजिते।।९१।।**

**सूर्यसिंहासने तत्र ह्युपविष्टं महागुरुम्।**
**तत्पुरुषमुखोद्भूतं श्वेतकन्थाधरं प्रभुम्।।९२।।**

**न्यग्रोधहस्तं वाकारप्रणवेन प्रपूजितम्।**
**उदीच्याधिपतिं देवं वायुतत्त्वाधिनायकम्।।९३।।**

**अथर्वसद्गुरुं चैव स्थूलमन्त्रस्य जापकम्।**
**कांस्यं कमण्डलुं चैव दधानं शान्तरूपिणम्।।९४।।**

**पतिं वृषभगोत्रस्य रविकान्तिसमद्युतिम्।**
**समदृष्टिं तमाचार्यं चतुर्वक्त्रं महागुरुम्।।९५।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रणिपत्यासुराः सर्वे सूर्यसिंहासनाधिपम्।
'वा'कारप्रणवार्थाय प्रार्थयामासुरीदृशम्।।९६।।

वयं वैराग्यपीठाद्धि शिकारप्रणवं खलु।
सम्यग्बुध्वा हि सन्तुष्टा 'वा'कारं बोधय प्रभो।।९७।।

दैत्यानां प्रार्थनां चैव श्रुत्वैव स महागुरुः।
ध्यात्वा क्षणं महादेवमाह तान् सुसमाहितः।।९८।।

वाकारो वायुरूपः स्यादधिदैवतमीश्वरः।
अम्बिका स्यान्महाशक्तिर्वायुश्चाधार एव च।।९९।।

बृहतीच्छन्दसा युक्त ऋषिःकाश्यप एव च।
स्थानमुत्तरतो वक्त्रं ब्रह्म तत्पुरुषं भवेत्।।१००।।

आयुधं बिन्दुरूपं तु कला शान्तिस्तथैव च।
गुणःस्पर्श इति प्रोक्तः षडश्रं चक्रमेव च।।१०१।।

प्रकाश इन्द्रनीलस्य चित्तं तु करणं भवेत्।
उदानाख्यो भवेद् वायुस्त्वक् तु ज्ञानेन्द्रियं भवेत्।।१०२।।

चतुर्वक्त्रमुखोद्गीर्णं वाकारप्रणवस्य तु।
षोडशानां स्वरूपं च दैत्या वै बुबुधुःकिल।।१०३।।

दृष्ट्वा तुष्टान्हि दैत्यान्वै चतुर्वक्त्रो महागुरुः।
प्रेषयामास तान् काशीं यकारप्रणवार्थकान्।।१०४।।

अथ आन्ध्रप्रदेशे श्रीशैलमध्ये श्रीमल्लिकार्जुनलिङ्गस्य सन्निधौ सूर्यसिंहासने समुपविष्टं वाकारप्रणवार्चितं वृषभगोत्रपतिम् अथर्वविशेषज्ञं चतुर्वक्त्रं शिवाचार्यमुपजग्मुः दैत्यादयः। वाकार-प्रणवार्थं प्रबोधयितुं प्रार्थितो गुरुः चतुर्वक्त्र-शिवाचार्यः वाकारस्य षोडश अर्थान् तान् ग्राहयामास— १. वायुः तत्त्वम् २. ईश्वरः देवता ३. अम्बिका महाशक्तिः ४. वायुः आधारः ५. बृहती छन्दः ६. ऋषिः-काश्यपः ७. स्थानम् - उत्तरवक्त्रम् ८. ब्रह्म-तत्पुरुषसंज्ञकम् ९. बिन्दुः आयुधम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



१०. कला-शान्तिः ११. गुणः स्पर्शः १२. षडस्त्रंचक्रम् १३. इन्द्रनीलः प्रकाशः १४. करणं-चित्तम् १५. वायुः उदानः १६. त्वक्-इन्द्रियम् चेति। अथ श्रीगुरोरनुज्ञया दैत्यप्रभृतयः श्रीकाशींविश्वेशप्रियां नगरीं प्रस्थिताः॥९१-१०४॥

## ।। ज्ञानसिंहासने धर्मोपदेशः।।

शुक्रशिष्या हि दैत्यास्ते गन्धर्वाः किन्नरास्तथा।
सर्वे ते व्योममार्गेण प्रापुः काशीं सनातनीम्।।१०५।।

आनन्दकानने तत्र बहुबिल्वविशोभिते।
जङ्गमवाटिकाक्षेत्रे ज्ञानसिंहासने खलु।।१०६।।

ह्युपविष्टं महाचार्यं पञ्चवक्त्रं महागुरुम्।
भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्रांकितमस्तकम्।।१०७।।

लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम्।
बिल्वदण्डधरं चैव दधानं पीतवाससम्।।१०८।।

दधानं योगदण्डं च श्रितभस्मकमण्डलुम्।
रुद्राक्षधारिणं चैव रूद्रतत्त्वविवेचकम्।।१०९।।

दृष्ट्वैव सहसा सर्वे नेमुस्तं दण्डवन्मुहुः।
पुनस्ते प्रार्थयामासुः पञ्चवक्त्रं महागुरुम्।।११०।।

चतुष्पीठेषु चाचार्यैर्वयं सर्वे विबोधिताः।
इदानीं श्रोतुमिच्छामो यकारप्रणवं खलु।।१११।।

दैत्यादीनां समाकर्ण्य जिज्ञासां मान्त्रिकीं किल।
सन्तुष्टः पञ्चवक्त्रोऽसौ प्रोवाच वचनं तदा।।११२।।

## ।।'य'-कारप्रणवोपदेशः।।

पञ्चाक्षरमहामन्त्रे यकारश्चरमाक्षरः।
तस्याहं विस्तरं वक्ष्ये यथोक्तं शम्भुना पुरा।।११३।।

यकारो व्योमरूपस्तु देवश्चास्य सदाशिवः।
उन्मनी शक्तिरेवोक्ता ह्याधारो व्योम उच्यते।।११४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



जगतीच्छन्दसा युक्तो भरद्वाज ऋषिस्तथा।
स्थानमूर्ध्वमुखं विद्याद् ब्रह्म चेशान एव च।।११५।।

आयुधं चैव शूलं स्याच्छान्त्यतीता कलाऽपि च।
गुणस्तु शून्य एव स्यात् प्रकाशश्चन्द्रिकामणेः।।११६।।

करणं प्रकृतिः प्रोक्तं समानो वायुरेव च।
श्रोत्रं ज्ञानेन्द्रियं प्रोक्तमित्येते षोडश क्रमात्।।११७।।

एकैकमक्षरं चैव पुरुषार्थप्रदायकम्।
स्वतन्त्रं मन्त्ररूपेण शिवेनोक्तं शिवागमे।।११८।।

व्योममार्गेण दैत्यप्रभृतयः शिष्याः सनातनीं त्रैलोक्यश्लाघ्यां श्रीकाशीं पुरीं ययुः। तत्र आनन्दकानने बिल्ववने जङ्गमवाटिकाक्षेत्रे ज्ञानसिंहासने समासीनं रुद्रतत्त्वविशेषज्ञं पञ्चवक्त्रं नाम महान्तम् श्रीशिवाचार्यं समुपसृत्य साष्टाङ्गं प्रणमन्तः यकारप्रणवार्थं प्रार्थयन्तः पप्रच्छुः। प्रीतिप्रमुख वनोपदेशेन प्रीतः शिवाचार्यः यकारप्रणवस्य षोडशअर्थान् तान् प्राबोधयत्— १. व्योम-तत्त्वम् २. देवः - सदाशिवः ३. उन्मनी शक्तिः ४. आधारः-व्योम ५. जगतीच्छन्दः ६. ऋषिः- भारद्वाजः ७. स्थानम् - ऊर्ध्वमुखम् ८. ईशानः ब्रह्म ९. आयुधम् - शूलम् १०. शान्त्यतीता कला ११. गुणः-शून्यः १२. चतुरस्रंचक्रम् १३. चन्द्रकान्तमणिः प्रकाशः १४. करणं-प्रकृतिः १५. समानः वायुः १६. ज्ञानेन्द्रियं श्रोत्रम् चेति।

तदेवं नमः शिवायेति पञ्चाक्षरमन्त्रस्य एकैकमक्षरं स्वातन्त्र्येण मन्त्ररूपतां विभर्ति।।१०५-११८।।

## ।।पञ्चाक्षरमन्त्रोपदेशः।

### ।।पञ्चाक्षरो मूलमन्त्रः।।

पञ्चानामक्षराणां च बुद्ध्वा विस्तारमेव च।
दैत्यादयः पुनः सर्वे प्रार्थयामासुरीदृशम्।।११९।।

ज्ञानपीठेश भो शम्भो मूलमन्त्रस्य जापक।
विस्तरो ह्यक्षराणां तु ज्ञातश्चास्माभिरेव च।।१२०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पञ्चाक्षरो महामन्त्रः मूलमित्युच्यते किल।
मूलमन्त्रं समूलं हि श्रोतुकामा वयं खलु।।१२१।।

दैत्यानां रक्षसां चैव गन्धर्वाणां तथैव च।
जिज्ञासां सम्यगाकर्ण्य पञ्चवक्त्रो महागुरुः।।१२२।।

बभाषे शान्तया वाचा सर्वानुद्दिश्य वै किल।
अदीक्षितायनोदेयो मन्त्रोऽयं सुमहान् किल।।१२३।।

लब्धदीक्षा हि यूयं भो धन्यभागा न संशयः।
अतः प्रकथ्यते सर्वं भगवद्भक्तिगौरवात्।।१२४।।

सप्तकोटिमहामन्त्रा विद्यन्ते लोकपावनाः।
अधिष्ठातृत्वभेदेन भिन्नभिन्नाःप्रकीर्तिताः।।१२५।।

तेषु सर्वेषु वै दैत्याःशैवा एकादश स्मृताः।
तत्राघोरो महामन्त्रः सर्वाभीष्टप्रदायकः।।१२६।।

तस्मादपि महान्प्रोक्तो शैवःपञ्चाक्षरःखलु।
अस्य मन्त्रस्य चैवान्ये उपमन्त्राःप्रकीर्तिताः।।१२७।।

साङ्गा वेदाः पुराणानि मन्त्राश्च बहवस्तथा।
आगमा विविधा एव विद्यास्थानानि यानि च।।१२८।।

पञ्चाक्षरे विलीयन्ते निर्गच्छन्ति पुनस्ततः।
अतः पञ्चाक्षरो मन्त्रो मूलमित्युच्यते किल।।१२९।।

दैत्यादयः पञ्चाचार्यैः समनुगृहीताः विज्ञातपञ्चाक्षरप्रत्यक्षरार्थाः पञ्चाक्षरमनोः मूलमन्त्रत्वं जिज्ञासमानाः ज्ञानसिंहासनासीनं श्री शिवाचार्यं सप्रह्वीभावं सप्रभेदं मूलमन्त्रस्वरूपं प्रबोधयितुं पप्रच्छुः। सम्प्रार्थितः सद्गुरुः सम्प्राप्तवीरशैवधर्मदीक्षान् अनुगृह्णन् उवाच— सप्तकोटिसंख्याकाः लोकपावनाः महामन्त्राः अधिष्ठातृभेदेन अन्योन्यभिन्ना राजन्ते। एतेषु मनोषु एकादशमहामन्त्राः शैवा राजन्ते। एकादशसु मन्त्रेषु अघोरमन्त्रः सर्वाभीष्टप्रदः महामन्त्रो विशिष्यते। एतस्मादपि महान् विद्यते शैवः पञ्चाक्षरो मन्त्रः। अस्यैवशैवा पञ्चाक्षरस्य बहवः उपमन्त्र भूताः सर्वेऽन्ये मन्त्राः विज्ञेयाः। वेदाः वेदाङ्गानि पुराणानि विविधाः आगमाः विद्यास्थानानि पञ्चाक्षरमन्त्रभिन्नाः समेऽपि मन्त्राः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रतिकल्पं शैव पञ्चारमन्त्राल्लब्धात्मभावाः स्थितिं भुञ्जानाः तत्रैव च कल्पान्ते लीनतां व्रजन्ति। ततश्च पञ्चाक्षरमनोः मूलमन्त्रत्वं सुस्पष्टमाभाति।।११९-१२९।।

## ।।मूलमन्त्रस्वरूपं माहात्म्यं च।।

आयासबहुलाःसर्वे मन्त्राःशास्त्रे प्रकीर्तिताः ।<br>
अस्य सिद्ध्या हि सिद्ध्यन्ति ह्यन्ये सर्वेपि तत्क्षणे।।१३०।।

अल्पाक्षरसमायुक्तो ह्यधिकार्थप्रबोधकः।<br>
सारात्सारतरः शैवो मन्त्रो मोक्षप्रदायकः।।१३१।।

आद्यबीजमिदं प्रोक्तं विद्यानामप्यशेषतः।<br>
सूक्ष्मात् सूक्ष्मतरं चैव वटबीजं यथा भुवि।।१३२।।

पञ्चाक्षरो महामन्त्रःशिवशब्दसमन्वितः।<br>
शिवस्य वाचकोऽयं हि सर्वश्रुतिशिरोगतः।।१३३।।

पृथिव्यादीनि भूतानि पञ्चतन्मात्रकाणि च।<br>
ज्ञानेन्द्रियाणि सर्वाणि तथा कर्मेन्द्रियाणि च।।१३४।।

बहुनात्र किमुक्तेन पञ्चधा यानि सन्ति च।<br>
तानि सर्वाणि बोध्यानि पञ्चाक्षरमयानि हि।।१३५।।

वदेत्पूर्वं नमःशब्दं यान्तं शिवपदं ततः।<br>
एष पञ्चाक्षरः प्रोक्तःश्रुतीनां शिरसि स्थितः।।१३६।।

यथा शम्भुर्महादेवः संसारक्षयकारकः।<br>
तथा पञ्चाक्षरो मन्त्रः संसारभयमोचकः।।१३७।।

अयं पञ्चाक्षरो मन्त्रः प्रणवेन षडक्षरः।<br>
स्थूलेन सूक्ष्मरूपेण साक्षादेव शिवः खलु।।१३८।।

ऊंकारः शिवदेहःस्यादक्षरार्थो विविच्यते।<br>
सद्योजातो नकारश्च मकारो वामदेवकः।।१३९।।

अघोरश्च शिकारःस्यात् वाकारःपुरुषःकिल।<br>
ईशानश्च यकारः स्याच्छिवरूपः षडक्षरः।।१४०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्थूलरूपमिदं प्रोक्तं सूक्ष्मं तु श्रूयतां किल।
नकारःसत्यरूपःस्यात् चिद्रूपो हि मकारकः।।१४१।।

आनन्दःस्याच्छिकारस्तु वाकारो नित्यवाचकः।
यकारःपरिपूर्णःस्यान्मिश्रात्मा प्रणवो भवेत्।।१४२।।

नकारःस्यात् क्रियाशक्तिर्ज्ञानशक्तिर्मकारकः।
इच्छाशक्तिःशिकारःस्यादादिशक्तिश्च वाक्षरः।।१४३।।

यकारस्तु पराशक्तिःप्रणवो हि चिदात्मकः।
सर्वशक्तिस्वरूपोऽयं षडक्षरमहामनुः।।२४४।।

एवं षडात्मकं सर्वं षडक्षरसमुद्भवम्।
अतो ह्ययं महामन्त्रःब्रह्मतत्त्वात्मकं खलु।।
चतुर्णामपि वेदानां सारात्सारतरः खलु।।१४५।।

पञ्चाक्षराद् मत्राद् भिन्ना ये मन्त्राः ते आयासबहुलाः अतएव क्लेशोपास्याः सन्ति। पञ्चाक्षर मन्त्रस्तु आयासरहितः शिवशिवाचार्यलभ्यः मन्त्रमूलं चकास्ति। अस्य सिद्ध्या अन्येषां तन्मूलानां समेषां मन्त्राणां सिद्धिः संजायते। अल्पाक्षरः सर्वार्थसाधकः सर्वार्थप्रबोधकः सारात् सारतरः शैवो माहमन्त्रः चरमं मोक्षपुरुषार्थमपि जपद्भ्यः समुपलम्भयति। सर्वेषां शाखा-मूलाग्रपत्रपल्लवादीनाम् अन्योन्यभिन्नानामप्यवयवानां समुदायो वटवृक्षः विशाल एकोऽवयवी प्रथते। भुवि विस्तृतं वटवृक्षं प्रति बीजं सूक्ष्मादपि सूक्ष्मं सर्वलोकविदितं कारणं भवति तथैव नानाभेदोपभेदबृंहितानां समासां विद्यानां किल आद्यं बीजं पञ्चाक्षरमनुरिति शास्त्रप्रवेद्यमानाति। शिवशब्दसमन्वितः पञ्चाक्षर मन्त्रः शिवमहार्थप्रतिपादकः सर्वतन्त्रवेदश्रुतिशिरोभागात्मतया स्थितः संराजते।।१३०-१४५।।

षडक्षरो महामन्त्रो मन्त्रराजः प्रकीर्तितः।
पापघ्नः सर्वजीवानामात्मज्ञानप्रकाशकः।।१४६।।

पर्वतानां यथा मेरुः सरसां सागरो यथा।
नदीनां हि यथा गङ्गा पशूनां गौर्वरा खलु।।१४७।।

मणीनां कौस्तुभो यद्वद्धातूनां काञ्चनं यथा।
यथाश्वत्थो हि वृक्षाणां मुनीनां नारदो यथा।।१४८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ऐरावतो गजेन्द्राणां नराणां च नराधिपः।
तथा षडक्षरो मन्त्रो मन्त्रेषु प्रवरः खलु।।१४९।।

सुमहान् महिमा ह्यस्य महादेवेन बोधितः।
अतः सर्वान् परित्यज्य मन्त्रराजं समाश्रयेत्।।१५०।।

द्रष्टास्य वामदेवश्च पङ्क्तिश्छन्द उदाहृतम्।
शिवो हि देवता ह्यस्य प्रणवो बीजमुच्यते।।१५१।।

नमःशक्तिरितिप्रोक्ता शिवायेति हि कीलकम्।
मोक्षे च विनियोगस्तु न्यासश्चैव षडक्षरैः।।१५२।।

एतज् ज्ञात्वा तु जप्तव्यं महामन्त्रस्त्वहर्निशम्।
चिन्तयन् खलु मन्त्रार्थं मनस्येव सदा किल।।१५३।।

त्रिविधो हि जपः प्रोक्तो वाचिकः स्यादुपांशुकः।
तृतीयो मानसः श्रेष्ठः सद्यो मुक्तिप्रदायकः।।१५४।।

सकृदुक्त्वा महामन्त्रं लिङ्गे पुष्पं विनिक्षिपेत्।
सर्वयज्ञफलं लब्ध्वा मुक्तिमाप्नोति भक्तिमान्।।१५५।।

वामहस्तस्थितं लिङ्गं सम्पश्यन् हि निरन्तरम्।
जपेद् यस्तु महामन्त्रं स शिवो नात्र संशयः।।१५६।।

मन्त्रेणानेन संसिद्धा ब्रह्मविष्णुहरात्मकाः।
लब्धवन्तो हि सामर्थ्यं जगत्सृष्ट्यादिकर्मणि।।१५७।।

शिवनाममणिर्यस्य कण्ठे खलु विराजते।
नीलकण्ठः स विज्ञेयः नास्ति नास्त्यत्र संशयः।।१५८।।

यस्तु नामामृतं पीत्वा तृप्तो भवति भूतले।
न कदापि पिबेदेव स मातुः स्तन्यमेव च।।१५९।।

बिल्ववृक्षस्य सान्निध्ये निराहारी दिनत्रयम्।
लक्षवारं जपन् मर्त्यः पातकात् प्रविमुच्यते।।१६०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



नद्यां सरोवरे वापि निमज्जन् भक्तिमान् नरः।
अष्टकृत्वो जपन् मन्त्रं पापमुक्तो भविष्यति।।१६१।।

सदा जपन् महामन्त्रं कुरुते सर्वकर्म वै।
यमभीतिर्न तस्यास्ति शिवस्यादेशतः किल।।१६२।।

यो जपेत्सर्वदा मन्त्रं तन्मुखं तीर्थमुच्यते।
लभते दर्शनेनास्य तीर्थस्नानफलं जनः।।१६३।।

लिङ्गं भस्म च रुद्राक्षं शरीरे धारयन् सदा।
जपेद् यो वा महामन्त्रं तत् कायः क्षेत्रमुच्यते।।१६४।।

तत्कायदर्शनेनापि लभन्ते सर्वजीविनः।
क्षेत्रयात्राफलं चैव नास्ति नास्त्यत्र संशयः।।१६५।।

गुरोःशास्त्रस्य वै निन्दां कुर्वाणः सततं खलु।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१६६।

नाम्नो हि महिमानं च श्रुत्वापि भक्तिवर्जितः।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१६७।।

भेदबुद्धिं विधायैव सर्वदेवेषु वै किल।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१६८।।

ममकारशतैर्बद्धो ह्यहंकारेण तुन्दिलः।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१६९।।

श्रद्धाहीनजनानां च सङ्गे हि निवसन्किल।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७०।।

उष्णीषं कञ्चुकं चैव पूजायां परिधाय च।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७१।।

नग्नो वा मुक्तकेशो वा पूजाकाले भवेद्यदि।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कामक्रोधादिकं चैव मनस्येव निधाय च।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७३।।

क्षुत्पिपासातुरो वापि तन्द्रितो वा सदा किल।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७४।।

अश्नुवानः शयानश्च गच्छन्नुत्थित एव वा।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७५।।

रथ्यायामशिवे चैव स्थाने चैवोपविश्य च।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७६।।

पादौ प्रसार्य वा भूमौ कुक्कुटासन एव वा।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७७।।

यानशय्याधिरूढो वा चिन्ताव्याकुलितोऽपि वा।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७८।।

कृतघ्नश्च महापापी पिशुनो मांसभक्षकः।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१७९।।

दाम्भिको नास्तिको वापि विषयग्रस्तमानसः।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१८०।।

दुष्टचित्तो दुराचारी चञ्चलो व्रतनिन्दकः।
जपन्नपि महामन्त्रं लभते नैव तत्फलम्।।१८१।।

प्रणवाद्यः षडक्षरः मन्त्रराजः पर्वतानां सुमेरुरिव मणीनां कौस्तुभ इव मन्त्रेषु प्रवरः अस्ति— इत्येव महादेवेन प्रतिपादितमहिम्नः मन्त्रराजस्य एव आश्रयणं विधेयम्।

अस्य मनोः द्रष्टा वामदेवः, छन्दः पङ्क्तिः, शिवः देवता प्रणवः बीजं, नमः शक्तिः, कीलकम् शिवाय, न्यासः षडक्षरैः, विनियोगः मोक्षे इति एतज्ज्ञानपुरःसरं सदा मननपुरःसरं जपो विधेयः। वाचिकः उपांशुः मानसश्चेति जपः त्रिविधः भवति। यः भक्तः महामन्त्रं सकृदुच्चरन् लिङ्गे पुष्पम् अर्पयति सः सर्वयज्ञफलं प्राप्य मुक्तिमपि अधिगच्छति। वामहस्तस्थितम् इष्टलिङ्गं भावेन पश्यन् महामन्त्रं जपन् भक्तः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिवो भवेत्। यस्य कण्ठे शिवनाममणिः राजते सः भगवान् नीलकण्ठः इति बुद्ध्या समादृतो भवति। नामामृतपायी पुनः मातुः स्तन्यं न लभते। बिल्ववृक्षसन्निधौ नद्यां सरोवरे वा मन्त्रं जपतः भक्तस्य पापमुक्तिः भवति यमभीतिश्च पलायते। लिङ्गभस्मरुद्राक्षधारिणः जपतः भक्तस्य कायः तीर्थक्षेत्रम् इव पुण्यमयः भवति। जपे भक्तिः आवश्यकी, भेदबुद्धिः अहंकारः ममकारश्च सर्वथा त्याज्यः, कामक्रोधादिवर्जं कृतघ्नतां परिहरन् भक्तः महामन्त्रं जपेत्॥१४६-१८१॥

## ॥जपस्थानानि॥

सूर्यस्याग्नेःप्रदीपस्य गुरोरिन्दोर्जलस्य च।
जङ्गमानां गवां चैव सन्निधौ शस्यते जपः॥१८२॥

गृहे गोष्ठे तथारामे पुण्यारण्ये तथैव च।
पर्वते च नदीतीरे ह्यालये शिवसन्निधौ॥१८३॥

जपन् भक्तो महामन्त्रमुत्तरोत्तरतः खलु।
विन्दते हि फलं तस्य वृद्ध्या शतगुणेन च॥१८४॥

वामहस्तस्थितं लिङ्गं संपश्यन् जपतः किल।
पातकानि पलायन्ते कल्पकोटिकृतानि च॥१८५॥

## ॥जपस्य दिशानिर्देशः॥

पूर्वास्ये स्याद्वशीकारो याम्ये च मारणादिकम्।
पश्चिमे च धनप्राप्तिः शान्तिरुत्तरतो भवेत्॥१८६॥

## ॥अङ्गुलीनां विशेषता॥

अङ्गुल्या रेखया चैव पुत्रजीवैश्च शंखकैः।
प्रवालैःस्फाटिकैरेव सौवर्णैर्मौक्तिकैरपि॥१८७॥

पद्माक्षैश्च कुशैश्चैव रुद्राक्षैरपि शोभनैः।
जपस्तु विहितः शास्त्रे तूत्तमो ह्युत्तरोत्तरम्॥१८८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अङ्गुष्ठं मोक्षदं प्रोक्तं तर्जन्या शत्रुनाशनम्।
मध्यमेन धनप्राप्तिः शान्तिदा च ह्यनामिका।।१८९।।

कनिष्ठाऽऽकर्षणे प्रोक्ता जपकर्मणि वै किल।
अङ्गुष्ठः सर्वदा ग्राह्यस्तद्विना निष्फलं भवेत्।।१९०।।

## ।।अक्षमालाप्रकाराः।।

अर्थार्थी त्रिंशदक्षैश्च मोक्षार्थी पञ्चविंशकैः।
सप्तविंशतिसंख्याकैः पुष्टिकामो जपेत् सदा।।१९१।।

अभिचारक्रियायां तु ह्यक्षाः पञ्चदशेरिताः।
आगमोक्तविधानेन ह्यक्षमालाः प्रकीर्तिताः।।१९२।।

## ।।पुरश्चरणविधिः।।

मन्त्रस्यास्य हि सिद्ध्यर्थं पुरश्चरणमाचरेत्।
तदर्थं निष्ठया चैव षडक्षरमहामनुम्।।१९३।।

जपेदक्षरलक्षं वै चतुर्गणितमादरात्।
ततो दशांशभागेन तर्पणं हवनं तथा।।१९४।।

ततस्तु तद्-दशांशेन भोजयेज् जङ्गमान् किल।
ततः सिद्धमिमं मन्त्रं जपेन्नित्यमतन्द्रितः।।१९५।।

एवं कृत्वा जपन् मन्त्रं सर्वसिद्धिप्रदायकम्।
ततो निर्धूय पापानि शिवलोके महीयते।।१९६।।

## ।।मन्त्रो महारक्षकः।।

साधकानां हि रक्षार्थं आवरणं किलाष्टकम्।
प्रोक्तं महाशिवेनैव लोककल्याण-हेतवे।।१९७।।

गुरुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकम्।
भस्मरुद्राक्षमन्त्राश्चेत्यष्टावरणसंज्ञिताः ।।१९८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गुरुर्दीक्षाप्रदानेन लिङ्गं तत्पूजया खलु।
जङ्गमश्चोपदेशेन सेवनेनोदकं तथा।।१९९।।

प्रसादोऽपि तथैव स्यात् भस्मरुद्राक्षकौ किल।
शरीरे धारणेनैव सदा रक्षन्ति वै खलु।।२००।।

मन्त्रस्तु मननेनैव साधकं परिरक्षति।
अतो मत्वा तु मन्त्रार्थं जपेन्मन्त्रन्तु भक्तितः।।२०१।।

एतान्यष्ट सुरक्षन्ति साधकं तमहर्निशम्।
अत एव प्रकथ्यन्ते ह्यावरणपदेन तु।।२०२।।

रक्षका बहवः सन्ति स्थूलदेहादिकस्य च।
एक स्त्वेव महामन्त्रः स्थूलसूक्ष्मसुरक्षकः।।२०३।।

जले स्थले तथा चैव ह्यग्निमध्ये भयंकरे।
शत्रुमध्ये रणे चैव हिंसकानां हि संकुले।।२०४।।

व्याधीनां चैव चाधीनां पीडासु विविधासु च।
एको हि रक्षको मन्त्रो भक्तानामभयप्रदः।।२०५।।

## ।।मन्त्रार्थविषये दैत्यानां प्रार्थना।।

मन्त्रस्य महिमानं च श्रुत्वा तुष्टा हि दानवाः।
पुनस्ते प्रार्थयामासुर्विनयेन महागुरुम्।।२०६।।

मन्त्रस्य महिमा ह्यस्य विधानं च जपस्य तु।
विस्तरेण च तज्ज्ञानं मन्त्रार्थं नः प्रबोधय।।२०७।।

मन्त्रस्य वाचिकं चैव तस्य लाक्षणिकं तथा।
अर्थं संबोध्य भो देव भूयसानुग्रहं क्रियाः।।२०८।।

दैत्यानां रक्षसां चैव मन्त्रार्थविषये किल।
जिज्ञासां सम्यगाकर्ण्य पञ्चवक्त्रो महागुरुः।।२०९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रसन्नवदनो भूत्वा करुणार्द्रो महामतिः।
बभाषे शान्तया वाचा शिवं ध्यायन् मुहुर्मुहुः।।२१०।।

## ।।प्रणवार्थनिरूपणम्।।

वाच्यलक्ष्यविभेदेन सर्वशास्त्रेषु वै किल।
अर्थो हि द्विविधः प्रोक्तः श्रुणुतैव समाहिताः।।२११।।

षडक्षरे महामन्त्रे प्रणवो ह्यादिमो मतः।
पद्मोद्भवस्य कण्ठाद्धि विनिर्यातः पुरा किल।।२१२।।

शिवशब्दो यथाऽर्थस्य शिवस्य वाचको मतः।
प्रणवोऽपि तथैवास्य वाचकः परिकीर्त्यते।।२१३।।

नूयते हि परं ब्रह्म प्रकर्षेण यथा खलु।
ऊँकारः कथ्यते तद्वत् प्रणवशब्दतो महान्।।२१४।।

नौरियं प्रणवाख्या हि संसारात् सुमहोदधेः।
तारिका सर्वजीवानां जपतां भवरोगिणाम्।।२१५।।

प्रशब्दस्तुप्रपञ्चार्थो णशब्दोऽस्तित्वबाधकः।
वो नाम युष्माकं बोध्यं प्रणवस्त्र्यक्षरात्मकः।।२१६।।

श्रद्धया जप्यमानोऽयं प्रणवस्तु निरन्तरम्।
जपतः स्वप्रभावेण प्रपञ्चं सम्प्रबाधते।।२१७।।

अन्त्यकाले च यो भक्तः स्मरेदेकाक्षरं मनुम्।
नैव तस्य पुनर्जन्म नैव नैवेति निश्चितम्।।२१८।।

सूर्यस्य अग्नेः प्रदीपस्य गुरोः चन्द्रस्य जलस्य जंगमस्य गोः वा सन्निधौ कृतः जपः प्रशस्यते। गृहे गोष्ठो आरामे पुण्यारण्ये पर्वते नदीतीरे मन्दिरे शिवसन्निधौ कृतस्य महामन्त्रजपस्य उत्तरोत्तरं शतगुणं फलं प्राप्यते। वामकरस्थं लिङ्गं पश्यतः जपतः कल्पकोटिकृतानि पापानि विनश्यन्ति।

पूर्वाभिमुखः वशीकाराय, दक्षिणाभिमुखः मारणाय, पश्चिमाभिमुखः धनलाभाय,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



उत्तराभिमुखः शान्त्यै जपो भवति— अङ्गुलिः, रेखा, पुत्रजीवः, शङ्खः, प्रवालः, स्फटिकः, सुवर्णः, मुक्तिका, पद्माक्षः, कुशः रुद्राक्षश्येति।

जपकर्मणि अङ्गुष्ठः सर्वदा ग्राह्यः। तत्र अङ्गुष्ठस्य मोक्षप्रदता, तर्जन्याः शत्रुनाशिता, मध्यमायाः धनप्राप्तिः अनामिकायाः शान्तिप्रदता, कनिष्ठायाः आकर्षणं च फलं प्रतिपाद्यते।

त्रिंशदक्षैः अर्थावाप्तिः, पञ्चविंशकैः मोक्षप्राप्तिः, सप्तविंशतिकैः पुष्टिसंप्राप्तिः, पञ्चदशकैः अभिचारक्रिया इति शास्त्रेषु प्रतिपाद्यते।

पुरश्चरणविधिना षडक्षरमन्त्रस्य सिद्धिः जायते। तत्र चतुर्विंशतिलक्षजपं विधाय दशांशेन तर्पणं हवनं च विधाय तद्दशांशेन जंगमभोजनं सम्पाद्य मन्त्रसिद्धिं कुरुते साधकः। अथ मन्त्रं जपन् पापानि विधुनोति, सर्वां सिद्धिम् अवाप्नोति, अथ शिवलोके महीयते।

मन्त्रः साधकं यथा रक्षेत् तथा तस्य अष्ट आवरणानि शिवेन प्रोक्तानि— (१) गुरुः (२) लिङ्गम् (३) जङ्गमः (४) तीर्थम् (५) प्रसादकम् (६) भस्म (७) रुद्राक्षः (८) मन्त्रः। दीक्षया गुरुः, पूजया इष्टलिङ्गम्, उपदेशेन जङ्गमः सेवनेन उदकम् प्रसादश्च, धारणेन भस्म रुद्राक्षश्च, मननेन मन्त्रः साधकं परितः रक्षति अतः एतेषाम् आवरणसंज्ञा भवति। महामन्त्रः सूक्ष्मतया स्थूलतया च सर्वत्र जले स्थले अग्निमध्ये शत्रुमध्ये रणमध्ये हिंसकमध्ये व्याधिमध्ये आधिमध्ये पीडामध्ये च अभयदानेन च भक्तस्य रक्षां विदधाति।

सपरिकरं मनुमहिमानं विदित्वा दीक्षिताः दैत्यादयः पञ्चवक्त्रं श्रीशिवाचार्यं वाचिकं लाक्षणिकं च अर्थं प्रपच्छुः। श्रीशिवाचार्यः मन्त्रस्य उभयविधम् अर्थं तान् प्रबोधयामास। तद्यथा—

महामन्त्रे प्रणवः आदिमः। आद्यः वर्णः ब्रह्मणः कण्ठाद् पुरा विनिर्गतः आसीत्। सोऽयं शिव शब्दस्य इव शिवस्य वाचकः भवति। नूयते — प्रकर्षेण स्तूयते, शिवः येन असौ प्रणवः। संसारमहार्णवात् जपतो जीवस्य तारणेन प्रणवः नौः = नौका इति कथ्यते। प्रणवः इत्यत्र प्र शब्दः प्रपञ्चबोधकः, णशब्दः अस्तित्वबाधबोधकः, वशब्दस्तु बोध्यार्थसमर्पकः। यः श्रद्धया प्रणवं जपति, तस्य प्रपञ्चः स्वातन्त्र्येण किञ्चिदपि अस्तित्वं नैवास्तीति विदितं भवति। यः भक्तः अन्त्यकाले एकाक्षरं मन्त्रं जपति तस्य पुनर्जन्म नैव भवति॥१८२-२१८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।पञ्चाक्षरस्यार्थनिरूपणम्।।

पञ्चाक्षरे महामन्त्रे सन्ति पञ्चाक्षराणि हि।
तत्रस्थमक्षरद्वन्द्वं शिवशब्दाभिधेयकम्।।२१९।।

शिवशब्देन तेनैव मुख्यवृत्त्या हि वै किल।
बोध्यते हि परब्रह्म यज्ज्ञात्वा मुच्यतेऽशुभात्।।२२०।।

शिवमिच्छति जीवानां तस्माच्च शिव उच्यते।
गुणानां शोभनत्वाच्च शिव इत्युच्यते बुधैः।।२२१।।

प्रलये सर्वजीवानां शयनस्थानमेककम्।
तदेव हि परब्रह्म शिव इत्यभिधीयते।।२२२।।

मूलतः परिशुद्धत्वात् मलत्रयवियोगतः।
शिव इत्युच्यते ब्रह्म सर्वकारणकारणम्।।२२३।।

चतुर्णामपि वेदानामाद्यक्षरविनिर्मितम्।
शिव इत्यक्षरद्वन्द्वं द्वन्द्वातीतं परं पदम्।।२२४।।

शिवशब्दस्य तत्त्वार्थो बोधितः सारतः किल।
श्रूयतां सावधानेन नमःशब्दमितः परम्।।२२५।।

मन्त्रस्थो हि नमःशब्दो जीववाची निगद्यते।
अयेतीति पदेनैव ह्यैक्यमुक्तं शिवागमे।।२२६।।

महावाक्येन वेदेषु यथैक्यं हि प्रबोध्यते।
पञ्चाक्षरेण तेनैव तथैवोक्तं शिवागमे।।२२७।।

एवं पञ्चाक्षरो मन्त्रः शिवजीवैक्यबोधकः।
तज्जपेनापि जीवो हि जीवन्मुक्तो भविष्यति।।२२८।।

## ।। उपसंहारः।।

महामन्त्रस्वरूपं च तथैव प्रणवस्य च।
अक्षरार्थं च मन्त्रस्य विधिं चैव जपस्य च।।२२९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अक्षमालाविधानं च माहात्म्यं तज्जपस्य च।
अङ्गन्यासादिकं चैव तत्प्राप्यं फलमेव च।।२३०।।

एवं तन्मन्त्रसाहित्यं पञ्चवक्त्रगुरोः किल।
मुखपद्माद्विनिर्यातं श्रुत्वा दैत्यादयस्तदा।।२३१।।

प्रह्वीभावकृतार्थाभ्यां प्रणमन्तः पुनःपुनः।
कण्ठेन स्तम्भितेनैव प्रार्थयामासुरीदृशम्।।२३२।।

वयं धन्या वयं धन्याः कुलमस्माकमेव च।
धन्यं धन्यं हि संजातम् भवतो ह्युपदेशतः।।२३३।।

आचार्यैःपञ्चकैरेव दीक्षिता बोधिता वयम्।
यथा भवद्भिरादिष्टमाचरामो तथैव च।।२३४।।

इत्येवं निष्ठया सर्वे संकल्प्य गुरुसन्निधौ।
सन्तृप्तेनैव भावेन जग्मुर्लोकं स्वकं स्वकम्।।२३५।।

गणाश्च ह्येकवक्त्राद्या त्रेतायां भूतले किल।
वीरशैवमहाधर्मं संस्थाप्य सुशिवाज्ञया।।२३६।।

संचरन्तो हि सर्वत्र ह्युद्धरन्तस्तुमानवान्।
अवाप्तुं शिवसान्निध्यं यतमाना गणाधिपाः।।२३७।।

प्राकट्यस्थानमागत्य प्रार्थयित्वा महेश्वरम्।
स्त्रोतोलिङ्गं प्रविश्याथो कैलासं पुनराययुः।।२३८।।

दैत्यानथ च गन्धर्वान् सर्वानुद्धृत्य वै किल।
आगतान् स्वगणान्सर्वान् दृष्ट्यास्नेहं प्रवर्षयन्।।२३९।।

सदाशिवःसमुत्थाय सर्वानालिङ्ग्य प्रीतिदः।
सभायां शिवकैलासे ह्यग्रस्थानं ददौ विभुः।।२४०।।

पञ्चाचार्यगुरूणां ये चारित्र्यं पावनं शिवम्।
पठन्ति श्रद्धया भक्त्या सद्गतिं यान्ति ते ध्रुवम्।।२४१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पञ्चाक्षरे महामन्त्रे शिवशब्दः (शिव इति अक्षरद्वन्द्वम्) शिवब्रह्म बोधयति। यः जीवानाम् शिवम् इच्छति सः शिवः। कल्याणगुणानाम् आश्रयः शिवः कथ्यते। प्रलये यत्र सर्वं जीवजगत् शेते तद् ब्रह्म शिव इत्युच्यते। यः अनादिकालात् मलत्रयशून्यः परिशुद्धश्च विद्यते स शिवः सर्वकारणकारणं ब्रह्म कथ्यते। चतुर्णां वेदानाम् आद्यक्षरेण निर्मितः शिवशब्दः द्वन्द्वातीतं भगवन्तं शिवं परमप्रतिपाद्यं बोधयति। तत्र नमः शब्दः जीववायी विद्यते। शिवाय इत्यत्र यत् अयेति पदं, तत् जीवशिवयोः ऐक्यं बोधयति। यथा— प्रज्ञानं ब्रह्मेत्यादि महावाक्यचतुष्टयेन जीवस्य शिवब्रह्मणश्च ऐक्यं बोधयति तथैव पंचाक्षरमन्त्रेण शिवजीवयोः ऐक्यं विधीयते। तदेवम् पञ्चाक्षरशिवमन्त्रजपेन जीवस्य जीवन्मुक्तिः सुप्रापा भवतीति निष्कर्षः।

महामनोः स्वरूपम् अर्थः जपादिविधिं च श्रीशिवाचार्यमुखपद्माद् विज्ञाय धन्यधन्याः प्राप्तदीक्षाः दैत्यादयः धर्माचारं सदैव विधास्थामः इति प्रतिश्रुत्य श्रीगुरुं मुहुर्मुहुः प्रणमन्तः स्वं स्वं लोकं जग्मुः। अथ शिवाज्ञया त्रेतायां भूतले वीरशैवधर्मदर्शनं प्रबोधयामासुः। अनन्तरं स्वं स्वं प्राकट्यस्थानं तत् तत् लिङ्गम् अनुप्रविश्य महेश्वरं प्रार्थयन्तः कैलाशम् आजग्मुः। भगवान् सदाशिवः तान् प्रीतः आलिङ्ग्य शिवकैलाशे सभायाम् अग्रस्थानं दत्वा प्रमुमोद।

यः नरः भक्त्या पञ्चाचार्यगुरूणां पावनं चरित्रं शृणोति गायति श्रावयति वा सः नूनं सद्गतिं लभते॥२१९-२४१॥

## हिन्दी तात्पर्य

## त्रेता युग का इतिहास

प्रणवसहित "ओम् नमः शिवाय" को शास्त्रों में महामन्त्र एवम् मन्त्रराज शब्दों से समादृत किया जाता है। यह सर्वविध पापों का प्रशमन करता है तथा समस्त जीवों को आत्मज्ञान से प्रकाशमान कर उन्हें विभूषित करता है। पर्वतों में सुमेरु, जलराशियों में सागर, पुण्यसलिलाओं में गङ्गा, पशुवर्ग में गौ, मणियों में कौस्तुभ, धातुओं में सुवर्ण, वृक्षों में अश्वत्थ, मुनिजन में नारद, गजेन्द्रों में ऐरावत, मानवों में नराधिप, की तरह मन्त्रों में पञ्चाक्षर की श्रेष्ठता लोकशास्त्र विदित है. अनुत्तरमहात्म्य शिवानुमोदित होने से इस मन्त्रराज का आश्रय लेना श्रेयस्कर है। इस पञ्चाक्षर महामन्त्र के द्रष्ट वामदेव हैं, पंक्ति छन्द, शिव-देवता, प्रणव-बीज, नमः शक्ति, शिवाय-कीलक से युक्त इस महामन्त्र का मोक्ष-पुरुषार्थ में विनियोग है। इसका षडक्षरों द्वारा किया जाता है। यह जानकर अहर्निश मन्त्रार्थ अनुशीलन के साथ मन्त्र जपना चाहिए। जप के तीन भेद हैं— वाचिक, उपांशु

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तथा मानस। कोई आस्थावान् भक्त एक बार महामन्त्र का उच्चारण करने के साथ शिवलिङ्ग पर पुष्प चढ़ाता है, वह सर्वयज्ञ का फल प्राप्त करता हुआ मुक्ति को भी प्राप्त कर लेता है। वामकरतल पर इष्टलिङ्ग को रखकर निष्पलक दृष्टि की एकाग्रता से महामन्त्र का जापक भक्त शिवसदृश पूज्य बन जाता है। इस मन्त्रानुष्ठान से सिद्धि प्राप्त ब्रह्मा, विष्णु एवं हर सामर्थ्यवान् बन कर जगत् की सृष्टि, स्थिति एवं संहार करते हैं। शिवनाम स्वरूप मणि के कण्ठस्थकृत् नीलकण्ठसाम्य को प्राप्त करता है। शिवनामामृत का रसपायी भक्त जीवन्मुक्त हो जाता है। फलस्वरूप उसे जन्म लेना (मातृस्तनपान करना) कष्ट झेलना–इन सबसे सदा-सदा के लिए छुटकारा मिल जाता है। विल्ववृक्ष के सान्निध्य में निराहार त्रिवदिवसीय लक्ष-जप करने से मर्त्यलोकवासी सर्वपापमुक्त हो जाता है। नदी अथवा तालाब में स्नानपुरः सर आठ बार महामन्त्र जप से सर्वपापमुक्ति होती है। निरन्तर महामन्त्र जपकृत् को यमभय से मुक्ति मिल जाती है। मन्त्र जापी का मुख तीर्थसम है। इसके दर्शनकृत् को तीर्थस्नान फल प्राप्त होता है। भस्म रुद्राक्षरधारी इष्टलिङ्ग कृत् जपशील का शरीर तीर्थक्षेत्र सम होता है। ऐसे भक्त के दर्शन से क्षेत्रयात्रा-फल प्राप्त हो जाता है। किन्तु जपकृत् गुरु शास्त्रनिन्दक हो तो वह निष्फल होता है। भक्तिशून्य अथवा देवों में भेदबुद्धि होने से जप निष्फल होता है। ममता अथवा अहन्ता होने से भी जपकृत् असफल रहता है। अश्रद्धालु के सङ्ग से शिरोवेष्टन से पूजाकाल में नग्न अथवा शिखाबन्धन के बिना जप निष्फल है। कामक्रोधधारी का जप निष्फल होता है। क्षुधा, प्यास, तन्द्रा के साथ जपनिष्फल होता है। गन्देगली एवम् अशुभ स्थान में जप निष्फल होता है। कुक्कुटासन अथवा पाँव फैलाकर, वाहन-शय्या में बैठकर किया गया जप कृतघ्न पापी, चुगलखोर एवं मांसभक्षी का जप निष्फल होता है। दम्भी, नास्तिक, विषयासक्त, दुष्ट, दुराचारी, चञ्चल, व्रतनिन्दक का जप निष्फल होता है।।१८२।।

सूर्य, अग्नि, प्रदीप, गुरु, चन्द्र, जल, जङ्गम, गौ की सन्निधि से जप प्रशस्त होता है। गृह, गोष्ठा आराम, पुण्यवन, पर्वत, नदीतीर, शिवालय एवं शिवसन्निधि में कियागया भक्तजप उत्तरोत्तर शतगुण जपफल प्राप्त करता है। वामकरतल पर स्थित इष्टलिङ्ग का दर्शनपुरःसर जप, कल्पकोटि कृत पापों को नष्ट कर देता है।।१८५।।

पूर्वाभिमुख, जप से वशीकार, दक्षिणाभिमुख से मारण, पश्चिमाभिमुख से धनप्राप्ति तथा उत्तराभिमुख से शान्ति प्राप्त होती है। अङ्गुलि, रेखा, पुत्रजीव, शंख, प्रवाल, स्फटिक, सुवर्ण, मुक्ता, पद्माक्ष, कुश, रुद्राक्ष, के सहारे कृत

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



जप उत्तरोत्तर उत्तम माना जाता है। अङ्गुष्ठ से मोक्ष, तर्जनी से शत्रुनाश, मध्यमा से धनप्राप्ति, अनामिका से शान्ति, कनिष्ठा से आकर्षण की प्राप्ति होती है। अङ्गुष्ठरहित जप सर्वथा निष्फल होता है।।१९०।।

धनप्राप्त्यर्थ ३० रुद्राक्षमाला से, मोक्षप्राप्त्यर्थ २५ रुद्राक्षमाला से पुष्ट्यर्थ २७ रुद्राक्षमाला से तथा अभिचार कर्म में १५ रुद्राक्ष-माला से जप करना चाहिए।।९२।।

मन्त्र को सिद्ध करने हेतु निष्ठापूर्वक षडक्षर महामन्त्र का पुरश्चरण चौबीस लाख जाप के साथ दशांश तर्पण-हवन-जङ्गमभोजन को आलस्य रहित करने से मन्त्रसिद्धि होती है।।१९६।।

साधकों के रक्षार्थ लोककल्याणकारी आठ आवरण होते हैं। गुरु, लिङ्ग, जङ्गम, तीर्थ, प्रसाद, भस्म, रुद्राक्ष एवम् मन्त्र। दीक्षा प्रदान से गुरु, पूजन से लिङ्ग, उपदेश से जङ्गम, सेवन से उदक एवम् प्रसाद, धारण करने से भस्म एवं रुद्राक्ष तथा मनन से मन्त्र सदा भक्त का संरक्षण करते हैं। स्थूल देहादि के रक्षक अनेक होते हैं किन्तु सूक्ष्म एवं स्थूल दोनों का जल-स्थल, अग्नि, शत्रु, हिंसक आधि-व्याधि पीड़-प्रभृति समस्त क्लेशों से रक्षा करने वाला अभयवरदायी शिव पञ्चाक्षर है।।२१०।।

सर्वशास्त्रकार की सम्मति है— पदार्थ वाच्य एवं लक्ष्य के भेद से दो प्रकार का होता है। षडक्षर शिवमन्त्र का आद्य अक्षर प्रणव ब्रह्मा के कण्ठ से उद्भूत है। शिव एवम् प्रणव, भगवान् शिव का बोधक है। ॐकार एवम् प्रणव पर्याय शब्द है। इन दोनों से परं ब्रह्म की प्रकृष्ट स्तुति की जाती है। प्र-शब्द से प्रपञ्च, ण-शब्द से अस्तित्व तथा व-शब्द से बाध बोध्य अर्थ ग्राह्य है— इस प्रकार तीन अक्षरों से युक्त प्रणव का श्रद्धापूर्वक जप करने से प्रणव-जप के प्रभाव से भक्त का प्रपञ्च, सदा-सदा के लिए नष्ट हो जाता है। जो भक्त अन्त्य समय में एकाक्षर मन्त्र का स्मरण करता है। उसका पुनर्जन्म नहीं होता।।२१८।।

पञ्चाक्षर के पाँच वर्णों के अर्थ हैं— शिव-शब्द से भगवान शिव का बोध होता है। समस्त जीवों का शिव-कल्याण चाहने वाले शिव कहलाते हैं। कल्याणगुणसम्पन्न होने से भगवान् को शिव कहा जाता है। प्रलयकाल में समस्त जीवनजगत् जिस पर ब्रह्म में शयन करता है वह शिव कहलाते हैं। अनादिकाल से मलत्रयरहित (सर्वथा परिशुद्ध) होने से भगवान् को शिव कहा जाता है। चार वेदों से आद्यक्षर योग द्वारा शिवशब्द निष्पन्न होता है। शिव-अक्षर द्वन्द्व, द्वन्द्वातीत परमपद का बोधक है। मन्त्र का नमः शब्द, जीववाची है। अय-पद से जीव एवं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिव के ऐक्य-अभेद का बोध होता है। प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्म, तत् त्वमसि, अहंब्रह्मास्मि— इन चार महावाक्यों से यथा जीवन्मुक्ति प्राप्त होती है तथैव पञ्चाक्षर-जप से भी जीवन्मुक्ति प्राप्त होती है।

इस प्रकार पञ्चवक्त्र शिवाचार्य से उपदेश ग्रहण कर कृतार्थ होकर दैत्यादिकों ने सन्तृप्त होकर सदाचार का व्रत गुरुसन्निधान में धारण कर पुनःपुनः प्रणाम करते हुए स्वस्वस्थान में चले गये। स्वकार्यसम्पादन के अनन्तर पञ्चाचार्यगण, प्राकट्य-स्थान शिवलिङ्गों में विलीन होकर कैलास में शिवचरणारविन्दों में आश्रयग्रहण किये। भगवान् शिव, पञ्चगणाचार्यों को हृदय से लगाकर उन्हें सभा में अग्र स्थान प्रदान किये। जो साधक पञ्चशिवाचार्यों के पावन चरित्र का मनन-स्मरण करते हैं वे सद्गति प्राप्त करते हैं।।२४१।।

।।इति तृतीयाध्यायः।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ चतुर्थाध्यायः ॥

## ।।द्वापरयुगीनमैतिह्यम्।।

## आचार्यरेणुकेन अगस्त्यमुनये पद्विधिसूत्रोपदेशः

पञ्चाननमुखोद्भूतान् पञ्चाक्षरमनूपमान्।
पञ्चसूत्रकृतान् वन्दे पञ्चाचार्यान् जगद्गुरून्।।१।।

ईशानमुखसञ्जातं ईशतत्त्वप्रबोधकम्।
दूर्वाशस्य गुरुं वन्दे विश्वकर्णं जगद्गुरुम्।। २।।

यथा युगद्वये पूर्वं गणैस्तु पञ्चभिः किल।
संभूय च महीभागे धर्मः संस्थापितो मुहुः।।३।।

तथैव द्वापरे चैव गणैस्तैर्भिन्ननामभिः।
समुद्भूय च लिङ्गेभ्यः धर्मः संस्थापितोऽभवत्।।४।।

रेणुको दारुकश्चेति घंटाकर्णश्च धेनुकः।
विश्वकर्णश्च नामानि द्वापरे कीर्तितानि च।।५।।

द्वापरे तु युगारम्भे कैलासे भगवान्भवः।
धर्मसंस्थापनार्थाय प्राहाहूय गणेश्वरान्।।६।।

नित्यमुक्ता भवन्तः स्युर्भवबन्धविधूनना:।
शिवाद्वैतमयं धर्मं स्थापयन्तु महीतले।।७।।

रेणुको दारुकश्चेति घण्टाकर्णश्च धेनुकः।
विश्वकर्णश्च पञ्चैते स्युराचार्यगणेश्वरा:।।८।।

पञ्चाचार्या इमे बुद्धेः शोधनं धर्ममार्गतः।
कुर्युरित्येवमादेशं पार्वतीशो व्यधाद् विभुः।।९।।

आदेशं शिरसा शम्भोः सन्धार्यैते गणेश्वराः।
प्राप्य भूमिं समाजग्मुराशिषं पार्वतीशयोः।।१०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रीकैलासाधिष्ठानो महाशिवो देवः श्रीमदविमुक्तरुद्रप्रार्थनया श्रीकाश्यां प्रकटितसज्ज्योतिः श्रीमदन्नपूर्णाजानिः श्रीविश्वेश्वरः सर्वलोकजनन्या स्कन्दमात्रा विश्वकल्याणहेतवे सम्प्रार्थितः स्वात्मसाक्षात्कार तत्स्वरूप परमशिवरूपमोक्षसदुपायमुपलम्भयितुं पञ्च गणेश्वरान् शैवतन्त्रार्थं समुपदिश्य तान् महीतलमवतरितुं तद् द्वारा जनानुद्धर्तुं समादिशति प्रतिकल्पं प्रतियुगम्। कृतत्रेतायुगयोः विमलाशया मानवाः शैवतन्त्रार्थान्तर्धारणसमर्थाः साक्षादुपादिश्यन्ते सदामुक्तैः सम्प्राप्तशिवानुग्रहैः पञ्चाचार्यैः। सम्प्राप्तेतु द्वापरे ह्रसिते वैमल्ये पञ्चाचार्यैः तन्त्रार्थबोधाय सूत्ररचनापाटवीं परिपाटीं श्रितैः परमार्थबोधसम्पत्तिमुद्दिश्य सारवद् विश्वतोमुखं सूत्रपञ्चकं विधाय देवदानवगन्धर्वमहर्षिप्रभृतिभ्यः प्रतिबोधयन्तोजयन्ति पञ्चाचार्याः।

"अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः।।"

इत्येवंसूत्रलक्षणलक्षितानि अत्यद्भुतानि पञ्चसूत्राणि विशदीकृत्य भक्तिविजृम्भिताशयानुपकर्तुं शिवाशयां कारिकामातनोमीत्याह महास्वामिवर्यः "कैलास" इत्यादिना कारिकात्रयेण।।

शास्त्राणां प्रतिपाद्यविषयान् सूत्ररूपतया संगृह्य अनुगममाध्यमेन सर्वजनसुगमान् विधाय ब्रह्मसूत्रशिवसूत्राष्टाध्यायी सूत्रादि-सद्ग्रन्थरचनाकलामयी काचित् परिपाटी या विलसति तस्या उत्तमं निदर्शनम् पञ्चाचार्यरचितं सूत्र पञ्चकमिति प्रतिपादयन् सर्वगुरुं शिवं सूत्रपञ्चककर्तारम् आचार्यपञ्चकं चोद्दिश्य प्रह्वीभावमातनुते कारिकाकृत— "ईशमि"त्यादि द्वाभ्याम्।

ईशाज्ञया भुवि ईशानमुखोद्गतैः पञ्चाचार्यैः वेदागमार्थगर्भाणि यदिदम्प्रथमतया सूत्राणि विरचितानि तदेनान् गुरून् प्रति प्रह्वीभावमर्पयन् कारिकाकृदाह— "लोक" इति कारिकामेकाम्।

पञ्चाचार्यैः विरचितानि पञ्चसूत्राणि उद्दिशन्नाह कारिकाकृत् "पद्विधिरि" त्यादिकारिकाम्। आचार्यरेणुकः अगस्त्यमहर्षये पद्विधिरितिसूत्रं, आचार्यदारुकः दधीचिमहर्षयेवृष्टिरितिसूत्रं, आचार्यघण्टाकर्णः भगवते व्यासाय लम्बनमिति सूत्रम्, आचार्यधेनुकर्णः सानन्दमहर्षये मुक्तागुच्छमिति सूत्रम्। महानाचार्यो विश्वकर्णस्तु क्रोधास्त्राय अत्रिपुत्राय श्रीदूर्वाशमुनये पञ्चवर्णमिति महासूत्रं स्वविनिर्मितं प्रबोधितवान्। एकैकेन गणेश्वरगुरुणा यदेकैकं सूत्रं विरच्य लोकेषु समुपदिष्टं तद्विभज्य प्रतिपादयितुमभ्यधायि- पद्विधीत्यादिकारिकात्रयं सार्द्धम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रीमदाचार्यरेणुक गणेश्वप्रभृतयः वीरशैवाचार्याः चतुर्षु युगेषु तत्तद्भिन्नसंज्ञाभिधानाः श्रीशिवाज्ञया विधृतावताराः सन्तो देवदानवमहामुनिप्रभृतीन् दीक्षया प्रतिशोधयन्तः परमार्थतत्त्वमपि प्रबोधयन्तो भूलोके धर्मं स्थापयन्तीति महान्तमुपकारमेतदीयं स्मारं स्मारं सूत्रपञ्चकार्थं पुरस्कृत्य युगभेदेन पञ्चाचार्यचारित्र्यमुपवर्णयितुं प्रतिजानीते—पञ्चैत–इत्यादि सार्द्धकारिकात्रयेण॥१-१०॥

**विख्याते चान्ध्रदेशे च कोल्लिपाकपुरे प्रभोः।**
**सोमेश्वरमहालिङ्गात् प्रादुरासीत्तु रेणुकः।।११।।**

**भूतभावनसच्छिष्यो भस्मदिग्धकलेवरः।**
**जटामुकुटसंयुक्तो मूर्ध्ना लिङ्गधरो गुरुः।।१२।।**

**दधानः सुहरित्कन्थां हरिद्वर्णं कमण्डलुम्।**
**शिवागमसुधासिन्धुः शिवाद्वैतप्रभाकरः।।१३।।**

**शिवध्यानविशुद्धात्मा शिवतत्त्वप्रबोधकृत्।**
**सर्वतन्त्रप्रयोगज्ञः स्वतन्त्रः सर्वकर्मविद्।।१४।।**

**गुणागारो गुणग्राह्यो गुरूणां गुरुरुत्तमः।**
**बभासे शंकरज्योतिर्भूतलोद्धारकृद् महान्।।१५।।**

**सम्राजमानमूर्तिं तं सोमेश्वरसमप्रभम्।**
**वीक्षमाणा नमस्यन्तोऽभूवन् विस्मितमानसाः।।१६।।**

विश्रुतेषु द्वापरीयपञ्चाचार्येषु प्रथमोगणेश्वरः भारतराष्ट्रस्य आन्ध्रप्रदेशे कोल्लिपाकनगरे यद् विश्रूयमाणं सोमेश्वरसमाह्वयं महालिङ्गं तस्मात् प्रादुर्बभूव। सोऽयं श्रीरेणुकाचार्य संज्ञां लभते स्म।

प्रादुर्भूत एष आचार्यः भूतभावनस्य भगवतो महेश्वरस्य कैलासवासिनः सुशिष्यः भस्मच्छुरित शरीरः, जटामुकुटमण्डितः मूर्द्धप्रदेशे इण्टशिवलिङ्गं बिभ्रद् महीतले सर्वलोकगुरुः हरिद्वर्णमयीं कन्थां हरिद्वर्णं कमण्डलुं च बिभ्राणः शैवागमसुधासमुद्रः शिवाद्वैतसिद्धान्तस्य परमः प्रकाशकः सततशिवध्यानपरायणो विशुद्धात्मा शिवतत्त्वप्रबोधने महान् पटुः सर्वशास्त्राणां प्रयोगानुष्ठानकुशलः सर्वज्ञानमयः सर्वकर्ता निखिलकल्याणगुणगणाश्रयः सात्त्विकगुणवता प्राप्यः लोके वर्तमानानां समेषां गुरूणामपि गुरुः श्रीशिवज्योतिरिव ज्योतिर्मयः भूतलवासिनामुद्धाराय विधृतावतारः शिवगुरुर्महान् समवभासते स्म॥११-१६॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**को भवानिति पप्रच्छुः सज्जिज्ञासा-पुरःसरम्।**
**अथ रेणुक आचार्यः प्रत्युवाच जनान् प्रति।।१७।।**

**पार्श्ववर्ती महेशस्य रेणुकोस्मि गणेश्वरः।**
**प्रशान्तो निर्भयः श्रीमद्भवानीशाज्ञयाऽऽगतः।।१८।।**

सोमेश्वर-शिवज्योतिः-समप्रभम् एनं राजमानं महापुरुषं पश्यन्तः आश्चर्यचकिताः सन्तः प्रह्वीभावमागताः समुज्ज्वलां जिज्ञासां पुरस्कृत्य कोभवानिति पप्रच्छुः। अथ प्रत्युत्तरं प्रयच्छन् विस्मितान् जनान् प्रतिआविर्भूतो गणेश्वरः प्राह— कैलासवासिनो महेश्वरस्य पार्श्ववर्ती गणेश्वरोऽहं रेणुकाख्यो भगवदनुकम्पया नितरां प्रशान्तः निर्भयः श्रीपार्वतीपरमेश्वरयोः जगतः पित्रोराज्ञया भूतलमवतीर्णः सर्वलोकान् धर्मपरायणान् विधाय तान् समुद्धर्तुं भवतां समक्षम् उपस्थितो राजे।।१७-१८।।

**प्रभावेणैव कालस्य सहवासेन दुष्कृताम्।**
**प्रदुष्यते जनानां हि बुद्धिश्शृङ्खलतां गता।।१९।।**

**बुद्धितत्त्वं हि लोकानां भोगमोक्षैकसाधनम् ।**
**अतो बुद्धेर्विशुद्ध्यर्थं धर्म मार्गम् समाचरेत्।।२०।।**

**दुःखानां प्रतिकूलानां समेषां शमनौषधम्।**
**धर्म एवेति शास्त्राणामैकमत्यं विजृम्भते।।२१।।**

**तद्धर्मं स्थापयेत्येवं शिवाज्ञां परिपालयन्।**
**धर्मसंस्थापनार्थाय शिवलिङ्गादिहाभवम्।।२२।।**

**सनातनेषु धर्मेषु वीरशैवो विशिष्यते।**
**तदीयतत्त्वसिद्धान्तान् शिवेन प्रतिबोधितान्।।२३।।**

**ऋषिभ्योऽथ मुनिभ्यस्तद् विज्ञापयितुमागतः।**
**भूलोकेऽत्र समस्तेभ्यः शुभाशीः स्वस्ति चास्तु भोः।।२४।।**

**एवमाशीर्वचोभिः स तोषयित्वा समान् जनान्।**
**महिम्ना व्योममार्गेण मलयाद्रिमुपागमत्।।२५।।**

तदनन्तरम् आचार्यवर्यो रेणुकः श्रद्धया सुनुतान् विनयान्वितान् स्वशिष्यान् प्रज्ञाविजृम्भितान् दिव्यो गुरुः कल्याणकृद् मुक्तिदानकुशलो नित्यमुक्तः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्फूर्तिविजृम्भितः शब्दनशब्दस्वरूपोऽनुग्रहकृत्यकारी शिवोऽपरः सर्वजनगुरुः समुपदिशति स्म— प्रतिकूलतया प्रतीयमानानां समेषां दुःखानां शमनः किल धर्म एव नान्यः। एतस्मिन् सिद्धान्ते समेषां शास्त्राणाम् अस्ति सम्मतिः। अतः कृपालुर्देवदेवो महेश्वरो मां समादिशद्— "भूतलमवतीर्य शिवधर्मं स्थापयेति। तामेनां शिवाज्ञां प्रतिपालयन्नहम् शिवधर्मसंस्थापनहेतवे सोमेश्वरमहाज्योतिर्लिङ्गादुद्भूय भवतां दृष्टिपथमागतोऽस्मि— इत्येवं प्राह भगवान् रेणुकाचार्यः।

अथ विनीतान् सुजनान् उद्धरिष्यन् उपदिदेश— सनातनधर्मविशेषो वीरशैवधर्मः सर्वजनैर्धारणीय आस्ते। अस्य धर्मदर्शनस्य ये किल तत्त्वसिद्धान्ताः ते मां प्रति भगवता सर्वगुरुणा शिवेन प्रतिबोधिताः। शिवस्य भगवतः आज्ञया प्रतिबोधितान् वीरशैवधर्मतत्त्वसिद्धान्तान् ऋषिभ्यो मुनभ्यिश्च विविच्य ज्ञापनहेतवे महीतलमवतीर्णोऽहं सर्वेभ्यः जनेभ्यः अविशेषेण शिवाशीराशिं वितरामि समेषां भवतां स्वस्ति सर्वतोभावेन प्रसरेदिति शुभाशिषं प्रयच्छामीति सर्वान् समुपस्थितान् तोषयित्वा आचार्यवरो रेणुकः व्योममार्गमाश्रित्य मलयाचलपर्वतमाजगाम॥१९-२५॥

**कृते संस्थापिते तत्र वीरसिंहासनान्तिके।**
**मलयाद्रि - सुतीर्थेऽसावगस्त्याश्रममाययौ॥२६॥**

**सर्वर्तुद्रुम - संशोभि - फलपुष्पसमन्वितम्।**
**नदीनदशताकीर्णं सरिद्वापीसुशोभितम्॥२७॥**

**प्रफुल्लकमलामोदमन्दशीतानिलेरितम्।**
**मुनीनां सुकृतैः पूर्णमृद्धिसिद्धिनुतं स्तुतम्॥२८॥**

**अथाकाशादवातीर्णं विवेद ज्ञानचक्षुषा।**
**महामुनिरगस्त्याख्यो रेणुको गणपस्त्विति॥२९॥**

**श्रीरेणुकप्रभावाब्धि - प्रेरितः कुम्भजो मुनिः।**
**व्याहरन् स्वागतं भूयः सहसैव समुत्थितः॥३०॥**

**आदाय सजलं कुम्भं पादौ प्रक्षालयन् गुरोः।**
**पूजां निर्वर्तयामास धर्मपत्न्या पुरस्कृतः॥३१॥**

**आसने प्रोन्नते दिव्ये ह्युपाविश्य गुरुं मुदा।**
**तदाज्ञामाप्य मुदित आससादासनान्तरम्॥३२॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**श्रद्धावित्तं समासीनं मुनीशं कुम्भसम्भवम्।**
**प्रोवाच शान्तवाक् श्रीलो रेणुको गणपुंगवः।।३३।।**

**कुशलीवर्तसे नूनं तपो निर्विघ्नमेव ते।**
**अन्तरायाः कथं स्युस्ते महिम्ना मण्डितात्मनः।।३४।।**

अगस्त्यमुनेराश्रमं प्रकृतिसुभगं पवित्रतरं पवित्रतमं व्यधाद् पञ्चाचार्यवरः श्रीरेणुकसद्गुरुरिति शीलसदाचारवृत्तमण्डितां काव्यशैलीं श्रितः कारिकाकृत् काव्यशास्त्रेऽप्यधीती साधु विमृशति। कीदृशमाश्रमं सद्गुरुराययौ— इतीमां जिज्ञासां समाधातुं विशेषणानि सुबोधानि योजयति शिवाचार्यः। सर्वेषु ऋतुविशेषेषु ये विभिन्ना द्रुमाः तेषु संशोभिनो ये फलविशेषाः पुष्पविशेषाश्च तैः समन्वितम् आश्रमपदम् सम्प्राप्तवान् भगवान् श्रीरेणुकाचार्यः। पुण्यसलिला याः नद्यः तादृशा ये नदाः तैः शतसंख्याकैः परिव्याप्तम् आश्रमपदम्। तद्वत् सरिद्भिः, वापीभिश्च मण्डितम् आश्रमपदम्। प्रफुल्लानां कमलप्रभृतीनाम् आमोदेन सम्भृतो यो मन्दः शीतश्चानिलः तेन सेवितम्। मुनीनां शान्तदान्ततितिक्षूणां सुकृतैः विलक्षणैः पुण्यैः परिपूर्णम्। ऋद्धिसिद्धिभ्यां सप्रह्वीभावं कृतैः प्रणतिततिविशेषैः संशोभितम्। सर्वैः प्राणिभिः स्थावरजङ्गमात्मभिः कृताभिः सततस्तुतिभिः समादृतम्।। मलयाद्रिसत्तीर्थे राजमानं देवैरपि स्पृहणीयं श्रीमुनेराश्रमम् आकाशमार्गमाश्रित्य प्रचलितः श्रीरेणुकसद्गुरुः यद् अवतरितवान् तदेतद् ज्ञानमयेन चक्षुषा वाग्विदांवरः तपस्वी महामुनिरगस्त्यो विदितवान्— "भगवता महादेवेन आदिष्टः कृपालुर्गणेश्वरस्तत्र भवान् रेणुकाचार्यः अनुग्राह्यं मामुपकर्तुं समागतः शिष्यम्"—इति। महादेवशिवसमानुग्रहकृत्यसम्पादनकुशलस्य श्रीरेणुकगुरुवर्यस्य प्रभावम् तत्समृद्धिं च विदन् विलक्षणप्रेरणया ससम्भ्रमभावमाप्तः सहसा स्वासनादुत्थाय विलक्षणं स्वागतं श्रीगुरवे भूयोभूयोव्याहरति, सजलं कुम्भम् आदाय श्री गुरोः पादौ प्रक्षालयति धर्मपत्न्या लोपामुद्रया पुरस्कृतोऽसौ श्रीगुरुमुद्दिश्य समुत्कृष्टां पूजां सत्कारं च विधत्ते। अथ सहर्षं दिव्ये प्रोच्चे आसने मुदितमुदितः श्री सद्गुरुम् उपवेशयति। तुष्टस्य गुरोराज्ञामवाप्य प्रमुदितान्तरङ्गो मुनिः शिष्यतामात्मनि दधद् स्वयोग्यम् नीचैः स्थितमासनं शिष्यमर्यादया समासादितवान्। कुम्भसम्भव एष मुनिः स्वश्रद्धायाः कृते सर्वत्र विश्रुतः इत्येवं विदितवृत्तान्तः श्रीरेणुकसद्गुरुः आसीनाय शिष्यताम् इच्छते गुरुतादानाधानशीलः प्रशान्तवाक् श्रीमान् गणेश्वरो महादेवप्रियः प्रोवाच— तपःस्वाध्यायदाक्षिण्यादिभिः महिमभिः मण्डितस्य मुनिपुङ्गवस्य न कुतश्चिदन्तरायसम्भवः, निर्विघ्नं तपः समाचरतस्ते कुशलिता सदैव विद्यते विद्योतते चेति।।२६-३४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विन्ध्यो निरुद्ध आतापी वातापी चोदरे हतः।
सर्पत्वं नहुषःप्राप्तः सर्वं त्वत्तपसःफलम्।।३५।।

इतः पूर्वं स्वयं स्कन्दः शिवधर्मोत्तरं खलु।
अवदद् भवते सर्वं भाग्यवान् हि भवान् किल।।३६।।

## ।।रेणुककर्तृकः पद्विधिसूत्रोपदेशः।।

रेणुकस्य वचः श्रुत्वा सिद्धःश्रीमुनिपुङ्गवः।
बभाषे शान्तया वाचा प्राञ्जलिर्विनयान्वितः।।३७।।

अद्य मे सफलं जन्म पवित्रं कुलमेव च।
यतो हि स्वयमागत्य चादात्स्वदर्शनं किल।।३८।।

त्वामहं हि विजानामि रेणुकं गणनायकम्।
समुद्धर्तुं हि मामेव ह्यवतारो तवाधुना।।३९।।

त्वन्मुखाच्छ्रोतुमिच्छामि सिद्धान्तं श्रुतिसम्मतम्।
तदेव वद मे स्वामिन् मदनुग्रहकाङ्क्षया।।४०।।

अगस्त्यमुनिशार्दूल शिवज्ञानं महत्तरम्।
दीक्षां विनैव तत्प्राप्तिः कस्यापि सुलभं न हि।।४१।।

अतो हि भवते पूर्वं सपत्नीकाय वै किल।
विधिवद्दीयते दीक्षा शिवादेशानुसारतः।।४२।।

एवमुक्त्वा गणेन्द्रश्च शास्त्रोक्तविधिना खलु।
लोपामुद्रासमेताय ह्यगस्त्याय तदा किल।।४३।।

दीक्षास्तास्त्रिविधा दत्त्वा परिशोध्य च तावुभौ ।
पुनर्ध्यात्वा महादेवं साम्बमाह समाहितः।।४४।।

अस्मान् पञ्च समुद्दिश्य शिवाद्वैतपरं खलु।
सिद्धान्तं यच्छिवेनोक्तं तत्सूत्रेण निगद्यते।।४५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



रेणुकस्य वचः श्रुत्वा मुनिरुत्कण्ठितस्तदा।
लोपामुद्रासमेतश्च विनयिद्वचनमब्रवीत्।।४६।।

किं पदं परमं प्रोक्तं कोऽयं तत्र विधिःश्रुतः।
तदहं ज्ञातुमिच्छामि प्रसीद गणनायक।।४७।।

मुनेराकर्ण्य जिज्ञासां रेणुको गणनायकः।
ध्यात्वा क्षणं महादेवं सूत्रमाह महत्तरम्।।४८।।

ऐहिके च परत्रे च पदानि च बहूनि च।
जीवानां कर्मभोगाय नियत्या निर्मितानि हि।।४९।।

प्रधानस्य पदं ग्रामे मण्डले च तथैव च।
राज्ये राष्ट्रे च वर्तन्ते ऐहिकानि पदानि च।।५०।।

ऐन्द्रं ब्राह्मं तथा चैव वैष्णवं रौद्रमेव च।
आमुष्मिकानि वर्तन्ते ह्यसंख्यानि पदानि च।।५१।।

परिच्छिन्नानि ह्येतानि देशकालादिभिस्तथा।
भयेन पतनाख्येन युक्तानि सर्वदा खलु।।५२।।

पदान्येतानि सर्वाणि कालाधीनानि वै खलु।
कालावधिसमाप्तौ च पदस्थो दुःखभाग्भवेत्।।५३।।

एतद्दुःखनिवृत्यर्थं सुखप्राप्त्यै च शाश्वतम्।
त्यक्त्वा क्षुद्रपदाशां च प्राप्तव्यं परमं पदम्।।५४।।

तादृशस्य पदस्यैव प्राप्तेरेव विधिः किल।
सूत्रेण पद्विदाख्येन कथ्यते श्रूयतां मुने।।५५।।

तत्पदं परमं ज्ञेयं यत्प्राप्य न निवर्तते।
तदर्थमेव सर्वैश्च यतितव्यमहर्निशम्।।५६।।

'पदविधि'रितिज्ञेयं सूत्रं चैतन्महत्तरम्।
पदप्राप्तेर्विधिस्तत्र शाकपार्थिववत्किल।।५७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मध्यमःप्राप्तिशब्दश्च लुप्तो मध्यमलोपिना।
विस्तरो चास्य सूत्रस्य कथ्यते चाधुना मया।।५८।।

यद्गत्वा न निवर्तन्ते तदाहुः परमं पदम्।
विधिःशिवनियोगः स्यात् तत्प्राप्तिसाधनं खलु।।५९।।

पद्यते गम्यते यत्तद्योगेन शिवयोगिभिः।
तदेव हि पदं प्रोक्तं पदतत्त्वविशारदैः।।६०।।

इदमेव पदं तत्त्वं परब्रह्मेति कथ्यते।
परशिवः स्थलं चेति महालिङ्गं तथेति च।।६१।।

पर्यायानि च नामानि सन्ति वेदागमेषु च।
तज्ज्ञेयमात्मरूपेण तदर्थं गुरुमाश्रयेत्।।६२।।

## ।।गुरोःस्वरूपं तन्माहात्म्यं च।।

मोक्षप्राप्तेरुपायेषु गुरुःस्यान्मूलकारणम्।
गुरोर्विना न सिद्ध्यन्ति साधनानि बहून्यपि।।६३।।

तपःप्रभावसमृद्ध्या वातापी नामासुरो महाबली उदरजाठरेण भवता पाचितः। राजा नहुषो भवता सर्पत्वमापादितः। नूनं भवान् सौभाग्यशाली विभ्राजते तत एव तु स्वयं भगवान् स्कन्दो महाप्रभावैश्वर्यसंवलितः भवते शिवधर्मोत्तरं समुपदिदेश। तदेतदीदृग्वचः श्रीगुरोः रेणुकाचार्यस्य श्रुत्वा नात्मनि काञ्चनाहंकृतिं गर्वाङ्कुरं वा समाकलितवान् प्रत्युत विनयप्रकर्षमुपगतः प्राञ्जलिः शान्तां वाचम् उदीरयामास– हे सद्गुरो! भवान् स्वयमेव शिष्यतामिच्छते मह्यम् अद्भुतं शुभदर्शनमात्मीयं यद् दत्तवान् तेन न केवलं मम जन्मसाफल्यमभूत् प्रत्युत सम्पूर्णं मम कुलं पवित्रितम्। पुनरप्याह— हे सद्गुरो! अहं स्वगुरुं त्वां गणेश्वरं रेणुकाचार्यं स्फुटमभिजानामि, ममोद्धारं विधातुं सम्प्रति तवावतरणं महीतले संजातम्। हे स्वामिन्! अनाथनाथस्त्वं सम्प्रति स्वमुखात् वीरशैवसिद्धान्तप्रबोधकं सूत्रं मह्यमुपदेशय। विलक्षणमनुग्रहं तावकं सम्प्रति वाञ्छामीति। श्रीगणेश्वर आचार्यवर्यः सद्गुरुवरो रेणुकः विनयप्रार्थनामयं वचः श्रुत्वा पार्वतीनाथं श्रीशिवं महादेवं ध्यातवान् अथ समाहितः सन् प्रत्याह— हे मुनिप्रवर! अगस्त्य! अज्ञाननाशकं शिवज्ञानं महतोऽपि महत्तरम् देदीप्यते। न च दीक्षां विना कश्चिदपि प्राप्नोतुं शक्नोत्येतत्। अतः यथा मया शिवादेशो लब्धस्तथा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



धर्मपत्नीसहिताय तुभ्यमहं विधिवद् दीक्षां दातुं यतिष्ये। एवमुक्त्वा श्रीसद्गुरुः आचार्यरेणुकः शास्त्रोक्तविधिना लोपामुद्राधर्मपत्नीसहिताय श्रीमते अगस्त्यमहामुनये त्रिविधां दीक्षां विधाय उभयोः परिशोधनं च विधाय पुनरपि साम्बं शिवमनुध्याय समाहितः सन्नाह— अस्मान् पञ्चाचार्यानुद्दिश्य शिवाद्वैततात्पर्यमयं सिद्धान्तं करुणया भवभूतिभावनो भूतपतिः सर्वलोकपतिः समुपदिदेश। तमिमं सिद्धान्तं चारु प्रबोधयितुं सूत्रनिर्मितिपरिपाटीं समाश्रयन् त्वां ब्रवीमि। अनुग्रहवचनमेतद् गुरोः श्रुत्वा सोत्कण्ठः लोपामुद्रासमेतो महामुनिः सविनयं वाक्यमिदमनुत्तमं प्रोवाच परमं पदं किंस्वरूपं भवति, तस्य प्राप्त्यै शास्त्रे कः विधिः प्रतिपाद्यते? इत्येतद् विज्ञातुमहमिच्छामि। हे गणेश्वरसद्गुरो! सुप्रसन्नः सन् कृपया मामुपदिशतु।।३५-६३।।

**सुस्फुटं तु श्रुतौ प्रोक्तं साक्षाद् भर्गो नराकृतिः।**
**गुरुरेव शिवः प्रोक्तस्तं तथैव विभावयेत्।।६४।।**

**यो गुरुः सः शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः।**
**न तयोरन्तरं पश्येदेकरूपौ हि तावुभौ।।६५।।**

**निष्कलो हि शिवः साक्षाच्चिदानन्दमयो विभुः।**
**सकलो गुरुरूपेण वर्तते भक्तिसिद्धये।।६६।।**

**मायाशक्तिविशिष्टत्वादप्रत्यक्षः सदाशिवः।**
**स एव गुरुरूपेण प्रत्यक्षो भक्तिसिद्धये।।६७।।**

**गुरुश्च गुणवान् प्राज्ञो वीतरागो विमत्सरः।**
**शिवागमविशेषज्ञो गुरुवंशसमुद्भवः।।६८।।**

**कारुण्यगुणसम्पूर्णः शिवतत्त्वविनिश्चयः।**
**लिङ्गाङ्गस्थलभेदज्ञो लिङ्गतत्त्वविशारदः।।६९।।**

**शिवार्चनपरो नित्यं शिवैकाहितमानसः।**
**शैवसिद्धान्ततत्त्वज्ञो दीक्षाकर्मणि कोविदः।।७०।।**

अथ गणेश्वरो महागुरुः श्रीरेणुकाचार्यः श्रीमन्मुनेः अगस्त्यस्य जिज्ञासां विदित्वा सद्यः शिवासमाराध्यं श्रीमहादेवं भगवन्तं नत्वा महिममण्डितं "पद्विधिरि"ति महासूत्रं प्रोवाच। अथ सूत्रस्यास्य सम्यगाशयो विवरणमुखेन प्राकाश्यन्नीतः। इह जगति कृतकर्मणां फलपरिपाकभोगार्थं नियतिशक्तिनियन्त्रितानि बहुविधानि अनन्तानि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पदानि इह लोके आमुष्मिके स्वर्गादौ च निर्मितानि विलसन्ति। लोके प्रायेण साधारणाजना अपि विदन्ति ग्रामे ''ग्रामप्रधानपदम्'' मण्डलस्तरीयं मण्डलाधिकारिपदम्, राज्यस्तरीयं राज्यपालपदं-मुख्यमन्त्रिपदम्, राष्ट्रस्तरीयं प्रधानमन्त्रिपदम्, राष्ट्रपतिपदमित्येवं सन्ति बहुविधानि लसितानि ऐहिकानि पदानि। तद्वत् ऐन्द्रं पदम्, ब्राह्मं पदं, वैष्णवं पदम्, रौद्रं पदम् - इत्येवं बहुविधानि संख्यासमतीतानि आमुष्मिकाणि पदान्यपि सन्ति सुबहूनि। सर्वाणि अपि इमानि देशकालादिभिः परिच्छिन्नानि पदानि नश्वराणि यतस्ततः पतनाख्यं भयं यत् तद् महद्भयम्, तेन युतानि सर्वाण्यपि उपर्युक्तानि ऐहिकानि आमुष्मिकाणि वा पदानि कालव्यालाघ्रातान्येव भवन्ति। पदानामेषां कालावधिसमाप्तौ तत्-तत्पदस्थो यः कोऽपि जीवः स पतनाख्येन भयेन भीतभीतो दुःखभाग् भवति। तदेतस्य दुःखस्य निवृत्त्यर्थं कश्चन उपायः अवश्यम्भावी। दुःखनिवृत्तिलभ्यं दुःखनिवृत्तिरूपं वा यत् सुखं तत्प्राप्त्यै विद्यते एक एवाभ्युपायः, स च परमपदप्राप्तिस्वरूपः। अतः पदानां क्षुद्राणां नश्वराणां सभयानां दुःखस्वरूपाणां निवृत्त्यै ज्ञानोपायं परमं पदमेव परमं प्राप्तव्यं वदन्ति शास्त्राणि, सद्गुरवः, साधकाः सिद्धाश्च।

यदिदं महासूत्रं पञ्चाचार्यवर्यप्रणीतं ''पद्विधिरिति''।

तेन तावद् तादृशस्य परमपदस्यैव प्राप्तेः विधिः कथ्यते। एतद्विधिसापेक्षं यद् व्याख्यानं सद्गुरुकर्तृकं तत् सम्यक् श्रोतुमवधानदानाय प्रेर्यमाणः श्रीमानगस्त्यमहामुनिः सम्बोध्यते— ''श्रूयतां महामुने!'' इति। किन्तावत् परमं पदमिति जिज्ञासायां स्मृतिवचनोपन्यासपुरः सरं तल्लक्षणं तदर्थं यतनीयमिति च प्रतिबोधयन्नाह भगवान् रेणुकमहाचार्यः तत्पदमित्यादि॥६४-७०॥

**एवमादिगुणानां च ह्यागारो यःप्रकीर्तितः।**
**स योग्यो गुरुरित्युक्तो ह्यागमेषु शिवेन हि।।७१।।**

**तस्माद्यस्यैव सान्निध्यात् प्रबोधानन्दसंभवः।**
**तमेव च गुरुं कुर्याद् नापरं मतिमान्नरः।।७२।।**

**गुरुभक्तेर्विना कोऽपि शिवं ज्ञातुमलं नहि।**
**अतः शिष्यो गुरावेव शिववद्भक्तिमाचरेत्।।७३।।**

**गुणातीतं परं तत्त्वं रूपातीतं तथैव च।**
**तादृशं हि महातत्त्वं यो दद्यात् स गुरुः स्मृतः।।७४।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**गुकारोऽज्ञानवाची स्याद्रुकारस्तन्निरोधकः।**
**अज्ञानस्य निरोधत्वाद् गुरुरित्यभिधीयते।।७५।।**

प्रोक्त-परमपदस्य प्राप्तेः विधिः पदविधिः इत्यत्र शाकप्रियः पार्थिवः शाकपार्थिवः इतिवत् मध्यमपदलोपि-समासाश्रयणेन मध्यमपदलोपी समासो बोध्यः। छन्दोवत्सूत्राणि भवन्तीति पदस्य पद्भावे **पद्विधिरिति** सूत्रं निष्पद्यते। सूत्रस्य सन्दर्भार्थं प्रकाशयितुं यतते कारिकाकृद् विस्तर इत्यादिना। यद् गत्वा न निवर्तन्ते इति श्रीमद्भगवद्वचनात् विष्णोः पदं निर्भयमिति स्मरणाच्च परमं यत् पदं तदेवात्र उद्देश्यमभिहितम्। तस्यास्य पदस्य प्राप्तिसाधनं विधिः शिवनियोगात्मा बोध्यः। परमं पदमेव सूत्रप्रबोध्यं निर्भयत्वात्। तदेवं शिवयोगिभिः यत् पद्यते गम्यते इत्येवं व्युत्पत्त्या परमं पदमेव पदतत्त्वविशारदैः सूत्रकृद्भिराचार्यैः पदमिति पदं प्रयुञ्जानैःपर ब्रह्म तत्त्वं परमोद्देश्यभूतं प्रत्यावेदितम्। यदेतत् परब्रह्म तत्त्वम् तस्य कृते परमपदम्, पदम्, परशिवः, स्थलम्, महालिङ्गम्, परमधाम, दिव्यं पदमित्यादीनि पर्यायभूतानि नामाक्षराणि वेदेषु आगमेषु च निगमश्रुतिषु तन्त्रश्रुतिषु च प्रथन्ते। तदेतत् परमं तत्त्वं, परमपदं - शिवपदम् आत्मरूपेण विज्ञातम्, मतं निदिध्यासितं श्रीगुरुमुखोच्चरितश्रवणपुरःसरमभिज्ञातमेव मुक्तिं जीवन्मुक्तिं पार्यन्तिकीं सततमुद्युक्तः साधको लभते मोदते चेति परमोपेयस्य कृते शास्त्र-गुरु-स्वप्रयत्नबलोद्योगानां परमोपायरूपता प्रतिपिपादयिषितेति सूत्रेण पद्विधिरित्याख्येन चिकासिषितेति सूत्रार्थो सरं व्याकृतः कारिकाकृता शिवाचार्येणेति शम्।।७१-७५।।

**सप्तसागरपर्यन्तं तीर्थस्नानेन यत्फलम्।**
**तत्फलं प्राप्यते मर्त्यो गुरुपादाम्बुबिन्दुना।।७६।।**

परशिवज्ञानाद् मोक्षः प्राप्यते परमोपेयः, वस्तुतस्तु परशिवएव मोक्षः तस्य या प्राप्तिः तदुपायेषु गुरु-शास्त्रसाधनोद्योगेषु गुरुरेव प्रथमोऽभ्युपाय इत्यावेदितं सूत्रस्वारस्यं कारिकाकृता महास्वामिना। अतएवश्रुतिः साक्षात् प्रतिपादयति गुरुरेव शिवः प्रोक्तः साक्षाद्भर्गोनराकृतिरिति। शिवबुद्ध्यैव श्रीसद्गुरोर्विभावनीयता शास्त्राचारपरम्परासु प्रतिपाद्यते। गुरुशिवयोर्मध्ये नास्ति पदार्थभेदः। चिदानन्दमयो निष्कलः शिव इति सकलस्तु गुरुरिति विवेकः। शिवे मायाप्रभावाद् अप्रत्यक्षता गुरौ तु भक्तिसिद्धिप्रपत्त्यै प्रत्यक्षतेति गुरोः गरीयस्त्वं चकास्ति।।७६।।

**मन्त्रराजं हि जानीहि गुरुरित्यक्षरद्वयम्।**
**शिवायै गदितं पूर्वं शिवेन परमात्मना।।७७।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।गुरुसेवा तत्कारुण्यप्राप्तिश्च।।

जनकश्च गुरुश्चेति द्वाविमौ पितरौ स्मृतौ।
निमज्जकःपिता प्रोक्तो तारको गुरुरेव च।।७८।।

गुरोः सान्निध्यमासाद्य शिष्यो भक्तिभयान्वितः।
कुर्याद्दण्डनमस्कारं त्यक्त्वा लज्जामतन्द्रितः।।७९।।

हस्तपादादिसाम्येन नेतरैःसदृशं वदेत्।
तथा चेत् तत्कृता भक्तिर्निष्फला भवति ध्रुवम्।।८०।।

सुन्दरः स्वशरीरेण कलत्रेण युतोऽपि वा।
पुत्रपौत्रादियुक्तश्च यशस्वी सर्वदिक्षु च।।८१।।

मेरुतुल्यं धनं चैव बहुबन्धुसमागमः।
षडङ्गानां च वेदानां पाण्डित्यं सर्वसम्मतम्।।८२।।

ज्ञानमभ्युपायः, गुरुरुपायः इत्यादिवचनप्रामाण्याद् यत्सान्निध्यात् प्रबोधानन्दोदयः स एव गुरुरिति प्रतिपादयितुम् ऋते गुरुभक्तेर्नैव शिवज्ञानमुदेतीति परतत्त्वप्रबोधाय महातत्त्वप्रदस्य गुरोः परमोपादेयता चकास्ति। अज्ञाननिरोधकः, ब्रह्मात्मप्रतिवेदी, आत्मविद् योगयुक्तः, मायाशक्तिनिवर्तकः, तीर्थशतस्नानफलप्रदः, रुष्टेऽपि शिवे त्राता, सर्वविधभयेभ्यस्त्राता, कामधेनुः, कल्पवृक्षः चिन्तामणिः ब्रह्मविष्णुशिवस्वरूपः, तत्त्ववेदी, मन्त्रराजश्चेति कीर्त्यते श्रीगुरुरनुग्रहकृत्।।७७-८२।।

कवित्वादिकलायुक्तो मान्यः सर्वत्र एव च।
गुरुभक्तिविहीनश्चेत् सर्वं तन्निःष्फल भवेत्।।८३।।

गुरोः संपूजनादेव साक्षात् संपूजितःशिवः।
तयोर्नास्ति मिथो भेदस् तदैक्यात्तत्वरूपतः।।८४।।

आप्ताङ्गस्थानसद्भावैः सेवां शिष्यः समाचरेत्।
सेवा हि परमो धर्मस्तस्मात् सेवां न सन्त्यजेत्।।८५।।

गुरोश्च चरणौ पूज्यौ यतस्तौ तीर्थरूपिणौ।
तदीयाङ्गुष्ठभागे तु तीर्थानि निवसन्ति हि।।८६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**पृथिव्यां यानि तीर्थानि समुद्रान्तानि सन्ति वै।**
**तानि सर्वाणि तीर्थानि पादाङ्गुष्ठे गुरोः किल।।८७।।**

**सेवा हि परमो धर्मो वेदतन्त्रेषु कीर्तितः।**
**अतः कारुण्यसिद्ध्यर्थं सेवामेव समाचरेत्।।८८।।**

**सेवातुष्टं गुरुं दृष्ट्वा शिष्यो भक्तिभयान्वितः।**
**रक्षार्थं भवरोगात्तु दीक्षायै प्रार्थयेदमुम्।।८९।।**

**प्रार्थितः परमाचार्यः शक्तिपातं परीक्ष्य च।**
**दीक्षयेत् परमं शिष्यं यथोक्तविधिना किल।।९०।।**

**पूजायां च कथायां च रोमहर्षस्तथैव च।**
**कण्ठस्तम्भोऽश्रुपातश्च कम्पस्वेदाङ्गविक्रियाः।।९१।।**

**इत्याद्याः सात्त्विका भावाः शक्तिपातस्य सूचकाः।**
**शक्तिपातं विना जातु शुद्धिस्तस्य न जायते।।९२।।**

**ब्रह्मचारी गृही वापि वानप्रस्थो तथा यतिः।**
**ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽन्त्यजोऽपि वा।।९३।।**

**पुमान् नार्यथवा क्लीबः सर्वे दीक्षाधिकारिणः।**
**परीक्ष्य शक्तिपातं तु गुरुस्तान् दीक्षयेदपि।।९४।।**

पितरौ जनको गुरुश्चेति पित्रोरेकः जगति निमज्यति अपरस्तु संसारसागरात् तारयति नरम्। सत्स्वपि बहुषु पूजोपचारेषु प्रियवाक्प्रयोगः, प्रणामश्चेति अतिशयाते किलान्यान्। सर्वथा समादरणीयः, मानुषविग्रहः शिवः, धनबन्धुपाण्डित्यप्रभृति-सर्वार्थ-सम्पन्नैरपि सर्वसुलभत्वावाप्तये नूनमुपासनीयः। यत् तत्त्वतः गुरुशिवयोरैक्यं तद् वह्निना काञ्चनशुद्धिरिव गुरुणा शिष्यशुद्धिरिष्यते। यतः सर्वदेवरूपश्च, सर्वमन्त्रस्वरूपः श्रीगुरुस्ततः आयुःश्रीज्ञानसत्कर्मसंवर्धनार्थं गुरुसेवापरायणो भवेत् साधकः। श्रीगुरोश्चरणाङ्गुष्ठे सर्वतीर्थनिवासः, तद्विग्रहे सर्वविभूतिवासः, ब्रह्मादिस्तम्बपर्यन्तानां पाशितता, गुरोस्तु पाशमुक्तिप्रदप्रत्यक्षशिवतेति गुरोः कारुण्यावाप्तये गुरुसेवा नितरां समाचरणीया शास्त्रेषु विधीयते। रागद्वेषादिद्वन्द्ववर्जितः, अहंकार विवर्जितः मदोन्मादरहितः विवेकादिगुणोपेतः जिज्ञासुः शिष्यः गुरोः सान्निध्यमवाप्य सेवया सन्तोषितगुरुः प्राप्ततदीयानुग्रहः सर्वं मनोरथं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



समवाप्नोति॥८३-९४॥

सुपरीक्ष्य गुरुः शिष्यं दीक्षायां तं नियोजयेत्।
दानक्षपणधर्मत्वं दीक्षाया लक्षणं कृतम्।।९५।।

तनुत्रयगतानादिमलत्रयमसौ गुरुः।
दीक्षात्रयेण निर्दाह्य लिङ्गत्रयमुपादिशेत्।।९६।।

वेधा मान्त्री क्रिया चेति दीक्षा सा त्रिविधा मता।
सर्वाः शिवेन ता दीक्षाः कथिता हि शिवागमे।।९७।।

गुरोरालोकमात्रेण हस्तमस्तकयोगतः।
यःशिवत्वसमावेशो सा वेधेति निगद्यते।।९८।।

तदा तस्य तु योगाङ्गे भावलिङ्गं विबोध्य च।
आणवं च मलं तस्य निवारयति सद्गुरुः।।९९।।

कर्णे मन्त्रोपदेशेन या दीक्षा क्रियते किल।
मान्त्री दीक्षेति सा प्रोक्ता मायामलनिवर्तिनी।।१००।।

तदानीं शिष्यभोगाङ्गे स्थापयेत् प्राणलिङ्गकम्।
मन्त्रन्यासादिकं चैव बोधयेज्जपपद्धतिम्।।१०१।।

क्रियोत्तरा च या दीक्षा कुण्डमण्डलमण्डिता।
क्रियादीक्षेति सा प्रोक्ता शिवागमविशारदैः।।१०२।।

सेवातुष्टाद् सद्गुरोः सुशिष्यो दीक्षां प्रार्थयेद् अथ शक्तिपातपरीक्षणपुरःसरं श्रीगुरुः शिष्यं दीक्षयेद्। शक्तिपातशुद्धस्य शिष्यस्य रोमहर्षः कण्ठस्तम्भः अश्रुपातः कम्पः स्वेदः अङ्गस्फूर्त्यादिः सात्त्विकः भावः समुदेति। दीक्षाविधौ सर्वस्याधिकारिता तन्त्रागमसम्मता चकास्ति। मायी त्याज्यः अमायः दीक्षणीय इति तन्त्रसम्मतिः। ज्ञानदानेन अनादिमलत्रयक्षपणं विधीयते यत् तदुच्यते दानक्षणात्मा दीक्षा॥९५-१०२॥

## लिङ्गधारण शाम्भवं व्रतम्

एतद्धि शाम्भवं नाम व्रतं श्रुत्यन्तसम्मतम्।
सद्यो मुक्तेरवाप्त्यर्थं मुमुक्षुस्तत्समाचरेत्।।१०३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अत्याश्रमं तथा चैव शाम्भवं हि शिरोव्रतम्।
महापाशुपतं चेति नामान्येतानि वै श्रुणु।।१०४।।

अनन्तजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम्।
प्रसादललभ्यते तद्धि गुरोः पाशुपताभिधम्।।१०५।।

देशिकस्य प्रसादेन येन लब्धमिदं व्रतम्।
तस्य निर्दग्धबन्धस्य पुनर्बन्धः कथं भवेत्।।१०६।।

कारुण्यामृतपानेन शाम्भवव्रतसेविनः।
अमृतस्यास्य निकटं कथं मृत्युः प्रयास्यति।।१०७।।

ज्ञानादेव तु कैवल्यमित्युक्तं शम्भुना पुरा।
अथाऽपि ज्ञानसम्प्राप्तिर्न व्रतेन विना भवेत्।।१०८।।

भक्तिसिक्तं हि तज् ज्ञानं मुक्तये प्रभवत्यलम्।
तस्मात् सद्यो विमुक्त्यर्थं दीक्षितव्यं गुरोः किल।।१०९।।

अज्ञो वा कुटिलो वापि शाम्भवव्रतदीक्षितः।
यातनां भैरवीं चैव भुक्त्वा शुद्धिमवाप्नुयात्।।११०।।

ततः साक्षात् शिवादेव ज्ञानं स्वात्मस्वरूपकम्।
लब्ध्वा स मुक्तिमाप्नोति मुक्तौ दीक्षा हि कारणम्।।१११।।

दीक्षां विनैव यः कोपि लिङ्गं सन्धारयेद् यदि।
न शास्त्रसम्मतं चैतत् कृतं तन्निष्फलं भवेत्।।११२।।

परीक्ष्यं शक्तिपातो हि न वर्णादिकमेव वा।
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तु वा।।११३।।

ब्राह्मणःक्षत्रियो वाऽथ वैश्यः शूद्रोऽन्त्यजोऽपि वा।
नारी वा पुरुषो वापि क्लीबोऽप्यत्राधिकारवान्।।११४।।

## लिङ्गधारी सदाशुचिः

पौण्डरीकाग्निहोत्रेषु यथा सूतकवर्जनम्।
इष्टलिङ्गैकपूजायां तथैव सूतकं न हि।।११५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इष्टलिङ्गमिदं तावत् प्राणलिङ्गमिहोच्यते।
प्राणवद्धारणीयत्वात् कथं सूतकसंभवः।।११६।।

अतः सर्वेषु कालेषु लिङ्गधारणमुत्तमम्।
शुचिर्वाप्यशुचिर्वापि लिङ्गं सर्वत्र धारयेत्।।११७।।

एवमुक्तविधानेन दीक्षादग्धमलत्रयः।
त्रिलिङ्गाराधनां कुर्वन् पदं प्राप्तुमिहार्हति।।११८।।

लीयते गम्यते यत्र जगदेतच्चराचरम्।
पुनःपुनः समुत्पत्त्या तल्लिङ्गं ब्रह्म शाश्वतम्।।११९।।

तदेव हि परं ब्रह्म कारुण्येन गुरोः किल।
भावप्राणेष्टरूपेण दीक्षायां प्राप्यते खलु।।१२०।।

शिवागमेषु त्रिविधा दीक्षा प्रतिपाद्यते। श्रीगुरोः दृष्टिपातेन गुरुहस्तस्पर्शः शिष्यशिरसिकृतस्तेन वा यः शिवत्वसमावेशः सा वेधा दीक्षा-इत्यभिधीयते। अनया योगाङ्गे भावलिङ्गविबोधात् सद्गुरुणा आणवो मलो निवार्यते। कर्णे गुरुकृतो मन्त्रोपदेशः मान्त्री दीक्षा प्रोच्यते। अनया शिष्यभोगाङ्गे प्राणलिङ्गस्थापनया मायामलो निवार्यते। अथ कुण्डमण्डलोपेता क्रियादीक्षा आज्ञाप्रभृति सप्तसंस्कारयुक्ता सप्तविधा भवति। शाम्भवं व्रतं पालयतः शिवज्ञानं सम्प्राप्यते शिवज्ञानादेव तु कैवल्यमवाप्यते। प्राप्तदीक्षः श्रीगुरोः शिवाद् ज्ञातस्वात्मस्वरूपः मुक्तिमाप्नोतीति मुक्तौ दीक्षायाः कारणता विलसति। ऋते ज्ञानान्न मुक्तिः, ऋतेव्रतान्नज्ञानमिति दीक्षापरमावश्यकी। जातिलिङ्गवर्णाश्रमवयःपरीक्षां विनैव सर्वेषामधिकारिता दीक्षाविधाविति आगममर्यादा। दीक्षितायाः बालापत्यायाः गृहकर्मरतायाः अपि यथा बालायत्तंचित्तं तथैव दीक्षितायाः लिङ्गायत्तं चित्तं भवति। पौण्डरीकाग्निहोत्रवद् इष्टलिङ्गपूजाविधौ सूतकं न स्पृशति। यथा च जिह्वा भोजनादौ अस्पृश्या मन्त्रजपे सुनिर्मला तथैव सूतकान्विता अपि शैवाः लिङ्गपूजायां निर्मलास्तिष्ठन्ति। इष्टलिङ्गस्य प्राणलिङ्गरूपता यतस्ततः प्राणवद् धारणीयस्य इष्टलिङ्गस्य पूजने सूतकं नैव भवति प्रतिबन्धकम्। षडध्वशुद्ध्या दीक्षितस्य दीक्षिताया वा स्ववामहस्ते लिङ्गं संस्थाप्य सावधानेन प्रतिदिनं यथाविधि पूजनीयं भवति। श्रीगङ्गाधरसंसर्गाद् गङ्गाया नैर्मल्यमिव पवित्रस्य इष्टलिङ्गस्य सम्पर्काद् भक्तानां शरीरं शुचितमं तिष्ठति। तदेवं दीक्षादग्धमलत्रयः त्रिलिङ्गाराधनया परमं पदं प्राप्तुमनेनैव शरीरेण इहैवार्हतीति गुरुशास्त्रमर्यादा। नादात्मा शिवः, तच्छक्तिः बिन्दुः तयोर्मेलनात्मा कलेति तत्संयुक्तं लिङ्गं भावप्राणक्रियात्मकं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विलसति। भुक्तिफलाय मुक्तिफलाय वा शिवशक्त्युभयात्म इष्टलिङ्गं ध्यायेद् अर्चयेच्चेति शास्त्राणि समादिशन्ति॥१०३-१२०॥

इष्टं स्थूलतनोःप्रोक्तं प्राणं सूक्ष्मतनोः स्मृतम्।
भावं च कारणस्योक्तं तनुत्रयगतं त्रयम्॥१२१॥

इष्टं च पूजयन्नित्यं ध्यायन् तत्प्राणलिङ्गकम्।
भावं च भावयन्नित्यं मृत्युपाशांश्छिनत्ति सः॥१२२॥

तस्मादन्यान् परित्यज्य देवान् क्षुद्रफलप्रदान्।
ध्यायेत् तं लिङ्गरूपेण भोगमोक्षार्थसिद्धये॥१२३॥

## ॥बाह्यलिङ्गधारणम्॥

अन्तर्लिङ्गानुसंधाने ह्यशक्तः शक्त एव वा।
इष्टं तु धारयेद्बाह्ये तद्रूपमिति भावयन्॥१२४॥

मूर्ध्नि कण्ठे तथा कक्षे कुक्षौ वक्षसि हस्तके।
स्वेच्छया धारयेल्लिङ्गं बाह्ये भक्तिभयान्वितः॥१२५॥

जटाग्रे त्रिकभागे च मलस्थाने च वा क्वचित्।
अधो नाभेश्च लिङ्गं तु कदाचिन्नैव धारयेत्॥१२६॥

ऋग्वेदादिषु वेदेषु कामिकाद्यागमेषु च।
शास्त्रेषु च पुराणेषु कथितं लिङ्गधारणम्॥१२७॥

सर्वेषां वीरशैवानां करपीठार्चनं वरम्।
अतो बाह्यं परित्यज्य करपीठे समाचरेत्॥१२८॥

लिङ्गतत्त्वं दिव्यप्रकाशं चकास्ति। तस्यैतस्य प्रकाशेन द्युलोके भगवान् सूर्यः, चन्द्रः नक्षत्रप्रभृतयश्चावभासन्ते। अस्य भयाद् पञ्चभूतानि सर्वे लोकपालाः निरलसाः अप्रमत्ताश्च सन्तः शिवादिष्टं स्वं स्वं कार्यं सम्पादयन्ति। जगति अनुभूयमानस्य सर्वस्यापि आनन्दस्य मूलं लिङ्गतत्त्वमेव राजते। अव्यक्तमपि ज्योतिः व्यक्तं सत् सर्वतः प्रसारि परमं पदं भाति यत्र विद्वांस एव अन्तर्लीना भवितुमर्हन्ति न तु ज्ञानभक्तिहीनाः। चिदानन्दलक्षणं लिङ्गं सद् ब्रह्म ध्यायन्तो भक्ता मुक्तिं प्राप्नुवन्ति। मुहुर्मुहुरुत्पत्तिशीलं जगदेतत् लिङ्गतत्त्वे शाश्वते ब्रह्मणि गम्यते लीयते च। दीक्षाविधौ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गुरुकृपया ब्रह्मवपुलिङ्गं भावलिङ्गं प्राणलिङ्गम् इष्टलिङ्गं चेति त्रिधाविभक्तं गुरोः शिष्योऽवाप्नोति। स्थूलशरीरगतं तावदिष्टलिङ्गं सूक्ष्मतनुगतं प्राणलिङ्गं कारणशरीरगतन्तु भावलिङ्गमिति विभावनीयम्। साधकः नित्यम् इष्टलिङ्गं पूजयति, प्राणलिङ्गं ध्यायति, भावलिङ्गं भावयति चेद् मृत्युपाशाद् विमुच्यते। नास्य आदिरन्तो मध्यो वा, अपरिच्छिन्नमेतत्सर्वजगतो मूलम्। सर्वलोकनमस्कृतमेतत् सर्वोत्कृष्टं दैवतं स्तूयमानं चकास्ति। सज्जनाः तत्तत् क्षुद्रं फलं वितरतो देवान् परित्जन्ति भोगं सर्वविधं मोक्षं वा समवाप्तुं शम्भुलिङ्गमेव भावयन्ति। लिङ्गं द्विधा धार्यते-आधारचक्रे कनकप्रख्यम् हृदये विद्रुमाभम् भ्रूमध्ये स्फटिकप्रभं वा यद् ज्योतिर्धार्यते तदान्तरम्। ब्रह्मविष्णुप्रभृतिभिरपि निरुपाधिकं एतदान्तरंधारणं विधीयते लिङ्गस्य।।२१४-२२१।।

आन्तरे लिङ्गधारणे अशक्तः शक्तो वा बाह्यधारणं कुर्यात्। मूर्ध्नि कण्ठे कक्षे कुक्षौ वक्षःस्थले हस्ते वा भक्त्या भयेन च यथेच्छं बाह्यलिङ्गधारणं विदध्यात्। जटाग्रभागे, त्रिकभागे, मलस्थाने, नाभेरधोभागे वा लिङ्गधारणं सर्वथा निषिद्धम्। उत्तमाङ्गे ब्रह्मादयो देवाः लक्ष्मीप्रभृतयो देव्यश्च उत्तमाङ्गे लिङ्गधारणशीलाः सुखिनो भान्ति। वेदेषु कामिकाद्यागमेषु शास्त्रेषु पुराणेषु च लिङ्गधारणं प्रतिपाद्यते। वीरशैवागमभक्तैः भक्त्या करपीठे श्रीगुरोः मन्त्रदीक्षया प्राप्तम् इष्टलिङ्गं समर्च्यते बाह्यं मन्दिरादिस्थितं लिङ्गमपेक्ष्य करपीठलिङ्गं यदर्च्यते तद् वरमिति सम्प्रदायः।।१२१-१२८।।

**भावयन्नपि सर्वत्र शिवं विश्वात्मकं परम्।**
**पूजयेत् स्वेष्टलिङ्गं हि स वै माहेश्वरः खलु।।१२९।।**

यः लिङ्गधारी सः सदा शुद्धोभवति स च आलस्यप्रमादादिवर्जितः उपचारैः यथोपलब्धैः करपीठे स्वेष्टलिङ्गम् अर्चयेत्। ब्राह्ममुहूर्ते जागृयाद् लिङ्गं नेत्रयोः श्रद्धया स्पृशन् भगवन्तम् उमापतिं स्मरेत्। प्राणायामपुरःसरं मूलमन्त्रम् अष्टोत्तरशतं जपेत्। प्रातः देहशौचादिपुरःसरं स्नानम् अथ भस्मस्नानम् मूलमन्त्रेण यथाविधि भस्मना त्रिपुण्ड्रं धारयेत्। अथ महाफलम् रुद्राक्षधारणं विदध्यात् तदनन्तरं यथाविधि मन्त्रजपं, विदध्यात्। शिवं ध्यायन् पञ्चाक्षरमन्त्रं जपति चेत् सहस्रगुणं फलं प्राप्नुयात्। महायोगी सानन्दो जपेन सिद्धिमवाप्य नारकानपि समुद्धृतवानिति सुप्रसिद्धम्। योगीन्द्रः शतानन्दः सङ्गिरस्य कृते जपन् जपमन्त्रमहिम्ना सङ्गिरं नरकाद् उद्धृत्य स्वर्गं प्रायच्छत्। जपमहिम्नैव महामुनिः उपमन्युः शैवशास्त्रप्रवक्ता सम्पन्नः। वसिष्ठवामदेवादयः जपप्रभावेण तेजस्विनः संजाताः। ब्रह्मादिभिः जपबलेनैव सृष्ट्यादिकर्म विधीयते। तदेवं श्रीगुरोर्लब्धदीक्ष आह्निकं कृत्यम् समाचरन् साधकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भक्त इत्याख्यायते। तेन भक्तेन कीदृशाचारपरायणेन भवितव्यमिति जिज्ञासायामुच्यते– उपचारैः करपीठस्थलिङ्गस्य भक्त्या पूजनं बाह्यपूजा प्रोच्यते। लिङ्गे प्राणं समावेशयति प्राणेलिङ्गमित्येवम् एकाग्रतया मनसा शिवचिन्तनम् आन्तरपूजनमुच्यते। आन्तरभक्तियुतो भक्तः जीवन्मुक्तिमवाप्नोति। वीरशैवसाधकः बाह्यम् आन्तरं च पूजनं कुर्वन् शिवभावावाप्त्यै देहसंशोषरूपं तपः लिङ्गार्चनरूपं कर्म च सम्पादयन् पञ्चाक्षरं प्रणवम् रुद्रमन्त्रं वा जपन् शिवस्वरूपं ध्यायन् पञ्चयागसम्पादनद्वारा शिवभक्तः संजायते। प्राप्तदीक्षः साधकः शास्त्रोक्तं मार्गमाश्रयन् आहारव्यवहारादिकं समाचरन् गुरुं लिङ्गं जङ्गमं पूजयन् दानादिना शिवयोगिनं तर्पयन् परं सहजं च दानमनुतिष्ठन् माहेश्वरो भक्तः शिवयोगितृप्त्या शिवतृप्तिं तत्तृप्त्या विश्वतृप्तिं विदधातीति माहेश्वरो भक्तो विजयते।।१२९।।

**निष्ठया हीष्टलिङ्गस्य ध्वस्तपापप्रबन्धनः।**
**मनसस्तु प्रसादेन प्रसादीत्येष कथ्यते।।१३०।।**

**स्वात्मभोगाय यद्द्रव्यं निश्चितं प्रत्यहं खलु।**
**तत्सर्वं स्वेष्टलिङ्गाय निवेद्यं तद्विशुद्धये।।१३१।।**

**करणं शुद्ध्यति ह्यन्तः आरोग्यं प्राप्यतेऽपि च।**
**विद्या हि प्राप्यते तेन मोहच्छेदो भविष्यति।।१३२।।**

## ।।प्राणलिङ्गिस्वरूपं तदर्चनं च।।

**हृदयस्थं हि चिल्लिङ्गं प्राणशक्तिसमन्वितम्।**
**शिवयोगेन यो वेत्ति प्राणलिङ्गीति कथ्यते।।१३३।।**

**प्राणापानसमाघातात् कन्दमध्याद्यदुत्थितम्।**
**प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः।।१३४।।**

**चिद्रूपस्यान्तरस्यास्य पूजा बाह्यैर्न जायते।**
**क्षमाद्या आन्तरा एव ह्युपचारा भवन्ति हि।।१३५।।**

शिवपरायणः सहजदानरसिकः भक्तिमान् साधकः माहेश्वर इत्यभिधीयते। यः साधु वेत्ति नित्यमुक्तो महेश्वर एव मुक्तिप्रदो नान्य इति स माहेश्वर इत्युच्यते। अहन्तां ममतां चातिक्रान्तः कामादिषड्वर्गेण अरिणा अपराजितः सर्वप्राणिहितेच्छुः साधकः निष्ठाभक्त्या इष्टलिङ्गमर्चयन् सर्वत्र शिवं भावयन् माहेश्वरसंज्ञां लभते। इष्टलिङ्गे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



परामास्थां विधाय विधूतपापः मनःप्रसादोदयात् साधकः प्रसादीतिसंज्ञां लभते। प्रतिदिनं यावद् द्रव्यं भोगार्थमाचीयते तत् इष्टलिङ्गाय विनिवेदितं विशुद्ध्यै कल्पते। तत्प्रसादग्रहणेन अन्तःकरणं शुद्ध्यति, नैरुज्यमवाप्यते, विद्याबोधोदयः सम्पद्यते अज्ञानात्मा मोहपाशश्छिद्यते। प्रमादराहित्येन लिङ्गस्य, गुरोः जङ्गमस्य च प्रतिदिनं प्रसादग्रहणेन परमानन्दावाप्तिसाधनं शाम्भवः प्रसादः समवाप्यते। एष शाम्भवः प्रसादः संसारप्रापकं कर्म समूलं निकृन्तति। तदेवं प्राप्तशिवप्रसादः साधकः प्रमुदितान्तरङ्गः स्वसाधनबलोद्योगेन प्राणलिङ्गीति समाख्यां लभते॥१३०-१३५॥

**प्रत्युन्मुखमना भूत्वा पूजयन् प्राणलिङ्गकम्।**
**प्राणलिङ्गी भवेद्भक्तो ह्यनुभावसमन्वितः॥१३६॥**

**अन्तर्लिङ्गार्चनाऽसक्तः प्राणलिङ्गी सदा व्रती।**
**मूलतो ब्रह्मरन्ध्रान्तं षट् चक्राणि विभावयेत्॥१३७॥**

**ब्रह्मरन्ध्रान्तरे तत्र चन्द्रबिम्बान्तरे पुनः।**
**सूक्ष्मरन्ध्रं विजानीयात् तत्कैलासपदं विदुः॥१३८॥**

**तत्र शम्भुं महादेवं भावयेत् सर्वकारणम्।**
**एवं हि भावयन् योगी समाधिस्थो भविष्यति॥१३९॥**

**वासनया बहिर्विश्वं विकल्पात्मावभासते।**
**अन्तरासक्तचित्तानां ह्यात्मानन्दः प्रकाशते॥१४०॥**

**विषवृक्षो हि संसारः पञ्चक्लेश समन्वितः।**
**भावपरशुनाच्छेद्यः कर्ममूलो महाद्रुमः॥१४१॥**

**अन्तर्विलीनचित्तस्य यःप्रकाशोऽनूभूयते।**
**स न सौरो न वा चान्द्रो न वा तारकएव वा॥१४२॥**

**प्राणलिङ्गे तदासक्तो ह्यन्तरङ्गे सदा खलु।**
**ध्यायन् यो वर्तते योगी प्राणलिङ्गीति कथ्यते॥१४३॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।भावलिङ्गं तद्भावनायाः विधिश्च।।

**सतीव रमणे यस्तु शिवे भक्तिं विभावयन्।**
**तदन्यविमुखो यःस ज्ञातः शरणनामवान्।।१४४।।**

**अतो ह्यनन्यभावेन शिवं हि शरणं गतः।**
**सदानन्दसमायुक्तो ज्ञेयः शरणनामवान्।।१४५।।**

यः साधकः शिवयोगेन स्वहृदयस्थितं प्राणशक्तिसमन्वितं चिन्मयं लिङ्गं निभृतं वेत्ति स प्राणलिङ्गीति संज्ञां लभते। प्राणापाननिरोधयोगकुशलः कन्दमध्याद् उच्छलितं चिन्मयं प्राणलिङ्गं सम्यग् वेत्ति। तस्य त्वेतस्य आन्तरस्य चिद्रूपस्य प्राणलिङ्गस्य पूजने बाह्यकुसुमादीनाम् उपचाराणाम् अनुपयोगाद् आन्तराणामेव क्षमाविवेकादीनाम् उपचारतामभ्युपगच्छन्ति साधकाः। क्षमाजलेन अभिषेकश्चेत् विवेक-वस्त्रेण आच्छादनं, सत्याभरणेन आभूषणम्, विरक्तिमालिकया पूजनम्, समाधिगन्धेन आघ्राणम्, निरहंकृतिरूपाणाम् अक्षतानाम् अर्पणम्, श्रद्धाधूपार्चनम्, ज्ञानदीपमालार्पणम्, भ्रान्तिनिवेदननैवेद्यम्, मौनम्, घण्टानादः, विषयार्पणं ताम्बूलम्, विषयासक्तिवर्जनम् प्रदक्षिणम्, बुद्धिसमर्पणं, नमस्कारः, प्राणलिङ्गार्चने उपचाररूपतां व्रजन्ति। सात्त्विकैः अदुष्टैः भावैरेभिः श्रद्धाभावसमन्वितः साधकः आन्तरं प्राणलिङ्गमभ्यर्चयन् प्राणलिङ्गी भक्तः मूलाधाराद् ब्रह्मरन्ध्रपर्यन्तं षट्चक्राणि विभावयन् ब्रह्मरन्ध्रान्तरं चन्द्रबिम्बं तदन्तरं सूक्ष्मरन्ध्रं जानन् कैलासपदं प्रविशन् सर्वकारणकारणम् आन्तरतमं स्वरूपं महादेवं शम्भुमीशं भावयन् समुज्ज्वलं समाधिमाविशति। वासनासक्तचेतसः विकल्पेमयः संसारः बहिरवभासते। आन्तरचिद्रूप माकलयतस्तु योगिन; आत्मानन्दः स्फुटमवभासते। पञ्चभिः क्लेशैरापूरितः विषवृक्षात्मा संसारः कर्मविपाकात्मा महाद्रुमः भावपरशुनैव चेच्छिद्यते साधकभक्तेन योगिना। आन्तरचित्स्वरूपे विलीनचेताः यं प्रकाशं साक्षात् कुरुते स न सूर्ये न चन्द्रे न तारकासु न वाग्नौ तिष्ठति। एष तु आत्मप्रकाशः यज्ज्योतिषा सर्वं विश्वं प्रकाशते। सोऽयमात्मप्रकाशः सच्चिदानन्दस्वरूपं परमं लिङ्गमित्याख्यायते। एतद् ध्यायतः भक्तसाधकयोगिनः परमलिङ्गरूपता सम्प्रकाशते। ये साधकाः सर्वकारणकारणम् अनन्तम् अनादिलिङ्गं न जानन्ति ते मोक्षमार्गाद् बहिष्कृता ज्ञेयाः। तदेवं प्राणलिङ्गसमर्चापरः साधकः अन्तरङ्गे परमं लिङ्गं सदा ध्यायन् विचरति स प्राणलिङ्गीति आख्यायते।।१३६-१४५।।

**मलान्मुक्तो महायोगी निष्कलङ्कमनाःसदा।**
**शिवोऽहमिति भावेन शिवेनैक्यं समाप्नुयात्।।१४६।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**शिवे विलीनवृत्तेश्च ध्वस्तबन्धस्य योगिनः।**
**दृश्यते हि जगत्सर्वं शिवरूपात्मसम्भृतम्।।१४७।।**

**गुरुं विश्वं तथा चैव स्वात्मानं च चराचरम्।**
**पश्यन् हि शिवरूपेण पूर्णाहन्तो भवेद् ध्रुवम्।।१४८।।**

**पूर्णाहन्ता स्वरूपा या विद्या ज्ञेया परा हि सा।**
**नित्यमुक्ताः सदाभान्ति यामवाप्य सुयोगिनः।।१४९।।**

विश्वसृष्ट्यादिक्रीडाशीले भगवति शिवे भक्तिमनुत्तमां सती भवानी संबिभर्ति। तद्वद् महाशिवादन्यस्मिन् वैमुख्येन वर्तमानस्य साधकस्य शिवभक्तिपरायणस्य शरणस्थलरूपता जागर्ति। यथा पवित्रं गङ्गाजलं पिबन् तृप्तो जनः मृगतृष्णां नानुधावति तथा प्राप्तशिवानन्दाम्बुधिः नान्यत् किञ्चिदभिलषति। शरणार्थिनां साधकानां परमः शरण्यः शिव एवास्ते। तत्र येषां मनः समासक्तं, चेतः समाविष्टं तेषामन्यत्र रमणं कथं वा सम्भवेत्? यस्य अनन्यभावेन शिवे शरण्ये प्रपत्तिरुपजायते सदानन्दसमाविष्टस्य तस्य शरणनाम समुदेति शास्त्रीयम्। यो भक्तः सहस्रादित्यसमप्रभं शिवज्ञानमासादयति तस्य स्वयम्प्रकाशमाप्तवतः तामसो विकारः कथमुदियात्? यथा पतिपरायणा सती नारी शीलवती तिष्ठति तथैव शरणस्थलधाम समुपगतः साधकः सुशीलो राजते।।१४६-१४९।।

**शिवाद्वैतमहाज्ञानमपवर्गस्य कारणम्।**
**भावयन् सततं योगी संसारात् प्रविमुच्यते।।१५०।।**

**घृते घृतमिव न्यस्तं वन्हौ वन्हिरिवार्पितः।**
**दुग्धे दुग्धं यन्मिलितं यथा भेद विवर्जितम्।।१५१।।**

**तथा हि शिवयोगेन शिवं सर्वत्र भावयन्।**
**परब्रह्मविलीनात्मा भाति भेदविवर्जितः।।१५२।।**

**सूत्रस्य पद्धिधेरेव विस्तारं हि महामुनिः।**
**लोपामुद्रासमेतश्च सर्वैः शिष्यगणैः सह।।१५३।।**

**श्रुत्वा श्रुत्वा पुनः श्रुत्वा श्रीरेणुकमहागुरोः।**
**पद्धिधेरर्थगाम्भीर्यं मुमुदे कुम्भसम्भवः।।१५४।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गुरोरादेशमासाद्य शिवयोगं समाचरन्।
शिवाद्वैतं हि सर्वत्र बोधयामास तत्परः।।१५५।।

तदाप्रभृति लोकेऽस्मिन् सर्वेषां हितकाङ्क्षिणी।
स्थिरीभूता हि सर्वत्र शिवभक्तिः सनातनी।।१५६।।

उक्तेन विधिना यो हि पदस्य प्राप्तिहेतवे।
सद्गुरुं हि समाश्रित्य सेवां कृत्वा च भक्तितः।।१५७।।

दीक्षालब्धानि लिङ्गानि बाह्ये चाभ्यन्तरे तथा।
धारयन् सततं भक्त्या पूजयन् भावयन्नपि।।१५८।।

शिवोऽहमिति भावेन भवं च्छित्वा भयानकम्।
पदं हि परमं प्राप्य मुक्तिमाप्नोति शाश्वतीम्।।१५९।।

पद्विधेरेव सूत्रस्य सारमेतन्महत्तरम्।
वेत्ति यो तत्त्वतस्तस्य पुनर्जन्म न विद्यते।।१६०।।

प्राणलिङ्गे समासक्तस्य आत्यन्तिकं सुखमनुभवतः निरन्तरं तत्रैव रममाणस्य शिवं समाविशतः स्थूलता प्रविलीयते। त्रिविधैः आणवादिमलैः मुक्तस्य साधकस्य शिवोऽहमिति भावनया शिवेन भगवता ऐक्यं समुपजायते। मायामोह-परिकल्पितं पशुत्वं तत्पतित्वं वा यद् विजृम्भते ततो विलीनमोहमायस्य न पशुता न वा पशुपतिरूपता समुल्लसति स शिवरूपतां स्वां चिन्मयीमन्वेति। अद्वैतबोधोदयलब्धं यत्सुखं क्षणार्द्धव्यापि तत्सुखं भोगिभिः कोटिवर्षेणापि लब्धुं न शक्यते। साधकभक्तस्य शिवशरणमुपेतस्य निरहंकारस्य कृतम् अकृतं वा कर्म बन्धाय न भवति। यतोहि शिवज्ञानवह्निना तस्य कर्मबीजं प्रदग्धं भवति। देहीव भासमानस्य तस्य लौकिकी देहयात्रा प्रचलति। शिवज्ञानवान् शिवयोगी साक्षात् शिव एव भवति स महाकर्म कुर्वन्नपि तत्फलभोगं नैवाश्नुते। देहेन्द्रियसमुद्भवं सुकृतं दृष्कृतं वास्य शिवे समर्पितं भवति। साधकवरोऽसौ देहिन्द्रियादीनि शिवपूजाङ्गभावेन भावयन् विगतबन्धशोकः मुक्तः सन् शिवस्वरूपात्मसम्भृतं जगदवलोकयति। सद्गुरुं विश्वं स्वात्मानं च शिवस्वरूपं योगिनः पूर्णाहन्ता समुदिता भाति। एषा पूर्णाहन्तात्मा विद्या पराविद्या इत्याख्यायते। एनामवाप्य योगिनो नित्यमुक्ता भान्ति। अपवर्गमूलं शिवाद्वैतज्ञानं भावयतो योगिनः संसारबन्धाद् विमुक्तिर्जायते। घृतराशौ घृतविन्दुः, वह्निराशौ वह्निकणः, दुग्धराशौ दुग्धलवः यद् वद् अभेदमवाप्नोति तद्वद्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



लिङ्गध्यानाद् शिवे विलीनो जीवः शिवाभेदमवाप्नोति। प्राप्यस्य शिवपदस्य प्राप्त्यै शिवनियोगात्मा यो विधिः स पद्विधिरिति सूत्रव्याख्यानेन सुविस्तरं श्रीरेणुकसद्गुरोः समवाप शिष्यगणैः परिवृतः धर्मपत्नीपुरस्कृतो महामुनिः सूत्रार्थ-गाम्भीर्यम्। श्रीगुरोराज्ञया सूत्रार्थमहिमानं विज्ञानवता महामुनिना शिवयोगमादरयता शिवाद्वैतभावः सुदृढशिवभक्तिषु जनेषु जागरित इति सनातनीं शिवभक्तिं प्रतिष्ठापयितुं सफलप्रयत्नस्य सूत्रस्य अवाङ्मनसगोचरं महिमानमभिवन्दे-पद्विधिरिति महावाक्यस्य॥१५०-१६०॥

## ॥लङ्कायां त्रिकोटिलिङ्गस्थापनलीला॥

पद्विधिं सूत्रमेवं च ऋषिं संबोध्य रेणुकः।
देवदेवं महादेवं ध्यायन्नन्तर्दधे तदा॥१६१॥

स्वच्छन्दाचाररसिको रेणुको गणनायकः।
स्वसिद्ध्या व्योममार्गेण पुरीं लङ्कां समागतः॥१६२॥

आगतं तं महाभागं दृष्ट्वा भक्त्या विभीषणः।
पाद्यादिभिः समभ्यर्च्य स्वागतं व्याजहार ह॥१६३॥

प्रासादे स्वर्णसन्नद्धे भव्ये सिंहासने शुभे।
उपावेश्य महाचार्यं विधिवत् समपूजयत्॥१६४॥

पूजातुष्टं महाचार्यं दृष्ट्वा भक्त्या विभीषणः।
बभाषे शान्तया वाचा साञ्जलिर्विनयान्वितः॥१६५॥

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सपत्नीकः सशिष्यश्च दीक्षां गृह्णीष्व सन्मुने।
सर्वेषामधिकारोऽत्र दीक्षायां च विशेषतः।।४२।।

गुरोरादेशमाकर्ण्य दधीचिस्तु महामुनिः।
झटिति सम्मतिं दत्वा शुभां दीक्षां समग्रहीत्।।४३।।

दीक्षाशुद्धं मुनिं दृष्ट्वा दारुको गणनायकः।
प्रसन्नवदनो भूत्वा वृष्टिसूत्रं समादिशत्।।४४।।

वृष्टिमूला कृषिः सर्वा वृष्टिमूलञ्च जीवनम्।
तस्मादादौ प्रयत्नेन वृष्टिर्ज्ञेया समासतः।।४५।।

वर्षणं वृष्टिरित्युक्तं मेघात्तज्जायते किल।
प्राणिनोऽवतरन्त्येव वृष्ट्या भूमौ पुनः पुनः।।४६।।

व्युत्पत्त्या जलतीत्येवं जलं जीवनमुच्यते।
वसन्ति च जले जीवा जलेनैव वहन्ति च।।४७।।

जलेन वर्धते चान्नं ह्यन्नं प्राणाः प्रकीर्तिताः।
तेनैव जन्तवः सर्वे जीवन्ति जन्मजन्मसु।।४९।।

मा हिंस्यात् सर्वभूतानि श्रुतिराह सनातनी।
अथापि प्राणिनो घ्नन्ति ह्याहारार्थं परस्परम्।।४९।।

जीवैःपूर्णमिदं सर्वं जगदेतच्चराचरम्।
सबलो दुर्बलं हन्ति जीवो जीवस्य जीवनम्।।५०।।

अतो ह्यन्नं हि जीवानां हेतुतां जन्मनि व्रजेत्।
तस्मादन्नं न नाश्येत भूतिकामेन जन्तुना।।५१।।

पानीयं प्राणिनां प्राणास्तदायत्तं हि जीवनम्।
तस्मात् सर्वास्ववस्थासु न वारि व्यर्थमाचरेत्।।५२।।

अन्नेनापि विना जन्तुःप्राणान् धारयते चिरम्।
जलाभावे पिपासार्त्तःक्षणात् प्राणैर्विमुच्यते।।५३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तस्मात् पानीयदानाद्वै न परं विद्यते क्वचित्।
तच्च दद्यान्नरो नित्यं यदीच्छेद्भूतिमात्मनः।।५४।।

अन्नतोयसमं दानं न किञ्चिदिह भूतले।
तृप्यन्ति प्राणिनो यत्तदन्नतोयप्रदो भवेत्।।५५।।

अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत।
प्राणदानात् परं नास्ति नैव नैवास्ति भूतले।।५६।।

अन्नतोयप्रदो दानी पापेभ्यः प्रविमुच्यते।
सर्वकामानवाप्नोति ह्यायुष्यं कीर्तिमेव च।।५७।।

अन्नोदकेन रूपेण सेव्यमानस्य देहिनः।
देहं प्रविश्य भूतानि लभन्ते जन्म नूतनम्।।५८।।

अन्नतोयस्वरूपेण प्राणिनो देहमाश्रिताः।
पच्यन्ते जाठरे वन्हौ धातुरूपेण वै किल।।५९।।

सप्त ते धातवो मुख्याःगौणास्त्वन्ये प्रकीर्तिताः।
रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि ते किल।।६०।।

एते सप्त स्वयं स्थित्वा देहं दधति वै खलु।
अत एव तु सप्तैते धातवः परिकीर्तिताः।।६१।।

कफो वातं च पित्तं च शरीरं दूषयन्त्यलम्।
अत एव च सप्तैते दोषशब्देन कीर्तिताः।।६२।।

स्तन्यं रजो वसा चैव स्वेदो दन्तास्तथैव च।
केशास्तथैव वोजश्च सप्तैते चोपधातवः।।६३।।

मलो मूत्रं कफश्चेति दोषा देहे च संस्थिताः।
एते सर्वे विकाराश्च ह्यन्नस्य परिकीर्तिताः।।६४।।

रजःशुक्रौ च मुख्यौ स्तो धातू यल्लोकशास्त्रयोः।
तत् तयोरेव संयोगात् सन्ततिर्जायते पुनः।।६५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पर्जन्यादागतो जीवो प्रविश्यान्नं हि वै किल।
पचन्वै जाठरे वह्नौ धातुरूपं बिभर्त्यसौ।।६६।।

अन्तिमःशुक्रधातुश्च मातृगर्भं प्रविश्य च।
नवमासानुषित्वात्र रुदन्वै जायते शिशुः।।६७।।

सन्ततिर्ह्यन्तिमं रूपं ह्यन्नस्येति विचिन्त्यताम्।
अतो हि प्रोच्यते लोके जन्मदुःखं तु दारुणम्।।६८।।

पञ्चाग्निविद्यया तत्र छान्दोग्याख्यश्रुतौ खलु।
उक्तं च विस्तरेणैव जीवानां जन्मजा व्यथा।।६९।।

शिवस्यांशो ह्ययं जीवोऽविद्यया मोहितः सदा।
परिभ्रमति संसारे निजकर्मानुसारतः।।७०।।

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान्।
देवतिर्यङ्मनुष्यादिनानायोनिषु जायते।।७१।।

जायते म्रियते चैव संसारे च पुनःपुनः।
विश्रान्तिर्नास्ति वै तस्य कर्मबद्धस्य देहिनः।।७२।।

देहःकोशो मलानां च त्रितापेन युतः पुनः।
वसतस्तत्र जीवस्य कुतःशान्तिःकुतःसुखम्।।७३।।

न चास्ति देहसंबन्धो निर्लेपस्यात्मनःखलु।
अज्ञानकर्मयोगेन देही भवति भुक्तये।।७४।।

बालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीव इति प्रोक्तःश्रुत्या जीवस्वरूपकम्।।७५।।

निष्कलब्रह्मणस्तस्य शिवस्य परमात्मनः।
स्वयंज्योतिःस्वरूपस्य निर्मलस्याव्ययस्य च।।७६।।

परात्परस्य देवस्य निर्गुणस्येश्वरस्य च।
सच्चिदान्दरूपस्य ह्यंशास्ते जीवसंज्ञकाः।।७७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अनाद्यविद्यया युक्ता ब्रह्मैक्यज्ञानवर्जिताः।
परिभ्रमन्ति संसारे जीवाः कर्मानुसारतः।।७८।।

एतेषां देहिनां चैव सूक्ष्मं तल्लिङ्गसंज्ञकम्।
शरीरं हि तदामोक्षमक्षयं परिकीर्तितम्।।७९।।

तल्लिङ्गे कर्मबीजानि जन्मजन्मकृतानि तु।
यावद्भोगं वसन्त्यत्र तैरेव जायते पुनः।।८०।।

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि।
कर्मभोगाय जीवो हि धत्ते देहं नवं नवम्।।८१।।

पक्वेषु कर्मबीजेषु फलभोगाय वै किल।
तदा तदनुरूपं च स्थूलं धत्ते शरीरकम्।।८२।।

।।शरीराणां भेदाः।।

शरीराज्जायते कर्म शुभं चाशुभमेव च ।
भुज्यते च फलं तेन शरीरं भोगसाधनम्।।८३।।

कर्मभोगाय जीवानामीश्वरस्तन्नियामकः।
सृजते च शरीराणि लक्षलक्षविधानि च।।८४।।

सृष्टेषु च शरीरेषु द्वैविध्यं स्थूलतो मतम्।
व्यक्तं हि प्रथमं प्रोक्तमव्यक्तं स्याद् द्वितीयकम्।।८५।।

व्यक्तानि लक्षसंख्यानि दिशावसुमितानि च।
अव्यक्तानि शरीराणि कोटिलक्षमितानि हि।।८६।।

व्यक्तानां सर्वभूतानां देहः प्रोक्तश्चतुर्विधः।
उद्भिज्जः स्वेदजोऽण्डोत्थश्चतुर्थश्च जरायुजः।।८७।।

उद्भिज्जाः स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः।
तथा चोप्तानि बीजानि संसिक्तान्यम्भसा पुनः।।८८।।

स्वेदजाः कृमिदंशाद्याः पक्षिसर्पादयोऽण्डजाः।
जरायौ जायमानत्वाज्जरायुजमथोच्यते।।८९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



चर्माकृतिश्च सूक्ष्मा या जरायुः सा निगद्यते।
शुक्रशोणितयोर्योगस्तस्मिन्संजायते खलु।।९०।।

तस्माज्जाता हि ये जीवा उच्यन्ते ते जरायुजाः।
पशवश्च पिशाचाश्च मनुष्याश्च मृगास्तथा।।९१।।

जरायुजा हि कथ्यन्ते सिंहाद्या हिंस्त्रकाअपि।
द्विपादबहुपादाश्च तिर्य्यग्गतियुताश्च ये।।९२।।

जरायुजा हि कथ्यन्ते प्राणिनो हि महामुने ।
एकविंशति - लक्षञ्च प्रत्येकं तद्भवत्यहो।।९३।।

ईश्वरेण कृतं सर्वं जीवानां भोगसाधनम्।
व्यक्तास्तु जन्तवः सर्वे विभज्यन्ते हि सप्तधा।।९४।।

देवाश्च मानवाश्चैव जलजा विहगास्तथा।
सरीसृपा मृगाश्चैव स्थावराश्चेति सप्त ते।।९५।।

एतानि सप्तजन्मानि प्रसिद्धानि महामुने।
भोगयोनिषु चैतासु प्रशस्तो हि जरायुजः।।९६।।

तत्रापि मानवः श्रेष्ठः सर्वश्रेष्ठः प्रकीर्त्यते।
योनिमेनां समासाद्य जीवो हि कर्मजं फलम्।।९७।।

भुञ्जन्नेव नवं कर्म कुरुते हि पुनःपुनः।
पापाधिक्ये हि जीवोऽयं जायते हीनयोनिषु।।९८।।

पुण्याधिक्ये च सम्प्राप्ते देवयोनिषु जायते।
समाभ्यां पुण्यपापाभ्यां मानुष्यं लभते च सः।।९९।।

अतो हि सर्वशास्त्रेषु प्रोक्तं तद्दुर्लभं खलु।
भोगार्थं जन्यते जन्तुर्भुञ्जन् कर्म करोत्यपि।।१००।।

पुनर्जन्म पुनर्भोगः कर्मभोगौ पुनःपुनः।
अयमेव हि संसारो जीवानां स्यात् पुनःपुनः।।१०१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आयुः कर्म च वित्तं च विद्या च निधनं तथा।
कर्माधीनानि चैतानि विधिना विहितानि च।।१०२।।

पुण्यकृत् सुकृती पुण्यां पापान्तु पापकृत् तथा।
कर्मणां वशगो जीवो योनिमुच्चावचां व्रजेत्।।१०३।।

लब्धजन्मैष जीवो हि कामार्थावर्थयन् खलु।
यततेऽहर्निशं रागाद् विश्रान्तिकथया विना।।१०४।।

धर्मार्थकाममोक्षेषु ह्यर्थकामौ तु लौकिकौ।
धर्मार्जितौ हि तावेव सुखस्वर्गप्रदौ मतौ।।१०५।।

अधर्मेणार्जितौ तौ तु ह्यर्थकामौ हि भो मुने।
हीनयोनिप्रदौ प्रोक्तौ नरकप्रापकावपि।।१०६।।

असत्येन च चौर्येण अन्यायेन पुनः पुनः।
मार्गेण स्वीकृतौ तौ हि भूयोनर्थकरौ स्मृतौ।।१०७।।

परस्त्रीसहवासेन ह्यन्यार्थहरणेन च।
अभक्ष्यभक्षणेनाथो प्राणिनां हिंसया तथा।।१०८।।

एतैस्तनुकृतैरेव पापैर्जीवो निरन्तरम्।
स्थावरत्वं समापद्य भुङ्क्ते पापफलं किल।।१०९।।

अनौचित्यं च पैशुन्यं पारुष्यं ह्यनृतं तथा।
एतैर्वाक्कृतदौषैस्तु पशुपक्ष्यादियोनिषु।।११०।।

लब्ध्वा जन्म बहोःकालं भुञ्जन्पापफलं खलु।
हीनयोनिमहाचक्रे नैरन्तर्यतया भ्रमेत्।।१११।।

अनिष्टमन्यजीवानां सदा वै चिन्तयन् खलु।
परद्रव्यं च नारीं च हृदये भावयन् सदा।।११२।।

एतद्दुर्भावदोषेण घोरघोरतरेण च।
योनिष्वतीव हीनासु जायते हि सुनिश्चितम्।।११३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अतोऽर्थकामयोर्भोगे सम्मुखं समुपस्थिते।
निषिद्धौ त्यजति प्राज्ञो गृह्णीयाद्विहितौ शुभौ।।११४।।

शिवःसाक्षात्पतिः प्रोक्तो जीवस्तु पशुरुच्यते।
पाशबद्धस्य जीवस्य जननाद् मरणं ध्रुवम्।।११५।।

एको हि जायते जन्तुर्म्रियते चैक एव च।
एको हि भुङ्क्ते स्वं पापं पुण्यं चाप्येक एव हि।।११६।।

एवं दुःखैरुपेतस्य कर्मबद्धस्य देहिनः।
लोकेषु भ्रमतोऽजस्त्रं कुत्र शान्तिरवाप्यते।। ११७।।

यथेह सुखभोगार्थं देशाद्देशान्तरं नरः।
चरेदेष तथैवायं प्रेत्य लोकान्तरं व्रजेत्।।११८।।

योगसामर्थ्याद् क्षणार्द्धेन निमिषक्षेत्रमवाप्य दधीचेराश्रमं प्राप्य अथर्वपुत्रं चित्तिजननीकं गमस्तिनीपतिं पिप्पलादजनकं सर्वप्राणिहिते रतं श्रीदधीचिमुनिं दृष्ट्वा प्रहृष्टोऽभूद् दारुकः सद्गुरुः। मां समुद्धर्तुमागतो गुरुरिति गभस्तिनीपत्नी-सहितः स्वागतव्याहृत्या पाद्यादिना सम्पूज्य गृहीतशुभाशीः कृतज्ञतावचो विनिवेद्य भ्रमतां जीवानां सद्गतेरभ्युपायं पप्रच्छ। सात्त्विकतपःप्राचुर्येण त्वादृशः कोटिमध्ये कश्चनैकः सदुपायं सद्गतेर्ज्ञातुं समर्थो भवतीति त्वामुपदिशामि। कदाचिद् देवदेवः अस्मान् पञ्च आगमार्थमुपादिशत्। तस्य तात्पर्यमवगन्तुं सूत्रमेकं प्रतिपादयामि— "वृष्टिरिति।" जीवगमनागमनादिकं रहस्यमत्र सूत्रे सूक्ष्मतया विविच्यते। यथोपनयनसंस्कारमवाप्य वेदस्वाध्यायाधिकारो लभ्यते तथैव समवाप्तदीक्षः एतत्सूत्रार्थं बोद्धुं क्षमते। सपत्नीकः सशिष्यो दधीचिमुनिः श्रीदारुकाद्गुरो; प्राप्तदीक्षासंस्कारः वृष्टिरिति सूत्रं लेभे। यथा कृषिः वृष्टिमूला भवति तथैव जीवनमपि जलमूलं भवति। वर्षणं नाम वृष्टिः सा च मेघादुद्भवति। एतया वृष्ट्या सहैव प्राणिनां भूमौ अवतरणं भवति। जलतीति जलमिति व्युत्पत्त्या जलं जीवनमित्यभिधीयते। जीवाः जले वसन्ति जलेनैव इहामुत्र सर्वत्र गच्छन्ति। जलेन अन्नाभिवृद्धिः अन्नं प्राणा इत्युच्यन्ते प्राणैरेव जन्मजन्मान्तरं जीवा जीवन्ति। मा हिंस्यात् सर्वभूतानि— इत्येवं निषिद्धापि हिंसा प्राणिभिः आहारहेतवे विधीयते। चराचरमये जगति व्याप्तेषु जीवेषु सबलेन दुर्बलस्य हननं प्रचलति यदुच्यते जीवो जीवस्य जीवनमिति। जीवानां जनने यद् अन्नस्य हेतुता ततो भूतिकामो नान्नं नाशयेत्। प्राणिनां प्राणाः जलं यतो जीवनं ततः जलं व्यर्थं न यापनीयम्। अन्नं विना चिरं प्राणा धार्यन्ते जलं विना तु नेति जलं तद् दानं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विशिष्यते। प्राणिनां तृप्तिः अन्नतोयाभ्यां जायते तयोर्दानात् प्राणदानं सम्पद्यते प्राणदानात् परं किञ्चिन्न भवतीति अन्नतोयप्रदस्य पापेभ्यो मुक्तिः, कामनाप्राप्तिः आयुष्यसत्कीर्तिलाभश्च जायते। अन्नोदक-रूपेण सेव्यमानस्य प्राणिनः देहमाविश्य भूतानां नूतनं जन्म जायते। प्राणिनो देहमाश्रित्य अन्नतोयस्वरूपेण जाठरे-वह्नौ पच्यमानाः सप्तधातुरूपेण सप्तदोष-रूपेण सप्तोपधातुरूपेण देहे स्थिताः अन्नस्यैव विकारा ज्ञेयाः। तत्र मुख्यौ धातू रजः शुक्रौ स्तः, तयोः संयोगात् सन्ततिर्जायते। पर्जन्यादागतो जीवः अन्नं प्रविश्य जाठर—वह्नौ पच्यमानः धातुरूपतां व्रजति, शुक्रधातु; अन्तिमः मातृगर्भं प्राविशति नव मासान् उषित्वा रुदन् शिशुरुत्पद्यते तदेवम् अन्नम् सन्ततिरूपेण परिणतिं याति। तदेतद् जन्मदुःखं छान्दोग्यश्रुतौ पञ्चाग्निविद्याप्रकरणे सविस्तरं प्रतिपादितम्। शिवस्यांशः जीवः अविद्यया मोहितः किञ्चित्कर्ता किञ्चिज्ज्ञाता अनादिशरीरः देवतिर्यङ् मनुष्यादियोनिषु जायमानो म्रियमाणश्च देहः कोशो मलानां चेति तापत्रितय-संयुक्तः बम्भ्रमीति। निर्लेप आत्मा अज्ञानकर्मयोगेन देही भवन् कर्मफलं भुङ्क्ते। बालाग्रशतभागात्मा जीवः निर्मलस्येश्वरस्यांशभूतः अनाद्यविद्या-संयुक्त; संसारे भ्रमति। यदस्य सूक्ष्मं शरीरं तल्लिङ्गशरीरमित्यभिधानं जीवस्य आमोक्षमक्षयं तिष्ठति। सूक्ष्मशरीरेऽस्मिन् जन्मजन्मान्तरकृतानि कर्मबीजानि नैरन्तर्येण निर्मितानि भवन्ति तत्संस्कार परम्परया जीवो नवं नवं देहं धत्ते। कर्मविपाकफलभोगाय स्थूलं देहमसौ प्राप्नोति। शरीरसम्पाद्यं कर्म शुभाशुभफलदं भवतीति शरीरावच्छेदेन कर्मफलं भुङ्क्ते जीवः। ईशसृष्टं शरीरं द्विविधं व्यक्तम् अव्यक्तं च। प्राणिनां व्यक्तो देहश्चतुर्विधः सप्तधा देवादिरूपेणापि विभज्यते। जीवः सदा कामार्थौ प्रार्थयन् प्रवर्तते। धर्मार्जितौ तौ सुखस्वर्गप्रदौ भवतः। अधर्मेणार्जितौ तु हीनयोनिप्रदौ भवतः। चौर्यासत्यादिना स्वीकृतौ ह्येतौ अनर्थकरौ भवतः। कायकृतैः पापैः स्थावरतां वाक्कृतैर्दोषैः पशुपक्ष्यादि-हीनयोनौ निरन्तरतया जीवो भ्रमति। दुर्भावदोषेण हीनयोनिं प्राप्नुयाद् जीवः। शिवः पशूनां पतिः, जीवः पशुः पाशबद्धस्य तस्य जननमिव मरणमपि ध्रुवम्। पुण्यं पापं वा एको जायमानो म्रियमाणश्च प्राणी भुङ्क्ते। देशाद् देशान्तरमिव लोकाल्लोकान्तरं व्रजति प्रेत्य जीवः॥१६-११८॥

## ॥सप्तलोकाः॥

**भोगप्रदानि लोकानि सन्ति भान्ति सुबहून्यपि।**
**भूर्लोकादूर्ध्वभागे च ह्यधोभागे तथैव च॥११९॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भूर्भुवः स्वर्म्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते ह्यूर्ध्वलोकाःप्रकीर्त्तिताः।।१२०।।

अतलं सुतलञ्चैव वितलञ्च तलातलम्।
महातलं रसाख्यं च पातालं चेति वै खलु।।१२१।।

ह्यधोलोकाः प्रकीर्त्यन्ते सप्त संज्ञासमन्विताः।
आहत्य सन्ति वै लोकाः संख्यया च चतुर्दश।।१२२।।

एतानि सर्वलोकानि जीवानां भोगसिद्धये।
कर्त्रा च देवदेवेन निर्मितानि महामुने।।१२३।।

चतुर्दशसु लोकेषु भूर्लोकः प्रोच्यते महान्।
भुञ्जन् कर्मफलं जीवः कुरुते च नवं पुनः।।१२४।।

अविद्यामोहिता जीवाः शिवैक्यज्ञानवर्जिताः।
परिभ्रमन्ति संसारे स्वस्वकर्मानुसारतः।।१२५।।

अत एव च जीवानां कर्मभूमिरयं खलु।
कुर्वन्नेवेह इत्युक्तं श्रुतावपि महामुने।।१२६।।

अणुरूपो ह्ययं जीवो हृदये निवसन् खलु।
अश्नन् कर्मफलं सर्वं दीपवद् प्रविराजते।।१२७।।

एतेषां सर्वजीवानां साक्षिभूतो महेश्वरः।
नियन्त्रयति तेषां वै कर्मयन्त्रं निरन्तरम्।।१२८।।

फलाशात्यक्तजीवस्य गतिः शास्त्रेषु कीर्तिता।
अतःसर्वैःफलं त्यक्त्वा कर्तव्यं कर्म एव च।।१२९।।

द्विविधं तत्फलं प्रोक्तं कर्मणां सर्वजीविनाम्
आद्यं लोकान्तरप्राप्तिर्द्वितीयं शुद्धिरात्मनः।।१३०।।

काम्ये लोकान्तरप्राप्तिर्निष्कामे तु मनःशुचिः।
अतःकाम्यानि संत्यज्य निष्कामं च समाचरेत्।।१३१।।

कुर्वन्नेवं सदा कर्म निष्कामं हि निरन्तरम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विशुद्धो जायते जीवः प्रक्षीणमलवासनः।।१३२।।

स्वात्मनःप्रतिकूलं यत् तत्परेषां न चाचरेत्।
अयमेव परो धर्मः सर्वैरेव पुरस्कृतः।।१३३।।

जीवानां कर्म शुद्ध्यर्थमहिंसाद्याःप्रकीर्तिताः।
तदनुष्ठानमात्रेण जीवः शुद्धो भविष्यति।।१३४।।

तपःकर्म जपादीनि ध्यानज्ञानानि चैव हि।
जीवशुद्धिकराण्येव कर्तव्यानि प्रयत्नतः।।१३५।।

शुद्धे तस्मिन् हि जीवे च मलकर्मविपाकतः।
शिवस्यैव प्रसादाद्धि शिवभक्तिः प्रजायते।।१३६।।

ततो विवेकमासाद्य शरीरात् पृथगात्मनः।
वैराग्यं विन्दते जन्तुः कारुण्यं प्राप्यते ततः।।१३७।।

गुरोरेव हि कारुण्याद् दीक्षां लब्ध्वा महामुने।
मलेभ्यो मुक्तिमासाद्य योगेन विन्दते गतिम्।।१३८।।

दारुकस्य वचःश्रुत्वा प्रसन्नःस महामुनिः।
स योगः कीदृशश्चेति गुरुं वचनमब्रवीत्।।१३९।।

जिज्ञासां तां समाकर्ण्य प्रसन्नो दारुको गुरुः।
उवाच शान्तया वाचा शिवयोगं समासतः।।१४०।।

हठादिसर्वयोगेषु शिवयोगो विशिष्यते।
यमालम्ब्य च जीवो हि सद्यो गतिमवाप्नुयात्।।१४१।।

भूलोकाद् ऊर्ध्वं भूरादयः सप्तलोकाः, तदधः अतलादयः सप्तलोकाः जीवभोगार्थं लोकाः सृज्यन्ते। अणुर्जीवो हृदये वसन् कर्मफलमश्नुते साक्षी चेता केवलो निर्गुणः महेश्वरः कर्मयन्त्रं नियन्त्रयति। काम्यफलं लोकान्तरप्राप्तिः, निष्काम-फलन्तु आत्मशुद्धिः कीर्तिता। तपःप्रभृत्या आत्मशुद्धिः शुद्धे जीवे शिवप्रसादात् शिवभक्तिरुदीते। शरीरात्मनोः विवेके वैराग्यमुदेति, कारुण्यावाप्तिः दीक्षालाभः, मलमोचनम्, योगात् शिवसमावेश; कृतकृत्यता चेति श्रीदारुकः प्रत्याह मुनिं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रीमन्तं दधीचिम्। अथ को योग इति शिष्यप्रश्ने हठादितः शिवयोगो विशिष्यते अनेन जीवः सद्यः सद्गतिमाप्नोति॥११९-१४१॥

दीक्षामूलःस योगो हि दीक्षा मलनिवारिणी।
अत एव च जीवानां दीक्षा मोक्षस्य साधनम्॥१४२॥

जीवत्वं दुःखसर्वस्वं मलकल्पितमुच्यते ।
मलानि च निवर्तन्ते गुरोर्दीक्षाबलेन हि॥१४३॥

दीक्षाशुद्धो हि जीवोऽयमर्चयन्निष्टलिङ्गकम्।
प्राणभावादियोगेन शिवेनैक्यमवाप्नुयात्॥१४४॥

शिवोऽहमिति भावेन भावयन् योगमुत्तमम्।
शिवो भवति जीवोऽयं कीटभ्रमरवत्तदा॥१४५॥

तदर्थं च स्थलान्यत्र षडुक्तानि विशेषतः।
भक्ताद्यैक्यावसानानि सोपानानि महामुने॥१४६॥

सोपानानां तु साहाय्यात् सौधमारुह्यते यथा ।
तथा षड्भिस्थलैरेव योगी तां विन्दते गतिम्॥१४७॥

आद्यं भक्तस्थलं प्रोक्तं माहेश्वरस्थलं ततः।
प्रसादितु तृतीयं स्यात् प्राणलिङ्गिस्थलं ततः॥१४८॥

शरणस्थलमन्यत्तु षष्ठमैक्यस्थलं मतम्।
एतानि षट्स्थलानीति प्रोच्यन्ते शास्त्रपारगैः॥१४९॥

भक्तेरेव विकासेन योगमार्गेण साधकः।
ऐक्यस्थलं समासाद्य जीवन्मुक्तो भविष्यति॥१५०॥

श्रद्धेति प्रोच्यते लोके गुरौ विश्वासरूपिणी।
भक्तिः सा प्रथमा प्रोक्ता तया भक्तस्थलं स्मृतम्॥१५१

विभूत्या भूषिताङ्गश्च लिङ्गरुद्राक्षसंयुतः।
पञ्चाक्षरजपासक्तःशिवभक्त इति स्मृतः॥१५२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रद्धया हि यजन्निष्टं गुरुं जङ्गममेव च।
सहिष्णुःक्षेत्रदेवेषु स भक्त इति गीयते।।१५३।।

भक्तेरुत्कर्षतो भक्तः धृढवैराग्यतः खलु।
निष्ठाभक्तिसमायुक्तो भक्तो माहेश्वरो भवेत्।।१५४।।

भावयन्नपि सर्वत्र शिवं माहेश्वरो जनः।
इष्टलिङ्गार्चनासक्तः सर्वदेवपराङ्मुखः।।१५५।।

प्राणात्ययेऽपि सम्प्राप्ते सर्वस्वापहरेऽपि च।
यो न सन्त्यजते निष्ठां स वै माहेश्वरः स्मृतः।।१५६।।

परस्त्रीपरसम्पत्सु यः सदा स्यात् पराङ्मुखः।
स वै माहेश्वरः प्रोक्तः स्वेष्टनिष्ठापरायणः।।१५७।।

एवं निष्ठाविशेषेण ह्यर्चयन्निष्टलिङ्गकम्।
प्रसादं सेवयन् तस्य प्रसादीति निगद्यते।।१५८।।

सदा लिङ्गार्पितं वस्तु स्वीकुर्वन् लिङ्गतत्परः।
लभते च प्रसन्नत्वं माहेश्वरोऽवधानवान्।।१५९।।

गुरुलिङ्गचराणां च पूजां कृत्वैकभावतः।
भुञ्जते तत्प्रसादान्नं प्रसादीति स कथ्यते।।१६०।।

प्राणो यत्र लयं याति प्राणायामविशेषतः।
प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः।।१६१।।

हृदयस्थं हि तल्लिङ्गं प्राणशक्तिसमन्वितम्।
वेत्ति यो शिवयोगेन प्राणलिङ्गीति कथ्यते।।१६२।।

अनुभवाख्यया भक्त्या ह्युपचारैःक्षमादिभिः।
प्राणलिङ्गं चिदाकारं पूजयेत् साधकोत्तमः।।१६३।।

अनया पूजया चैव प्राणलिङ्गस्थली तदा।
स्वकीयं चित्स्वरूपं च मोदेनानुभवत्यसौ।।१६४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आनन्दभक्तिसंयुक्तः सती ज्ञेयः शिवः पतिः।
तदन्यविमुखःसोऽयं प्रोक्तः शरणनामवान्।।१६५।।

शिवानन्दे परिप्राप्ते वाञ्छेदन्यन्नरः किमु।
गङ्गामृतेन तृप्तस्य कोर्थः स्यात्कूपतोयतः।।१६६।।

तस्मात् सर्वप्रयत्नेन शङ्करं शरणं व्रजेत्।
शिव एव शरण्यस्तु सर्वेषां जीविनां किल।।१६७।।

एवं सर्वात्मभावेन शिवं यः शरणं गतः।
शरणं तं विजानीयात् शिवानन्दपरिप्लुतम्।।१६८।।

सामरस्याख्यया भक्त्या यदा युक्तो भविष्यति।
शिवोऽहमितिभावेन तदैक्यं प्राप्यते ततः।।१६९।।

दृढे भावे च तस्मिन् हि द्वैतं तद्विलयं व्रजेत्।
तस्मिन् विलयमापन्ने कः पशुः को नु वा पतिः।।१७०।।

संसारसागरो ह्येष भेदबुद्धिसमुद्भवः।
अद्वैतबुद्धिपोतेन तीर्यतां तु विवेकिना।।१७१।।

अद्वैतभावनोत्पन्नं क्षणमात्रेऽपि यत्सुखम्।
तत्सुखं कोटिवर्षेण प्राप्यते नैव भोगिभिः।।१७२।।

कर्मबीजप्रदग्धस्य निर्मलज्ञानवह्निना।
पुनर्जन्म-व्यथा तस्य नास्ति नास्त्यत्र संशयः।।१७३।।

अहं गुरुरहं विश्वं शिवोऽहं च चराचरम्।
एवं पूर्णत्वभावेन भावयेत् सचराचरम्।।१७४।।

निरस्तविश्वसंभेदः निष्कलङ्कमनोदयः।
भावयेल्लीनमात्मानं शिवे विश्वप्रकाशके।।१७५।।

शिव एव जगत्सर्वं शिवादन्यन् न विद्यते।
शिवोऽहमिति यो बुद्ध्येत् स मुक्तो नात्र संशयः।।१७६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



जले चैव जले न्यस्ते वह्नौ वह्निसमर्पिते।
परे ह्यात्मविलीने च कुतो भेदकथा भवेत्।।१७७।।

भक्तेरुत्कर्षे वैराग्योदयः, भक्तिनिष्ठादार्ढ्ये भक्तो माहेश्वरो भवेत्। एष माहेश्वरः सर्वत्र शिवं भावयन् दृढनिष्ठावान् भवति। इष्टलिङ्गमर्चयतोऽस्य शिवप्रसादसेवनात् प्रसादी-संज्ञा-प्राप्तिः। इष्टलिङ्गप्रसादमङ्गीकुर्वन् माहेश्वरः गुरुलिङ्गजङ्गम-पूजकः प्रसादभुक् प्रसन्नः प्रसादी प्रोच्यते। प्राणायाम-परायणस्य यत्र प्राणलयः तत् हृदयस्थं प्राणलिङ्गं यो वेद स प्राणलिङ्गीति प्रोच्यते। अथानुभवभक्त्या क्षमाद्युपचारैः प्राणलिङ्गं सम्पूजयन् साधकः चित्स्वरूपमनुभवन् आनन्दभक्तिसंयुक्तः सतीस्वरूपमापन्न; शिव पतिं सेवमानः शरणनामवान् संजायते। सर्वजीवानां शरण्यं शिवं शरणं गतो हि शरणनाम लभते। अथ सामरस्यभक्तेरुदये शिवोऽहमिति भावनया शिवैक्यप्राप्तिः ऐक्ये द्वैतविलयाद् पशुरिति पतिरिति वा भेदो विलयं याति। भेदादुद्भूतः संसारसागरः अद्वैतबुद्धिपोतेन प्राप्तशिवैक्येन तीर्यते। शिवोऽहमिति दृढं विविञ्जानो जीवन्मुक्तिं लभते।।१४२-१७७।।

एवमुक्त्वा समासीनं शिवयोगपरायणम्।
दारुकं सुखमासीनं बभाषे प्राञ्जलिर्मुनिः।।१७८।।

वृष्टिसूत्रमुखेनैव जीवानां दुर्गतिं गतिम्।
श्रुत्वा तु विस्तरेणैव गतो मे चित्तविभ्रमः।।१७९।।

अद्य मे सफलं जन्म तपांसि फलितानि मे।
येन त्वं हि समागत्य कैलासान्मां न्यबोधयः।।१८०।।

सूत्रं तव मुखोद्गीर्णं जीवसद्गतिदायकम्।
मां विना कस्य लोकेषु श्रोतुमस्ति तपः परम्।।१८१।।

तपसां परिपाकेन शिवस्यैव प्रसादतः।
आगतस्त्वं महाभाग मदनुग्रहकांक्षया।।१८२।।

स्तुवन्तं विनयादेवं दधीचिं मुनिपुङ्गवम्।
आलोक्य करुणादृष्ट्या बभाषे दारुकस्तदा।।१८३।।

दधीचे हे महाभाग तपःसिद्धमनोरथ।
त्वां विना सूत्रशास्त्रस्य कःश्रोतुमधिकारवान्।।१८४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पात्रं शिवप्रसादस्य भवानेको न चापरः।
इत्येवं हि विनिश्चित्य मया ते कथितं खलु।।१८५।।

भवतापि हि भूलोके सूत्रमेतन्महत्तरम्।
देयं परीक्षितेभ्यस्तु लोकेभ्यो हि महामुने।।१८६।।

अवतीर्णं मया भूमौ सूत्रस्यास्य प्रवृत्तये।
प्रवर्तय महीभागे त्वमपि ज्ञानमीदृशम्।।१८७।

दैत्यो वृत्त्रासुरो नाम परपीडापरायणः।
तवास्थिनिर्मितास्त्रेण हतो ह्यग्रे भविष्यति।।१८८।।

तदा त्वमात्मदेहं च दहन् योगाग्निना किल ।
साधयिष्यसि देवानां कल्याणं भो महामुने।।१८९।।

वज्राख्येणास्त्ररूपेण वृत्रं हत्वा भवान् खलु।
आचन्द्रार्कं हि लोकेऽस्मिन् कीर्तिकायो भविष्यसि।।१९०।।

एवं भविष्यवाणीं च श्रावयित्वा हि दारुकः।
तेषु सर्वेषु पश्यत्सु योगेनान्तर्दधे किल।।१९१।।

दारुकोसौ महातेजा व्योममार्गेण वै किल।
अवन्तीं तां समागत्य प्राप स्थानं स्वकं खलु।।१९२।।

वटक्षेत्रे स्थितं तत्र सद्धर्मं सिंहपीठकम्।
अधिरुह्य चिरं कालं जनान् प्रबोध्य सर्वतः।।१९३।।

संस्थाप्य द्वापरे धर्मम् भूतले दारुको गुरुः।
पूरयित्वा शिवादेशं प्राप सिद्धेशमन्दिरम्।।१९४।।

सिद्धेश्वरं महादेवं वटक्षेत्रस्थितं परम्।
प्रार्थयामास देवेशं प्राञ्जलिर्दारुको गुरुः।।१९५।।

देवदेव महादेव त्वदाज्ञां पालयन्नहम्।
वृष्टिसूत्रं हि भूलोके विस्तरं प्रत्यपादयम्।।१९६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अतः परं न भूलोके स्थातुकामोस्मि शङ्कर।
अन्तरं त्वयि मे देहि प्राप्तये त्वत्स्वरूपकम्।।१९७।।

तदा सिद्धेश्वराल्लिङ्गादेहि वत्सेति शङ्करः।
आहूय दारुकं तं वै चकार लीनमात्मनि।।१९८।।

दारुके शाङ्करे लिङ्गे लीने तस्मिन् प्रकाशके।
विस्मिताः प्राणिनः सर्वे दृष्ट्वा दृश्यं महत्तरम्।।१९९।।

एवं श्रीदारुको योगी वृष्टिसूत्रेण वै किल।
बोधयित्वा शिवाद्वैतं संप्रतिष्ठितवान् गुरुः।।२००।।

प्राञ्जलिः दधीचिमुनिः वृष्टिरिति सूत्रमुखेन जीवस्य दुर्गतिं शिवानुग्रहात् सद्गतिं च विज्ञाय गुरुचरणेषु प्रणतः। सूत्रशास्त्रस्याधिकारिणं तं श्रीदारुकः भूलोके सूत्र-तात्पर्यं प्रसारयितुमादिदेश। योगाग्नि-दग्धदेहात् त्वदीयास्थिनिर्मितास्त्रेण वृत्रासुर-हननाद् देवविजयः भविष्यतीति सन्दिश्य योगेनान्तर्हितः अवन्तीं सम्प्राप्य सिद्धेश्वरशिवलिङ्गे समाविवेश।।१७८-२००।।

## हिन्दी तात्पर्य

### भगवत्पाद दारुक द्वारा महर्षि दधीचि को वृष्टिसूत्र का उपदेश

अध्याय के प्रारम्भ में शिवाचार्य नमस्कारात्मक मंगल करते हुए अन्नपूर्णा विश्वनाथ जो सम्पूर्ण विश्व के आदिगुरु हैं के स्तुति करने के अनंतर दृष्टिसूत्र के प्रवर्तक श्री दारुक भगवत्पाद का अभिवादन करते हैं।

शिव की आज्ञा से द्वापरयुग के आरंभ में उज्जैनीपुरी में श्री सिद्धेश्वर लिंग से श्री दारुकसद्गुरु का प्राकट्य हुआ। तेजोराशि से देदीप्यमान जटा भस्म रुद्राक्ष सुशोभित उनको देखकर लोगों ने पूछा— अतिअद्भुत स्वरूप वाले आप कौन हैं? उन्हें देखकर आश्चर्यचकित होते हुए लोगों से श्री दारुकाचार्य ने कहा मैं दारुक गणेश्वर हूँ। सनातन वीरशैव धर्म की स्थापना हेतु द्वापर युग में श्री सिद्धेश्वर लिंग से प्रकट हुआ हूँ। सतयुग में शिप्रा नदी के तट पर श्री सिद्धेश शिव के निकट वट क्षेत्र में मैने धर्मपीठ की स्थापना की थी। उस समय दैत्यों को यक्ष एवं गन्धर्वों को मैंने महामंत्र एवं उसके तात्पर्यार्थ का प्रकाशन-प्रबोधन द्वारा हमने अनुगृहीत किया था। इस समय मैं दधीचि के ऊपर कल्याण करने हेतु प्रकट हुआ हूँ। वह अभी नैमिषवन में आत्मकप्रबोधन हेतु महानतम तप कर रहे हैं। अतः मैं दधीचि मुनि के उद्धारार्थ प्रस्थान करता हूँ। दधीचि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मुनि के प्रति वृष्टिसूत्र का उपदेश करने हेतु व्योममार्ग से प्रस्थान किए हुए श्री दारुक सद्गुरु ने क्षणमात्र में दधीचि के आश्रम पहुँचकर उन्हें देखा। उनकी माँ का नाम चित्ति, पिता का नाम अथर्वा, पत्नी का नाम गभस्ति एवं पुत्र का नाम पिप्पलाद था। दधीचि अपनी धर्मपत्नी के साथ ही दारुक शिवाचार्य का स्वागत, पूजा कर आशीर्वाद प्राप्त कर संसार में भटकते जीवों की सद्गति का कौन सा उपाय है यह जिज्ञासा प्रकट की। शिवाचार्य ने कहा— आप प्रचुर सात्विक तपश्चर्या करने वाले हैं। करोड़ों लोगों के मध्य आप जैसा कोई एक व्यक्ति होता है। आप सद्गति के उपाय को समझने के अधिकारी हैं। अत: मैं उपदेश करता हूँ— देवाधिदेव महादेव ने आगमों कै अर्थ सहित उपदेश प्रदान कर हम पञ्चाचार्यों को कृतार्थ किए थे। उनके तात्पर्यार्थ को मैं सूत्र बनाकर आपको समझाता हूँ। वृष्टि इस सूत्र को सदा स्मरण रखें। इसका उद्देश्य है जीव को संसार में बार-बार आवागमन के क्लेश से छुटकारा पाने का कौन सा उपाय है, इसका परिज्ञान प्राप्त करना। सद्गुरु ने मुनि को समझाते हुए कहा यज्ञोपवीत संस्कार के अनंतर वेद-स्वाध्याय-अधिकार की प्राप्ति होती है। तदवत् सद्गुरु से दीक्षा प्राप्त करने के अनंतर वृष्टि: सूत्र को समझने की योग्यता प्राप्त होती है। धर्मपत्नी के साथ दधीचि मुनि ने अपने शिष्यों के साथ शिवाचार्य गुरु से दीक्षा ग्रहण कर वृष्टिसूत्र को प्राप्त किया। गुरु ने समझाते हुए कहा कृषि, का मूल वृष्टि है। तदवत् प्राणियों के जीवन का मूल जल है। वृष्टि मेघ से उत्पन्न होती है। वृष्टि के साथ ही विभिन्न प्राणी भूमि पर अवतरित होते हैं। जल शब्द की उपपत्ति जलति इति जलम् अर्थात् जल का नाम जीवन है। समस्त जीव का मूल निवास जल है। ये जीव जल के द्वारा ही एक जगह से दूसरे जगह आवागमन करते हैं। जल से ही अन्न का परिपाक होता है। अन्न को प्राण कहा जाता है। तथा प्राणों के साथ ही जीवगण जन्म-जन्मान्तर को प्राप्त करते हुए जीवनयापन करते हैं। किसी भी प्राणी की हिंसा नहीं करनी चाहिए। ऐसी आज्ञा वेद में दी गई है। फिर भी आहार के लिए सभी प्राणी हिंसा करते ही हैं। इस चराचर जगत में सब जगह के सबल दुर्बल की हिंसा करता है और इसीलिएयह प्रसिद्ध है। जीवो जीवस्य जीवनम्। अब हम देखते हैं कि जीव की जो उत्पत्ति होती है उसमें अन्न हेतु होते हैं अत: कोई भी आत्मकल्याण की इच्छा रखना वाला व्यक्ति अन्न को नष्ट ना करे। सभी प्राणियों के प्राण जल है अत: जल को जीवन कहा जाता है। इसीलिए कभी भी जल को व्यर्थ नहीं होने देना चाहिए। यह समझने की बात है कि अन्न के बिना लंबे समय तक प्राण धारण किया जा सकता है किंतु जल के बिना नहीं। अन्न एवं जल से प्राणियों की तृप्ति होती है जो अन्न और जल का दान करता है, वह प्राणदान के फल को प्राप्त करता है। इसीलिए अन्नदाता एवं जलदाता विविध पापों से मुक्त होते हैं। अन्न एवं जल का दान करने वाले की कामना सिद्ध होती है। दीर्घ आयु मिलता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



है एवं सत्कीर्ति प्राप्त होती है। अन्न से ही प्राणी देह में प्रवेश कर नूतन जन्म को प्राप्त करता है। प्राणी देह में मुख के माध्यम से अन्न और जल जठराग्नि में पहुँचकर परिपक्व होते हैं वे सप्त धातु के रूप में, सप्तदोष के रूप में तथा सत् उपधातु के रूप में स्थित होते हैं। उनमें दो मुख्य धातु हैं— रज और शुक्र। उन्हीं के संयोग से देह की उत्पत्ति होती है। ध्यातव्य है कि बादल से वृष्टि द्वारा अवतरित जीव के उदर में प्रविष्ट अन्न जठराग्नि के परिपाक से धातु बनताहै जिसमें अंतिम स्वरूप में शुक्र बनता है, वह माँ के गर्भ में प्रवेश कर नौ महीने निवास करता है। पुनश्च रोता हुआ बालक उत्पन्न होता है। अर्थात् अन्न से ही संतान बनकर वंश- परंपरा को अग्रेषित करता है। छान्दोग्य श्रुति में पंचाग्नि विद्या प्रकरण में विस्तार पूर्वक जन्म की गाथा एवं उसकी दुःखमयता प्रतिपादित की गयी है। यह जीव कोई अन्य नहीं शिव का ही अंश है। अविद्या से मोहित रहता है। कुछ ही वस्तुओं को बनाने और जानने मे समर्थ होता है। अनादिकाल से इसे भिन्न-भिन्न शरीर प्राप्त होते हैं। यह कभी देवयोनि में, कभी तिर्यक् योनि में और कभी मनुष्य योनि में जन्म लेता है और मरता है। विविध तापों से तप्त होता हुआ देह अनेक विध मलों का कोश है। जबकि आत्मा माया से निर्लिप्त होने के कारण विशुद्ध है फिर भी जीवात्मा अज्ञान एवं कर्म के संबंध से संसारी बनता है और अपने कर्मफल को भोगने के लिए अनेक प्रकार के योनियों में जन्म व मृत्यु से भकता रहता है। शरीर में जो बाल होते हैं किसी एक छोटे बाल को अग्रभाग निकालकर उसे फिर सौ टुकड़े में करें। अर्थात् जो आँखों से देखा ना जा सके इतना सूक्ष्म स्वरूप वाला जीव निर्मल ईश्वर का अंश है। अनादि अविद्या की ताकत जीव को संसार में अनादिकाल से केवल और केवल संतप्त करती रहती है। जीव का एक सूक्ष्म शरीर होता है, जिसे शास्त्र में लिंग शरीर भी कहा जाता है। जब तक जीव को मोक्ष ना मिले तब तक लिंग शरीर को यह छोड़ता नहीं। इसीलिए इसको सूक्ष्म शरीर कहा जाता है। जन्म-जन्मान्तर में किए गए कर्म- बीज इसी सूक्ष्म शरीर में सदा स्थित रहती है और उसकी वासना जीव को नए-नए देह से जोड़ती रहती है। अब कर्म विपाक का फल भोग है। उसको भोगने के लिए जीव के साथ स्थूल देह भी प्रकट होता है। शरीरधारी जीव ही शुभ अथवा अशुभ कर्म को करता है और शरीर में ही अपने कर्मफल का भोग भोगने को विवश रहता है। ईश्वर के द्वारा प्रदत्त शरीर दो प्रकार का होता है— व्यक्त एवं अव्यक्त। प्राणियों का अव्यक्त देह चार प्रकार का होता है। प्रकारान्तर से तिर्यक् आदिरूप से वह सात प्रकार का होता है। सामान्य रूप से जीव का स्वभाव है— काम और अर्थ दो पुरुषार्थ में राग रखकर प्रवृत होना यदि प्राणी धर्म के माध्यम से काम और अर्थ की ओर प्रवृत्त होता है तो वह सुख और स्वर्ग को प्राप्त करता है। अधर्म से उपार्जित काम और अर्थ तो प्राणी को हीन योनि में धकेलते हैं। चोरी और असत्य के मार्ग से जो काम और

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अर्थ अर्जित होते हैं वे अनर्थकारी होते हैं। वे शरीर के अर्जित पाप हैं। वह पेड़ पहाड़ बनने को विवश करतेहैं। वाणी के दोष से पशु, पक्षी के हीन योनि में विवश होकर जीव को भटकना होता है। दुर्भाव के दोष से भी जीव हीन योनि में प्रवेश करता है। सारे जीव पशुस्वरूप हैं। इनके पति, पशुपति महादेव हैं। जीव, पशु पाश से बद्ध हैं और जैसे इनका जन्म निश्चित है, वैसे मृत्यु भी। अपने पुण्य अथवा पाप को अकेले ही प्राणी जन्म और मरण के क्रम में भोगने को विवश होता है। जैसे जीवित व्यक्ति एक स्थान से दूसरे स्थान जाता है, वैसे ही मृत्यु के अनंतर जीव एक लोक से दूसरे लोक जाता है।

जिस धरती पर हम रहते हैं, यह भूलोक है। इसके ऊपर भुर्भुवः स्वः आदि सप्तलोक है तथा नीचे अधोभाग में अतल, वितल प्रवृति सात लोक हैं। इन लोकों की सृष्टि, जीवों के भोग हेतु की जाती है। अणु-जीव हृदय में निवास करता हुआ कर्म फल का पराधीन भोग करता है तथा इसी हृदय में साक्षी स्वरूप से चेता, निर्गुण, महेश्वर निवास करते हुए कर्मयंत्र का नियंत्रण तटस्थ भाव से करते हैं। काम्य कर्म का फल है एक लोक से दूसरे लोक में गमन करना जबकि निष्काम कर्म का फल है आत्मशुद्धि। तपस्या, दान इत्यादि निष्काम कर्मों द्वारा आत्मशुद्धि होती है और शुद्ध जीवात्मा में भगवान शिव की कृपा का अवतरण होता है। तत्परिणामस्वरूप जीव के अन्त:करण में शिवभक्ति प्रकट होती है। शरीर और आत्मा का सम्यक् विवेक प्राप्त होने पर वैराग्य का उदय होता है। वैराग्य उदय के बिना भगवान के करुणा को प्राप्त करने में जीव असमर्थ है। करुणाप्राप्ति से ही दीक्षा मिल सकतीहै। दीक्षा से मलमोचन होता है और उपाययोग एव अनुपाययोग से शिवसमावेश की प्राप्ति और फिर जीवन की कृतार्थता, यही क्रम है। श्री दारुक महाभाग ने श्रीमान दधीचि को इस रहस्य का उपदेश किया। पुनः मुनि की जिज्ञासा हुई— योग किसे कहते हैं? तब सद्गुरु ने बताया– हठ आदि योग से अतिविशिष्ट शिवयोग है। आणव, शाक्त एवं शाम्भव तथा अनुपाय योग से जीव सद्यः सद्गति प्राप्त करने में समर्थ होता है। इसमें मूल कारण सद्गुरु होते हैं।

भक्ति के उत्कर्ष होने पर वैराग्य जन्म लेता है और भक्ति की निष्ठा दृढ़ होने पर भक्त माहेश्वर बन जाता है। यह माहेश्वर भक्त सबको शिव की भावना करता हुआ दृढ़ निष्ठावान हो जाता है। इष्टलिंग का अर्चन करने वाला तथा शिवनिवेदित प्रसाद का सेवन करने वाला साधक प्रसादी संज्ञा से विभूषित होता है। इष्टलिंग अर्पित प्रसाद को ग्रहण करने वाला गुरु, लिंग एवं जंगम की पूजा करने वाला उनका प्रसाद ग्रहण करने वाला माहेश्वर भक्त अत्यंत प्रसन्न रहने वाला प्रसादी कहलाता है। प्राणायाम के माध्यम

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



से जहाँ प्राण का लय होता है, ऐसे हृदयस्थ प्राणलिंग को जो यथार्थ रूप से वेदन करता है, वह प्राणलिंगी कहलाता है। अब शिव की अन्यात्मिका भक्ति उदित होती है। क्षमा, विवेक इत्यादि उपचारों से प्राणलिंग की आराधना आरंभ होती है। साधक, योगी चित्स्वरूप आत्मा का अनुभव रसिक बन जाता है, आनंदात्मिका भक्ति उल्लसित होने लगती है जो सती भवानी का पातिव्रत्य स्वरूप है। किसी अन्य को देखना, जानना भी नहीं इस स्थिति में साधक अपने पति शिव को शरणापन्न होकर उनकी सेवा में ही निरंतर संलग्न रहता हुआ शरणसंज्ञा से विभूषित होता है। सभी जीवों का एकमात्र शरण्य भगवान शिव है, उनकी शरण में जो भक्त पहुँच जाता है, वही शरणस्थल कहलाता है। इसके अनंतर सामरस्य भक्ति उदित होती है। इसके उदय होते ही शिवोहम-शिवोहम की भावना उल्लसित होने लगती है। ऐसी स्थिति को शिवैक्य प्राप्ति कहा जाता है। ऐक्य अर्थात् अभेद अभेद में द्वैत अथवा भेद विलीन हो जाता है। अब पति और पशु यह द्वैत यत: विलीन है अत: भेद का विलय और अभेद का उल्लास जागृत होता है। भेद बुद्धि से यह उत्पन्न संसार है। सागर की तरह इससे पार जाना संभव नहीं। एकमात्र अद्वैत बुद्धिरूप जो जहाज है, उसी से संसाररूपी सागर को पार करना संभव है और यह अद्वैत बुद्धि होती है। जीवों के शरण भगवान शिव केसाथ अभेद का अनुभव उदित होने से बुद्धि- विवेक से शिवोऽहम की समुदित भावना सुस्थिर होकर जीवन्मुक्ति जैसे अलभ्य वस्तु को प्रदान करती है और जीवन्मुक्ति से ही जीव की एकमात्र कृतार्थता है, अन्य कोई भी उपाय नहीं।

दधीचि मुनि ने हाथ जोड़कर सब कुछ सुनते हुए गुरु कृपा से समझा कि जीव की दुर्गति किस कारण से है और सद्‌गति कैसे सम्भव है। गुरुचरणों में मुनि ने प्रणाम किया गुरुदेव ने सूत्रतात्पर्य को जगत में प्रसारित करने का उन्हें आदेश दिया। श्री दारुक सद्‌गुरु ने दधीचि से बताया आप जीवन्मुक्त हैं। एक दिन यह स्थिति आने वाली है कि योगाग्नि से आपके दग्ध देह से भवदीय अस्थि से निर्मित अस्त्र द्वारा वृत्रासुर का हनन होगा। और देवगण विजयी होंगे। ऐसा संदेश देकर योगबल से सद्‌गुरु अन्तर्धान होकर अवन्तीपुरी पहुँचे और सिद्धेश्वर शिव लिंग में समाविष्ट हो गए।

।।इति पञ्चमाऽध्याय:।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।। षष्ठाध्यायः ।।

## ।।द्वापरयुगीनमैतिह्यम्।।

## घण्टाकर्णेन व्यासाय लम्बनसूत्रोपदेशः

वीरं च नन्दिनं चैव भृङ्गिं वृषभमेव च।
स्कन्दं शिवसुतं चैव प्रणमामि मुहुर्मुहुः।।१।।

वैराग्यधर्मपीठेशं व्यासादिमुनिमानितम्।
घण्टाकर्णं गुरुं वन्दे केदारक्षेत्रवासिनम्।।२।।

कारिकाकृद् अध्यायारम्भे देवनमस्काररूपं मङ्गलमाचरति— वीरमित्यादि। देववद् गुरुमूर्तिं स्तौति-वैराग्येति।।१-२।।

आन्ध्राख्ये च महादेशे द्राक्षारामसुनामके।
क्षेत्रे संराजते भीमनाथाख्यं लिङ्गकं महत्।।३।।

वैशाखसंज्ञके मासे शुक्लपक्षे महत्तरे।
तृतीयायां तिथौ चैव मुहूर्ते ब्राह्मसंज्ञके।।४।।

शिवादेशानुसारेण घण्टाकर्णो महागुरुः।
प्रादुर्भूतो हि लोकेऽस्मिन् भीमनाथाख्यलिङ्गतः।।५।।

समुद्भूतं महालिङ्गात् तमालोक्यान्ध्रजा जनाः।
विस्मिताः प्राणिनः सर्वे बभूवुरतितेजसम्।।६।।

भस्मालङ्कृतसर्वाङ्गं रुद्राक्षैश्च विभूषितम्।
वेणुदण्डधरं चैव नीलकन्थाधिवासितम्।।७।।

वीरसिद्धान्ततत्त्वज्ञं शिवाद्वैतपरायणम्।
सर्वयोगप्रयोगज्ञं शिवयोगशिखामणिम्।।८।।

तं प्रणम्य जनाः सर्वे पप्रच्छुर्विनयान्विताः।
को भवान् कुत आयातः किमर्थं च महागुरो।।९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पृष्टो गणेश्वरो देवो जनैर्विस्मित-मानसैः।
प्रत्युवाच जनान् सर्वान् कैलासादागतोऽस्म्यहम्।।१०।।

आन्ध्रप्रदेशे द्राक्षाराम क्षेत्रे-वैशाखशुक्लतृतीयातिथौ लिङ्गात् ब्राह्ममुहूर्ते घण्टाकर्णो गुरुरुद्भूतः। भस्मरुद्राक्षादि भूषितोऽहं कैलासादागत इति विनयान्वितान् प्राह घण्टाकर्णः सद्गुरुः॥३-१०॥

घण्टाकर्णोऽस्म्यहं नाम्ना गणानां प्रमुखः खलु।
शिवादेशानुसारेण शिवलिङ्गादिहाऽभवम्।।११।।

द्वैपायने महाद्वीपे पराशरसुतेन च।
तपो हि तप्यते घोरं शिवानुग्रहकाङ्क्षया।।१२।।

तपोभिस्तत्कृतेनैव प्रसन्नो हि सदाशिवः।
तस्यैवानुग्रहार्थं च मां भुवि प्रैषयत् खलु।।१३।।

अतो मया हि गन्तव्यं शीघ्रमेव तदन्तिके।
स्वस्त्यस्तु भुवि सर्वेषां सुभिक्षोऽस्तु सदा खलु।।१४।।

घण्टाकर्णोऽभिधायेत्थं भक्तानां पुरतः स्फुरन्।
उत्थाय व्योममार्गेण प्राप द्वैपायनं वनम्।।१५।।

द्वीपे द्वैपायने तत्र सुरम्ये यमुनावृते।
उपविश्यातपे तत्र पाराशर्यो महामुनिः।।१६।।

तप्यन्नासीद् बहोः कालाद् दैवानुग्रहकाङ्क्षया।
आतपेनाग्निना दग्धःकायेन कृष्णतां जगौ।।१७।।

कृष्णकायो महातेजा द्वीपे लब्धजनिर्मुनिः।
नाम तद् दुर्लभं लेभे कृष्णद्वैपायनाभिधम्।।१८।।

कृष्णद्वैपायनं श्रीलं महर्षिं तपसि स्थितम्।
दृष्ट्वानुग्रहमूर्तिः स वियतः समवातरत्।।१९।।

महर्षिः सुतपोमूर्तिरवतीर्णं गणाधिपम्।
दृष्ट्वा प्रीतः समुत्थाय स्वागतं व्याजहार सः।।२०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कराभ्यामग्रहीत् पादौ प्रक्षाल्य विमलाम्भसा।
प्रदक्षिणाभिवादाद्यैः स्तुतिभिः समपूजयत्।।२१।।

समर्च्य विधिवच्चैनं निनाय स्वाश्रमं विभुम्।
कृताञ्जलिपुटो धीरः स्तोतुं समुपचक्रमे।।२२।।

पाराशर्यकृतेनैवं पूजनस्तवनादिना।
सम्यक् तुष्टो गणाध्यक्षो घण्टाकर्णो बभौ गुरुः।।२३।।

आज्ञया सुगुरोरेष पाराशर्यो महामुनिः।
आससादासने धन्यो बद्धाञ्जलिपुटो मुदा।।२४।।

उपविष्टं महाभागं कृष्णद्वैपायनं मुनिम्।
उवाच शान्तया वाचा घण्टाकर्णो गणेश्वरः।।२५।।

द्वैपायन तपोमूर्ते निर्विघ्नं ते तपः खलु।
सुमहत्सुकृतं पित्रोर्नैव स्युस्तेन्तरायकाः।।२६।।

पराशरो महाभागः पिता ते विश्वविश्रुतः।
येन स्मरशराः सर्वे निष्प्रभास्तपसा कृताः।।२७।।

षड्विंशो ह्यवतारोसि शिवस्य परमात्मनः।
जगत्पालकविष्णोश्च प्राप्ताः पञ्चकला अपि।।२८।।

श्रीमान् देवांशसंभूतो भवानेको महीतले।
जायमानो हि तारुण्यं त्वां विना को नु प्राप्तवान्।।२९।।

संसारे लब्धजन्मा हि बालो वा बालिकाऽपि वा।
स्वकं चामूल्यमायुष्यं क्रीडन् व्यत्यापयत्यलम्।।३०।।

भवानेको हि भूलोके ह्यायुष्यं सर्वमेव हि।
तपसे योजयेद् भूयः परेषां हितकृद् महान्।।३१।।

तपो हि मूलं सर्वासां सिद्धीनां सुजना जगुः।
मनोरथस्य सिद्ध्यर्थं सर्वैस्तप्येत सत्तपः।।३२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



त्वादृशी तपसो भक्तिर्दुर्लभा जगतीतले।
आजन्मतस्ततो लग्नस्तपःकर्मणि सन्भवान्।।३३।।

त्वदीयतपसा तुष्टस् तपोमूर्तिः शिवः स्वयम्।
अनुग्रहाय भूलोके प्रैषयद् मां तवान्तिकम्।।३४।।

पराशरसुतेन द्वैपायने महाद्वीपे शिवानुग्रहावाप्त्यै तपस्तप्यते तदनुग्रहार्थं शिवेन प्रेषितोऽहं तदन्तिकं गच्छामीति व्योममार्गेण द्वैपायनं वनमभिप्रपेदे। तप्यन् पाराशर्यः कृष्णकायः वियतोऽवतरन्तं पादौ प्रक्षाल्य प्रदक्षिणस्तुतिभिः समर्च्य गुरुचरणयोरुपाविशत्। पराशरपुत्रस्त्वं शिवस्य षड्विंशः अवतारो भासि प्राप्तविष्णुपञ्चकलः। त्वत्तपसः सन्तुष्टो महादेवः त्वामनुग्रहीतुं मां प्रेषितवानस्ति।।११-३४।।

घण्टाकर्णोऽस्म्यहं नाम्ना गणानां च गणाधिपः।
पाठितोऽहं शिवेनैव वेदागमपरायणः।।३५।।

द्राक्षारामे महाक्षेत्रे चान्द्रदेशे महत्तरे किल।
भीमनाथान्महालिङ्गादुत्पन्नस्त्वामुपागतः ।।३६।।

उग्रं तपः किमर्थं त्वं तप्यसेऽनुत्तमं महत्।
द्वैपायन महाभाग कथयस्व विदांवर।।३७।।

गणेश्वरवचःश्रुत्वा कृष्णद्वैपायनो मुनिः।
सहर्षं शान्तया वाचा भाषयन्निदमब्रवीत्।।३८।।

अद्य मे सफलं जन्म तपांसि फलितानि मे।
कैलासादागतो यन्मामनुगृह्णाति सन्भवान्।।३९।।

फलेषु नास्ति मे सक्तिर्लोके लोकान्तरेऽपिवा।
केवलं स्वं शिवं ज्ञातुं तपस्तप्यामि निष्ठया।।४०।।

ततो ब्रूहि महाभाग देवदेवस्य लक्षणम्।
प्राप्त्युपायं तदीयं च करुणाकर! भक्तिभूः।।४१।।

जिज्ञासां तां समाकर्ण्य लोककल्याणकारिणीम्।
उवाच शान्तया वाचा घण्टाकर्णो महागुरुः।।४२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शमादिषड्गुणोपेतं विरक्तं च विवेकिनम्।
दृष्ट्वा मोमुद्यते चेतो मुक्त्यर्थं तपसि स्थितम्।।४३।।

अधिकारी भवानेकः शिवं ज्ञातुं तपोधन।
शिवादिष्टस्ततोऽहं त्वामागतो भवदन्तिकम्।।४४।।

विना किन्तु गुरोर्दीक्षां कःशिवं ज्ञातुमर्हति।
दीक्षां वै मोक्षसौधस्य महाद्वारं विदुर्बुधाः।।४५।।

माहात्म्यं शिवदीक्षाया ज्ञात्वा द्वैपायनो मुनिः।
श्रीगुरुं प्रार्थयामास दीक्षां सद्भिः समीडिताम्।।४६।।

उत्कण्ठां च मुनेर्दृष्ट्वा घण्टाकर्णो महागुरुः।
पञ्चब्रह्ममयांस्तत्र संस्थाप्य कलशान् खलु।।४७।।

यथाविधिमनुसृत्य शुद्धैश्च कलशोदकैः।
अभिषिच्य च लिङ्गाङ्गौ परिशोध्य ह्युभावपि।।४८।।

मन्त्रन्यासविधिं चैव रहसि संप्रबोध्य च।
कर्णे च दक्षिणे तस्य महामन्त्रमुपादिशत्।।४९।।

एवं दीक्षाविधानेन संशोध्य मुनिपुङ्गवम्।
जिज्ञासाशान्तये तस्य बोधयन्निदमब्रवीत्।।५०।।

कैलासशिखरे रम्ये ह्येकदा हि सदाशिवः।
गणान् सर्वान् समुद्दिश्य चागमार्थं सुविस्तरम्।।५१।।

बोधयामास तत्रास्ति सूत्रमेकं महत्तरम्।
लम्बनं नाम तत्प्रोक्तमीश्वरप्रतिपादकम्।।५२।।

अस्मिन्नेव महासूत्रे शिवस्य परमात्मनः।
स्वरूपं बीजरूपेण शिवेन प्रतिपादितम्।।५३।।

विस्तरो तस्य सूत्रस्य त्वदर्थं क्रियते मया।
ज्ञात्वा त्वमपि तत्सूत्रं विस्तारय पुनःपुनः।।५४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**लम्बते तत्त्वरूपेण षट्त्रिंशत्संख्यया च यत्।**
**अतो हि तत्परब्रह्म लम्बनं हि प्रचक्षते।।५५।।**

**दैर्घ्यं लम्ब इति प्रोक्तं दीर्घो देवः सदाशिवः।**
**तस्मादपि महादीर्घः कोपि नास्ति जगत्त्रये।।५६।।**

**तदीयं दैर्घ्यरूपं च ह्यत्यतिष्ठद्दशाङ्गुलम्।**
**श्रुतौ विस्तरतः प्रोक्तं ज्ञायतां भो महामुने।।५७।।**

**लम्बतेऽस्मिन् सदा विश्वं विश्वासेन चराचरम्।**
**विश्वाधारं हि यत्प्रोक्तं लम्बनं तत्प्रचक्षते।।५८।।**

निष्कामतपः प्रवणोऽहं स्वं शिवं ज्ञातुं यते ततो मां देवदेवस्वरूपं प्रतिपाद्य तत्प्राप्त्युपायं वदेति घण्टाकर्णं गुरुं प्रार्थयामास व्यासो मुनिः। गुरुः शमादिषट्कसम्पत्तिमन्तं तमाह दीक्षां विना न शिवज्ञानं तद्विना न मोक्षावाप्तिः। अथ विज्ञातशिवदीक्षामाहात्म्यः दीक्षां प्रार्थितवान् गुरुं शिष्यः। श्रीगुरुः पञ्चब्रह्ममयान् कलशान् संस्थाप्य शुद्धैः कलशोदकैः अभिषिच्य लिङ्गाङ्गौ परिशोध्य मन्त्रन्यासविधिं प्रबोध्य दक्षिणकर्णे महामन्त्रमुपदिश्य दीक्षाविधानेन संशोध्य प्राबोधयत्। शिवप्रतिबोधितम् आगमार्थं ज्ञातुं शिवं च तत्प्रतिपाद्यम् अभिज्ञातुं सूत्रमेकं गृहाण— **लम्बनमिति**। लम्बते तत्त्वरूपेण षट्त्रिंशत्-संख्यया तत् परमशिवरूपं ब्रह्म लम्बनमिति प्रोच्यते। दैर्घ्यं लम्बः, दीर्घे शिवे दशाङ्गुलम् अत्यतिष्ठ दितिश्रुतौ प्रतिपादितम्। अस्मिन् शिवे चराचरं जगद् यद् लम्बते ततोऽसौ लम्बनमित्याख्यायते।।३५-५८।।

**लम्बनं हि परं तत्त्वं विश्वोत्तीर्णं यदुच्यते।**
**विश्वरूपं तदेवास्ति विश्वाधारं तदेव च।।५९।।**

**लम्बनेन च शब्देन बोध्यमानः परः शिवः।**
**निर्गुणो यो निराकारःसाकारःसगुणः स हि।।६०।।**

**शक्त्या युक्तो यदा शम्भुर्जगल्लीलां प्रवर्तयेत्।**
**तदा स सगुणो भूत्वा नानामूर्तिधरःप्रभुः।।६१।।**

**शिवरुद्रमहादेव - भवादिपदसंज्ञितः।**
**अनुगृह्णाति सद्भक्तान् विग्रहान् धारयन् बहु।।६२।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वेच्छयाशक्तिसंकोचाच् शिवस्य परमात्मनः।
जगल्लीलाप्रवृत्तस्य निर्गुणस्य गुणात्मता।।६३।।

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
शिवशक्त्योस्तु सम्बन्धोऽविनाभाव इतीरितः।।६४।।

वागर्थौ हि यथा युक्तौ ह्यविनाभावतः स्थितौ।
शिवशक्ती तथैव स्तो ह्यवियुक्ते निरन्तरम्।।६५।।

लम्बनं नाम विश्वोत्तीर्णं तत्त्वं तदेव च विश्वरूपं विश्वाधारभूतं विभिन्न-व्युत्पत्तिसमन्वितम्। लम्बनशब्दशब्दितः निर्गुणः निराकारश्च सगुणः साकारोपि सन् शिवो महादेवः स्वशक्त्या जगल्लीलां नाट्यन् नानामूर्तिधरो भक्तान् अनुगृह्णाति। शिवशक्त्योरविनाभावः सम्बन्ध इष्यते॥५९-६५॥

सृष्टिकाले त्वसौ शक्तिरीश्वरेच्छाबलाद्धृता।
महामायास्वरूपं च धत्ते पञ्चाङ्गसंयुता।।६६।।

परा च ह्यादिशक्तिश्च इच्छाज्ञानक्रियेति च।
पञ्च ह्यङ्गानि कथ्यन्ते मायाशक्तेर्हि तापस।।६७।।

एतासां सर्वशक्तीनां चिच्छक्तिर्मूलकारणम्।
सच्चिदानन्दरूपा सा बोधरूपा प्रकीर्तिता।।६८।।

अदृष्टात् प्राणिनामेव यदा शम्भुःसिसृक्षति।
तदा तदीया सा शक्तिः पञ्चधा प्रविभज्यते।।६९।।

सहस्रांशेन चिच्छक्तेः पराशक्तिः प्रजायते।
तस्या एव सहस्रांशादादिशक्तिः प्रजायते।।७०।।

आदिशक्तिसहस्रांशाद् इच्छाशक्तिसमुद्भवः।
इच्छाशक्तिसहस्रांशाद् ज्ञानशक्तिसमुद्भवः।।७१।।

ज्ञानशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः।
एवं रूपेण शक्तीनां विकासो ह्यागमेषु च।।७२।।

विस्तरेण शिवेनैव कथितो हि महामुने।
एषा पञ्चाङ्गसंयुक्ता चिच्छक्तिर्या परा मता।।७३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



महामायेति सा प्रोक्ता सत्त्वादिगुणसंयुता।
शुद्धसत्त्वगुणोपेता या माया परमा मता।।७४।।

तया चोपाधिना युक्त ईश्वरः परिकीर्तितः।
सर्वज्ञःसर्वशक्तश्च नित्यमुक्तो महेश्वरः।।७५।।

सम्मिश्रोपाधयो जीवा भोक्तारः पशवः स्मृताः।
भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम्।।७६।।

एकं तल्लम्बनं तत्त्वं ह्युपाधिप्रविभेदतः।
विभज्यते त्रिधा चैव भोक्तृ-भोग्यादिरूपतः।।७७।।

सृज्यानां प्राणिनामेव ह्यदृष्टं सृष्टिकारणम्।
तस्य तु जडरूपत्वात् प्रेरकोऽत्र ह्यपेक्ष्यते।।७८।।

प्रेरको हीश्वरः प्रोक्तो कर्मणां च नियन्त्रकः।
स एव सृजते विश्वं शास्त्रयोनिः स एव हि।।७९।।

सदा स्वलीलया एकः कुर्वन् कृत्यानि पञ्चकम्।
वैषम्यरहितो मुक्तो नैर्घृण्यरहितः शिवः।।८०।।

निपुणो हि नटो लोके नानारूपधरो भवन्।
यथा नटति हृष्टात्मा तद्वदीश्वरनर्तनम्।।८१।।

अल्पायासेन साध्यत्वात् कर्तुरुद्देश्यवर्जनात्।
लीलेति चोच्यते सृष्टिः पञ्चकृत्यात्मिका कृतिः।।८२।।

लीलाभिनयपात्रत्वाद् संसारेऽस्मिन् भ्रमन्ति हि।
स्वकर्मवशतो जीवा निजकर्मानुसारतः।।८३।।

चक्रस्थनेमिवत् सर्वे भ्रमन्त्येते शरीरिणः।
समेषामत्र जीवानां प्रेरकस्तु महेश्वरः।।८४।।

स एव हृदि संस्थित्य सर्वसंसारिणः खलु।
हितमार्गं सदा कालमुपादिशन्नस्ति वै किल।।८५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अन्तर्वाणीं शिवेनोक्तां श्रुत्वा सद्भक्तिमार्गतः।
शुद्धां बुद्धिं समासाद्य सद्गतिं प्राप्नुयाद् नरः।।८६।।

ज्ञानादेव तु कैवल्यम् श्रुतिराह सनातनी।
अथापि ज्ञानदार्ढ्यार्थं शिवभक्तिं समाचरेत्।।८७।।

अनन्यकृतया भक्त्या शिवस्य परमात्मनः।
प्रसादो जायते जन्तौ स एव मुक्तिसाधनम्।।८८।।

शम्भोःप्रसादमासाद्य ह्यज्ञानच्छेदकारिणम्।
मोहग्रन्थिं विनिर्भिद्य कैवल्यं परमश्नुते।।८९।।

सूर्योदयं विना लोके न यथा तमसो लयः।
तथा विना प्रसादं हि संसारो न निवर्तते।।९०।।

अतः प्रसादसिद्ध्यर्थं ज्ञानिनापि महात्मना।
शिवभक्तिर्न सन्त्याज्या भक्तिर्मुक्तेर्हि साधनम्।।९१।।

एवं गुरुमुखोद्गीर्णं सूत्रं तल्लम्बनं खलु।
श्रुत्वा मत्वा महाभक्त्या ह्युवाच गुरुसन्निधौ।।९२।।

लम्बनस्य च सूत्रस्य श्रुत्वा वै विस्तरं किल।
ज्ञात्वा शिवस्वरूपं च कृतार्थोस्मि महागुरो।।९३।।

अद्य मे सफलं जन्म नष्टो मे चित्तविभ्रमः।
स्वात्मरूपं शिवं ज्ञात्वा शिवोऽहमभवं खलु।।९४।।

सृष्टिकाले शक्तिः ईश्वरेच्छया महामायास्वरूपा भवन्ती पञ्चाङ्ग-संविभक्ता भाति। तद्यथा— पराशक्तिः, आदिशक्तिः, इच्छाशक्तिः, ज्ञानशक्तिः क्रियाशक्तिश्चेति। सर्वासामासां शक्तीनां मूलकारणं चिच्छक्तिः सच्चिदानन्द-रूपिणी भवति। शम्भौ सिसृक्षायां सत्यां चिच्छक्तेः सहस्रांशात् परा-शक्तेरुदयः तस्याः सहस्रांशाद् आदिशक्तिः तस्याः इच्छाशक्तिः, तस्याः ज्ञानशक्तिः, तस्याश्च क्रियाशक्तिरुदेति। पञ्चाङ्गसंयुक्ता परा शक्तिः सत्त्वादिगुणोपेता महामाया प्रोच्यते। शुद्धसत्त्वप्रधानां मायां शक्तिम् उपाधिं स्वीकृत्य ईश्वरः सर्वज्ञः सर्वकर्ता महेश्वरो नित्यमुक्तो भवति। सम्मिश्रोपाधयः जीवाः पशवो भोक्तारः अथ शुद्धतामसम् अव्यक्तम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भोग्यमित्यभिधीयते। एकमेव चेल्लम्बनं नाम परमं तत्त्वं तदेव उपाधिभेदाद् भोक्तादिरूपेण त्रिधा विभज्यते। अदृष्टमेव जडं सृष्टिकारणम्, तस्य प्रेरक ईश्वरः कर्मेनियन्ता शास्त्रयोनिः विश्वं सृजति। वैषम्यनैर्घृण्यरहित एककोपि शिवः पञ्चकृत्यपरायणः नानारूपधरो हृष्टः सृजति विश्वम्। पञ्चकृत्यात्मा कृतिः अनायाससाध्या उद्देश्यवर्जा च लीलेति लीलासृष्टिरिति वा प्रोच्यते। लीलाभिनयपात्रभूता जीवाः निजकर्मयन्त्रिताः संसारे भ्रमन्ति। चक्रनेमिवद् भ्राम्यन्तः जीवाः महेश्वरेण प्रेर्यन्ते। हृदिस्थः परमेश्वरः स्वराट् सदाहितमुपदिशति जीवम्। यस्तु शिवप्रोक्तामन्तर्वाणीं श्रावं श्रावं सद्भक्तिमार्गमवलम्बते स भक्तः सद्गतिमाप्नोति। यद्यपि ज्ञानादेव कैवल्यमिति सिद्धान्तस्तथापि ज्ञानदार्ढ्याय भक्तिरावश्यकी। भक्त्या त्वनन्यया शिवप्रसादः मुक्तिसाधनं लभ्यते। शम्भुप्रसादाद् अज्ञानसमुच्छेदः ततः मोहग्रन्थिभेदनं ततः परमं कैवल्यमश्नुते साधकः। शम्भोः प्रसादावाप्तये ज्ञानिनापि शिवभक्तिर्विधेया। तदेवं लम्बनमिति सूत्रं गुरोर्मुखाद् व्याख्यातं सविस्तरं श्रुत्वा मत्वा निदिध्यासनपरायणः शिवस्वरूपमभिज्ञाय शिवैक्यमागतः गुरुचरणयोः प्रणतः रराजे भगवान् व्यासः॥६६-९४॥

**त्वत्कृपादृष्टिपातेन प्रबोधध्वस्तजन्मनः।**
**मत्समो पुण्यवान् लोके नान्यः कोऽपीह दृश्यते॥९५॥**

**इतः परं च भो स्वामिन् लोककल्याणहेतवे।**
**भगवन् ब्रूहि कर्तव्यं त्वदाज्ञां पालयाम्यहम्॥९६॥**

**पाराशर्यवचः श्रुत्वा घण्टाकर्णो महागुरुः।**
**द्वैपायनं समुद्दिश्य वेत्ता प्राह समाहितः॥९७॥**

**दुर्लभं मानुषं प्राप्य जननं ज्ञानसाधनम्।**
**ये न जानन्ति देवेशं तेषां जन्म निरर्थकम्॥९८॥**

**सार्थकं भवतो जातं जन्म चैव महामुने।**
**शिवतत्त्वं विजानासि जन्मरोगनिवर्तकम्॥९९॥**

**षड्विंशो ह्यवतारोसि शिवस्य परमात्मनः**
**अग्रे व्यस्यन् समान् वेदान् व्याससंज्ञामवाप्स्यसि॥१००॥**

**विस्तीर्यते त्वया ज्ञानं वेदानां च विभागतः।**
**अतो व्यासेति नाम्ना वै विख्यातस्त्वं भविष्यति॥१०१॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वेदान्विभज्य सर्वान्हि सूत्राणि विरचय्य च।
ब्रह्मतत्त्वं हि सर्वेभ्यो प्रबोधय महामुने।।१०२।।

एक एव शिवः साक्षात् चिदानन्दमयो विभुः।
त्रयस्त्रिंशत्प्रकारेण लीलाकृत् प्रविराजते।।१०३।।

तस्य तासां च लीलानां पुराणानि विलिख्य च।
भक्तानां भक्तिसिद्ध्यर्थं व्यासयिष्यसि हे मुने।।१०४।।

गुरोरादेशमाकर्ण्य सन्तुष्टो हि महामुनिः।
तथेति प्रतिशुश्राव प्राञ्जलिर्विनयान्वितः।।१०५।।

ऋषेः कर्तव्यमादिश्य घण्टाकर्णो महागुरुः।
व्युत्थाय व्योममार्गेण हिमाद्रिमाजगाम ह।।१०६।।

कृतार्थो व्यासः लोककल्याणहेतवे कर्तव्यं ज्ञातुमाज्ञां ययाचे। गुरुः प्राह—शिवस्य षड्विंश अवतारो भवान् वेदान् व्यस्यन् ज्ञानं विस्तारयन् ब्रह्मतत्त्वप्रबोधको व्यासो महादेवलीलाप्रबोधनानि पुराणानि विलिख्य व्यासिचिष्यसीत्युक्त्वा योग-महिम्ना व्योममार्गेण हिमाद्रिमुपागतः।।९५-१०६।।

तत्र वैराग्यपीठेऽसौ ह्यधिरुह्य गणेश्वरः।
बहुकालमुषित्वा च लोकान् धर्मं समादिशत्।।१०७।।

शिवादेशानुसारेण द्वापरान्ते महागुरुः।
द्राक्षारामं समागत्य प्रार्थयामास शङ्करम्।।१०८।।

देवदेव महादेव शरणागतरक्षक।
पालयित्वा तवादेशं पुनः शरणमागतः।।१०९।।

अतः परं हि भूलोके न माया तियतेऽधुना।
अन्तरं देहि मे किञ्चिदनुकम्पाविशेषतः।।११०।।

तदा भीमेश्वराल्लिङ्गाद्देहि वत्सेति शङ्करः।
घण्टाकर्णं समाहूय चकार लीनमात्मनि।।१११।।

घण्टाकर्णे महालिङ्गे लीने तस्मिन् प्रकाशके।
विस्मिताः प्राणिनोऽभूवन् दृष्ट्वा दृश्यं महत्तरम्।।११२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**घण्टाकर्णो महायोगी सूत्रेण लम्बनेन च।**
**बोधयित्वा जनान् सर्वान् शिवाद्वैतमुपागमत्।।११३।।**

तत्र च वैराग्यपीठमधिश्रितो गुरुः लोकान् धर्ममुपदिश्य द्राक्षाराममुपाश्रित्य शंकरम् सम्प्रार्थ्य भीमेश्वरलिङ्गं समाविष्टः। स एव महायोगी श्रीघण्टाकर्णः लम्बनसूत्र-कृद् शिवधर्मप्रबोधकः शिवाद्वैतमुपागतः शिवाद्वैतं शिष्यानगमयत्।।१०७-११३।।

## हिन्दी तात्पर्य

## द्वापर युग का इतिहास

घण्टाकर्ण शिवाचार्य द्वारा महर्षि व्यास को लंबन सूत्र का उपदेश किया गया। अध्याय के आरंभ में कारिकाकार महादेव और गुरु की स्तुति करने के पश्चात् प्रतिपाद्य विषय का वर्णन मंजुल शैली में करते हैं। आंध्र प्रदेश में द्राक्षानाम क्षेत्र में वैशाख शुक्ल तिथि के ब्राह्ममुहूर्त में शिवलिंग से घण्टाकर्ण शिवाचार्य प्रकट हुए। वहाँ उपस्थित लोगों को अपना परिचय देते हुए उन्होंने कहा पराशर सूत्र द्वैपायन व्यास शिवानुग्रह की प्राप्ति हेतु तपश्चर्या कर रहे हैं। उनके ऊपर अनुग्रह करने हेतु मैं प्रस्थान कर रहा हूँ। ऐसा कहकर उन्होंने व्योममार्ग से शीघ्र द्वैपायन वन को प्राप्त किया। निरंतर कठिन तपश्चर्यारत कृष्णकाय व्यासमुनि आकाश मार्ग से अवतरित होते हुए घंटाकर्ण सद्गुरु पादप्रक्षालन एवं स्तुति विधि से अर्चन कर उनके चरणों में बैठकर निवेदन किया। मैं निष्काम भाव से तपस्या में संलग्न हूँ और प्रयत्न करता हूँ स्वात्ममहेश्वर को आत्मरूप से ज्ञान करने हेतु शमदमादि-षड्विध साधन से युक्त व्यास को सद्गुरु ने बताया दीक्षा के बिना शिवज्ञान नहीं और शिवज्ञान के बिना मोक्ष प्राप्ति नहीं हो सकती। शिव की दीक्षा के महिमा को जानकर व्यास ने दीक्षा की प्रार्थना की सद्गुरु ने पाँच बाह्ममय कलशों की स्थापना कर कलशोदक से अभिसिंचित कर लिंग एवं अंग कापरिशोधन करते हुए मंत्रन्यास पुरःसर दक्षिण कर्ण में महामंत्र का उपदेश देकर दीक्षा विधि से उनका शोधन कर जागृत किया। शिव प्रतिबोधित आगमार्थ को जानने एवं शिव को यथावत समझने के लिए गुरु ने लंबनम् सूत्र का उपदेश किया। इसका अर्थ है जो छत्तीस तत्वों के रूप से लंबायमान होकर सुविस्तृत विश्व रूप में प्रतिष्ठित होता है, वह परमशिव ब्रह्म लंबन कहलाता है। दीर्घ भाव को लंब कहा जाता है। शिव में ही चराचर जगत लंबित अवलंबित एवं विस्तारभाव को प्राप्त होता है। दशांगुल जगत दीर्घ शिव में लंबित है। अत;

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



दैर्ध्ययुक्त शिव को लंबन कहा जाता है। लंबन स्वमहिमा से विश्वोत्तीर्ण रूप में स्थित रहकर भी विश्वरूप में प्रकट होते हुए विश्वाधार है। लंबन शब्द से प्रतिबोध्य निर्गुण निराकार शिव सगुण साकार बनते हुए महादेव निजशक्ति के महिमा से जागतिक लीला का अभिनय करते हुए नाना मूर्ति को धारण करते हुए भक्तों को अनुगृहीत करते हैं। शिव की शक्ति शिवा कभी भी शिव से पृथक नहीं रहती।

सृष्टि के उद्देश्य से, ईश्वर की इच्छा से शक्ति महामाया बन जाती है और पाँच रूपों में मुख्य रूप से प्रकट होती है— (१) पराशक्ति (२) आदिशक्ति (३) इच्छाशक्ति (४) ज्ञान शक्ति (५) क्रिया शक्ति। इन पंचविध शक्तियों का मूल कारण चिति शक्ति है। जब भगवान शिव, सृष्टि की इच्छा करते हैं तब चिति शक्ति के सहस्रांश से पराशक्ति प्रकट होती है। उसके सौवें भाग से आदिशक्ति, उसके भी सौवें भाग से इच्छाशक्ति तदवत् उससे ज्ञानशक्ति और फिर उससे क्रियाशक्ति उदित होती है। यह शक्ति-समष्टि तत्वादि गुणों से महामाया कहलाती है। शुद्ध सत्व प्रधान माया शक्ति की उपाधि से ईश्वर प्रकट होते हैं। वह सर्वज्ञ है, सर्वकर्ता है, महेश्वर है और नित्यमुक्त है। मिश्रित उपाधि से जीव और कर्मफलभोक्ता के रूप में प्रकट होता है और जो शुद्ध तामस रूप से व्यक्त है वो भोग्य के रूप में प्रकट होता है। लंबनसंज्ञक एक ही परमतत्व उपाधिभेद से प्रेरक, भोक्ता एवं भोग्य इन तीन रूपों में प्रकट होते हैं। अदृष्ट जड़ सृष्टि का कारण है। उसके प्रेरक ईश्वर कर्म के नियंता एवं शास्त्र को प्रकट करने वाले विश्व की सृष्टि करते हैं। यद्यपि शिव में वैषम्य और नैर्घृण्य नहीं है। वह एक है किन्तु पंचकृत्य में निरन्तर हर्ष के साथ नानारूप को धारण करते हुए वह विश्व की सृष्टि करते हैं जो उनकी पञ्चकृत्य स्वरूप रचना है, उसमें उन्हें आयास नहीं करना पड़ता और न ही कोई उसका खास उद्देश्य होता है इसलिए उनकी कृति लीला या लीलासृष्टि नाम से कही जाती है। उनकी लीला के अभिनय में पात्र बनने वाले जीव निजकर्म से यंत्रित होकर संसार में भटकते हैं। जैसे चक्र की डैनी निरंतर भ्रमणशील रहती है, वैसे ही जीव हृदय में स्थित परमेश्वर से प्रेरित होकर संसार में भटकते हैं किन्तु हृदय में साथ विद्यमान परमेश्वर बिना खाये पिये स्वराट् है और जीव को हित का उपदेश करता रहता है शिव की अन्तर्वाणी को श्रद्धा से सुनता है, वह जीव सद्भक्ति मार्ग में प्रवेश पाकर सद्गति को प्राप्त कर लेता है। शास्त्रों का सिद्धान्त है, ज्ञान से ही मोक्ष प्राप्त होता है फिर भी ज्ञान की दृढ़ता के लिए भक्ति परम आवश्यक है। अनन्य भक्ति से ही शिवप्रसाद उदित होता है जिससे मुक्ति का मार्ग प्रशस्त होता है। साधक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



के अन्तर्हृदय में शम्भुप्रसाद का उदय, अज्ञान का उच्छेद, मोहग्रंथि का भेदन, तदनंतर कैवल्य की प्राप्ति साधक को कृतार्थ कर देती है किंतु शंभु का प्रसाद पाने हेतु ज्ञानी को भी शिवभक्ति करनी ही चाहिए। भगवान व्यास गुरुमुख से लंबन सूत्र का विस्तृत व्याख्या को श्रद्धा से सुनकर मनन और निदिध्यासन करके शिवस्वरूप की प्रत्यभिज्ञा को प्राप्त कर शिवाभेद से समुल्लसित होकर गुरु के चरणों में प्रणिपात किया और भगवान व्यास देदीप्यवान हो उठे।

कृतार्थ व्यास मुनि को श्रीगुरु ने कहा— आप भगवान शिव के २६तम अवतार स्वरूप हैं। आप वेदों को अनेक भागों में विभाजित कर ज्ञानविस्तार से ब्रह्मतत्व का प्रबोधन करने वाले एवं भगवान महादेव देवाधिदेव की लीलाओं का प्रबोधन हेतु पुराणों के निर्माण से उनकी व्याख्या करने वाले हैं। ऐसा कहकर महायोगी घंटाकर्ण सद्गुरु व्योममार्ग से हिमाचल को प्रस्थान किए। वहाँ वैराग्य तीर्थ में विराजकर सर्वलोक को धर्म का उपदेश कर द्राराम में भगवान शिव की प्रार्थना कर भीमेश्वर लिङ्ग में समाविष्ट हो गए। महायोगी श्री घंटाकर्ण सद्गुरु लंबन सूत्र के रचयिता हैं, वह स्वयं शिवधर्म का प्रबोधन करते हुए पात्र शिष्यों में शिवाद्वैत की स्थापना करते हुए शिवसायुज्य को प्राप्त हो गए।

।।इति षष्ठाध्यायः।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ सप्तमाध्यायः॥

## ।।द्वापरयुगीनमैतिह्यम्।।

# धेनुकर्णभगवत्पादेन सानन्दमहर्षये मुक्तागुच्छ-सूत्रोपदेशः

**सूर्यसिंहासनाधीशं सानन्दप्रविबोधकम्।**
**धेनुकर्णं गुरुं वन्दे मुक्तागुच्छप्रवर्तकम्।।१।।**

षष्ठाध्यायारम्भे कारिकाकृन्महास्वामी दिव्यगुरुनमस्कारात्ममङ्गलमातन्वानो ग्रन्थे निवेशयन्नाह— **सूर्यसिंहासनाधीशमिति।**

श्रीशिवाज्ञया धेनुकर्णः सद्गुरुः कैलासाद्भूमिमागतः सूर्यसिंहासनपीठाधीशो भवन् प्राधान्येन ऋषिं सानन्दं प्रबोधयति स्म। पञ्चसूत्रमध्ये मुक्तागुच्छम् इति चतुर्थं सूत्रमसौ प्रावर्तयत्।।१।।

**श्रीशैलाख्ये महाक्षेत्रे धेनुकर्णःशिवाज्ञया।**
**प्रादुर्बभूव लिङ्गाद्वै मल्लिकार्जुननामकात्।।२।।**

**माघकृष्णचतुर्दश्यां शिवरात्रौ महानिशि।**
**लिङ्गोद्भवस्य वेलायां लिङ्गात्प्रादुर्बभूव ह।।३।।**

**उत्तमाङ्गेष्टलिङ्गञ्च कपाले भस्मपुण्ड्रकम्।**
**धृतसर्वाङ्गरुद्राक्षं न्यग्रोधदण्डधारिणम्।।४।।**

**शुभ्रवस्त्रधरं चैव लौहं चैव कमण्डलुम्।**
**एवं सल्लक्षणोपेतं महाचार्यं गणाधिपम्।।५।।**

**प्रादुर्भूतं तमालोक्य विस्मिताः सकला जनाः।**
**को भवान् को भवानेवं पप्रच्छुरेककण्ठतः।।६।।**

**आश्चर्यचकितानेतान् दृष्ट्वा विश्वगुरुस्तदा।**
**धेनुकर्णो महाचार्यो ह्यब्रवीदभयं ददत्।।७।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



धेनुकर्णः श्रुतो नाम्ना गणपः पञ्चसु स्मृतः।
शिवादेशानुसारेण शिवलिङ्गादिहाऽभवम्।।८।।

वीरशैवमहातन्त्रमेकोत्तरशतस्थलम् ।
स्थाप्यं मयेह भूलोके तदर्थं चागतोस्म्यहम्।।९।।

सानन्दो नाम योगीन्द्रः पृथिव्यां यस्तपेत् तपः।
तमेव ह्युपदेष्टुं वै शिवादेशादिहाऽभवम्।।१०।।

भुवि विश्रुतं श्रीशैलं नाम महाक्षेत्रम्। तत्रश्रीमल्लिकार्जुनं नाम ज्योतिर्लिङ्गम्। तस्माद् आविर्बभूव श्रीमान् धेनुकर्णो गणेश्वरः। या किल ज्योतिर्लिङ्गोद्भववेला तस्यामेव माघकृष्णचतुर्दश्यां शिवरात्रौ महानिशि प्रादुरभूद् अत्र भवान् धेनुकर्णः।

इष्टलिङ्गं भस्मत्रिपुण्ड्रं रुद्राक्षं शुभ्रवस्त्रं च धारयन्तं विलोक्यमेनं को भवानिति परिप्रश्ने सानन्दयोगीन्द्रमुपदेष्टुं वीरशैवतन्त्रमेकोत्तरशतस्थलं संस्थापयितुं शिवादेशादिहागतोऽहं सानन्दं योगीन्द्रमुपदेक्ष्यामि-इति समाहितं श्री धेनुकर्णेन।।२-१०।।

क्षेत्रे चात्रैव मे पीठं कृते संस्थापितं किल।
सूर्यसिंहासनं ख्यातं सर्वोत्कृष्टं सुराजते।।११।।

द्वापरान्तमहं तत्र लोककल्याणहेतवे।
निवसिष्यामि बोधार्थं शिवतन्त्रं यथोदितम्।।१२।।

आगच्छन्तु भवन्तोऽपि यथेच्छं सूर्यपीठकम्।
बोध्यते हि महातन्त्रं शिवेनोक्तं शिवङ्करम्।।१३।।

इत्युक्त्वा पश्यतां तेषां विषयस्थिरचक्षुषाम्।
उत्थाय व्योममार्गेण ऋषिं सानन्दमाययौ।।१४।।

आकाशादागतं दृष्ट्वा धेनुकर्णं महागुरुम्।
सहसोत्थाय सानन्दः स्वागतं व्याजहार ह।।१५।।

पादौ प्रक्षालयामास पाद्येन विमलाम्भसा।
ततो विनीतभावेन प्रार्थितो हि महामुनिः।।१६।।

मम भाग्यवशादेव भवानत्र समागतः।
अद्य मे सफलं जन्म प्राप्तं मे तपसः फलम्।।१७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



बहोः कालात् किलैको हि प्रश्नो मे बाधते दृढम्।
निःसार्य मम सन्देहं समुद्धर जगद्गुरो।।१८।।

दृश्यं चैव जगत्सर्वं नानारूपसमन्वितम्।
केनेदं जायते चैवं केन वा प्रविलाप्यते।।१९।।

ऋषयो बहवो ह्यत्र विवदन्ते परस्परम्।
सदसत्कार्यरूपेण निश्चित्य वद मे प्रभो।।२०।।

वादे सत्कार्यवादे च भेदौ द्वौ परिकीर्तितौ।
प्रथमः परिणामोऽत्र विवर्तश्च द्वितीयकः।।२१।।

श्रुत्वा श्रुत्वा च वादान्हि संशयग्रस्तमानसः।
निर्णेतुमसमर्थोऽस्मि ब्रूहि मे निश्चितं वचः।।२२।।

मनसा विह्वलेनैव सानन्देन महर्षिणा।
निवेदितं समाकर्ण्य धेनुकर्णो महागुरुः।।२३।।

क्षणं ध्यात्वा महादेवं समाहितमनास्तदा।
इदमाह मुनीन्द्रं तं शिवादिष्टं हि सूत्रकम्।।२४।।

सर्गादौ देवदेवेन ह्यस्मान् पञ्चगणान् प्रति।
बोधिताः ह्यागमाः सर्वाः शिवाद्वैतपराः खलु।।२५।।

तत्सारः सूत्ररूपेण कथ्यते हि मया मुने।
मुक्तागुच्छो हि सः सूत्रः श्रुयतां सावधानतः।।२६।।

सूत्रेऽस्मिन् सृष्टिसर्वस्वम् निहितं सूक्ष्म रूपतः।
विस्तार्यते मया ह्यद्य त्वदनुग्रहकांक्षया।।२७।।

त्वदुक्तेषु च वादेषु परिणामो महत्तरः।
तत्राप्यविकृतो मुख्यो ज्ञेयः सर्वैः स एव हि।।२८।।

दुग्धस्य दधिरूपेण परिणामो य उच्यते।
विकृताख्यो हि स प्रोक्तो जानीहि त्वं महामुने।।२९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वर्णेन स्वर्णकारो हि निर्मात्याभूषणानि च।
स्वर्णेऽत्र विकृतिर्नास्ति ततो ह्यविकृतिर्मतः।।३०।।

यथा तन्तुभिरुत्पन्नःपटस्तन्तुमयःस्मृतः।
तथा शिवात् समुत्पन्नं शिव एव चराचरम्।।३१।।

विनैव विकृतिं तौ हि शिवशक्ती सनातनौ।
षट्त्रिंशत् तत्त्वरूपेण दृश्येते हि महामुने।।३२।।

आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः।
कुटीभावाद्यथा भाति पटःस्वस्य प्रसारणात्।।३३।।

शिवशक्तिमयं सर्वं जगदेतच्चराचरम्।
मुक्तागुच्छं हि जानीहि तत्त्वमौक्तिकसंयुतम्।।३४।।

शिवादि-भूमिपर्यन्तं तत्त्वान्युक्तानि यानि च।
षट्त्रिंशत् संख्यया तानि प्रसिद्धानि महामुने।।३५।।

सनातनं हि यत्प्रोक्तमनारोपितरूपकम्।
तदेव तत्त्वमित्युक्तं तत्त्वतन्त्रविशारदैः।।३६।।

तत्त्वानि यानि चोक्तानि तानि सर्वाणि वै किल।
शिवशक्तिमयानीति जानीहि मुनिपुङ्गव।।३७।।

विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणी।
सदा सदाशिवेनैव ह्यविनाभावरूपिणी।।३८।।

विमर्शाख्या द्विधाशक्तिरविभागा विभागभूः।
आद्या सृष्टेर्मता पूर्वं द्वितीया सृष्टिकालिका।।३९।।

सृष्टेः पूर्वं तु या प्रोक्ता ह्यविभागदशान्विता।
सृष्टिकाले पुनः सैषा विभक्तेति निबोधिता।।४०।।

अदृष्टे प्राणिनामेव परिपक्वे तदा किल।
शिवे सञ्जायते सेच्छा बहुस्यामहमात्मिका।।४१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शक्तिरेषा प्रकाशस्य विमर्शाख्या परा शिवा।
इच्छाज्ञानादिरूपेण प्रविभक्ता स्वयं किल।।४२।।

अनादिनिधनाच्छान्ताच्छिवात्परमकारणात् ।
इच्छाशक्तिर्विनिष्क्रान्ता ततो ज्ञानं ततः क्रिया।।४३।।

समुत्पन्नानि तत्त्वानि भूम्यन्तानि यथाक्रमम्।
तेषां विस्तृतरूपं ते कथयामि श्रुणुष्व भोः।।४४।।

यत्तस्यामन्तरङ्गायां ज्ञानशक्तौ प्रविश्य च।
परमं तद्धि चैतन्यं शिवतत्त्वं प्रचक्षते।।४५।।

निरस्तदोषसम्बन्धं सुखस्फूर्तिविजृम्भितम्।
दिव्यमप्राकृतं नित्यं शिवतत्त्वं प्रकीर्तितम्।।४६।।

शुद्धमुक्ताफलाभासमुपास्यं गुणमूर्तिभिः।
जगतःसृज्यमानस्य निमित्तं हि तदुच्यते।।४७।।

इच्छातो बहिरङ्गायां क्रियाशक्तौ प्रविश्य च।
तदेव परमं तत्त्वं शक्तितत्त्वं प्रकीर्तितम्।।४८।।

उपादानमिति प्रोक्तं शक्तितत्त्वं तदद्भुतम्।
महामायादिरूपेण जृम्भमाणा विजृम्भते।।४९।।

इयं हि परमा शक्तिः सच्चिदानन्दलक्षणा।
सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिका ।।५०।।

शक्तितत्त्वमिदं चैव ज्ञानशक्तौ प्रविश्य च।
इदमाकाररूपेण यदा चैवाङ्कुरायते।।५१।।

तत्त्वं सदाशिवं प्रोक्तं सादाख्यं रुद्रसंज्ञकम्।
इदमेव पुनस्तत्त्वं पञ्चधा प्रविभज्यते।।५२।।

शक्तितत्त्वं पुनश्चैव क्रियांशेऽनुप्रविश्य च।
यदा चाऽङ्कुररूपत्वम् ईश्वरं तत्त्वमीरितम्।।५३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इदं सर्वमहं चेति यत् तत्त्वमभिमन्यते।
शुद्धविद्येति तत्तत्त्वं तत्त्वज्ञैः परिभाष्यते।।५४।।

उक्तान्येतानि तत्त्वानि पञ्चैव किल तापस।
शुद्धानि संप्रकीर्त्यन्ते मुख्यानीति निशामय।।५५।।

नानाभेदसमाकीर्णं जगदव्यक्तरूपकम्।
अण्डस्थरसवद्भाति मायातत्त्वं तदुच्यते।।५६।।

मायातत्त्वप्रभावेण जीवाज्जीवेसमन्ततः।
बुद्धिगो भासते भेदः संसारभ्रान्तिकारकः।।५७।।

मायातत्त्वेन जीवोऽयं मत्वा भिन्नं स्वमीश्वरात्।
परिभ्रमति संसारे कृतकर्मानुसारतः।।५८।।

अतः स्वकीयमैश्वर्यं विस्मृत्याऽयं सदा किल।
कञ्चुकैःपञ्चभिर्बद्धः संसारीति निगद्यते।।५९।।

सर्वकर्तृत्व-संकोचः कला कञ्चुकमुच्यते।
अनेनावृतजीवोऽयमल्पकर्ता प्रकीर्तितः।।६०।।

सर्वज्ञत्वस्य संकोचो विद्या कञ्चुकमुच्यते।
अनेनावरणेनैव जीवः किञ्चिज्ज्ञ उच्यते।।६१।।

संकोचः पूर्णतायास्तु रागकञ्चुकमुच्यते।
रागेणानेन जीवोऽयं विषयेषु हि रज्यति।।६२।।

नित्यतायाः शिवस्थायाः संकोचः काल इष्यते।
भूतादित्रिकरूपेण जीवं कवलयत्यसौ।।६३।।

शिवव्यापकतायास्तु संकोचो नियतिर्मता।
पञ्चमकञ्चुकेनायं परतन्त्रो नियन्त्रणात्।।६४।।

एतानि पञ्च तत्त्वानि कालादीनि निरन्तरम्।
बध्नन्ति हि सदा जीवं तेन संसरति ह्ययम्।।६५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कञ्चुकैरावृतो जीवो मलैरपि समावृतः।
पूरुषःपुरुषो वैष प्रोच्यते तन्त्रपारगैः।।६६।।

मायादिपुरुषं यावत् सप्ततत्त्वान्यमूनि वै।
शुद्धाशुद्धानि कथ्यन्ते ह्यशुद्धानि पुनः शृणु।।६७।।

सत्त्वादीनां गुणानां च साम्यावस्था तु या किल।
तत्त्वं प्रकृतिरित्युक्तं कारणं जगतः खलु।।६८।।

बुद्ध्यादिभूमितत्त्वानां कारणं प्रकृतिं विदुः।
तत्त्वानामेव तेषां यत् स्वरूपं तन्निरूप्यते।।६९।।

अध्यवस्यति यत्तत्त्वं संदिग्धे सर्ववस्तुनि।
सर्वशास्त्रेषु तत्त्वज्ञैर्बुद्धिरित्यभिधीयते।।७०।।

न- अहम्-अनहं प्रोक्तस् तं योऽहंकुरुते जनः।
अहंकार इति प्रोक्त अनात्मन्यात्मधीरसौ।।७१।।

संकल्पात्मा विकल्पात्मा या वृत्तिः परिकीर्तिता।
तन्मनस्तात्त्वमित्युक्तं सर्वतन्त्रविशारदैः।।७२।।

अत्र क्षेत्रे कृतयुगे स्थापितं सूर्यसिंहासनपीठमधितिष्ठन्नहं शिवतन्त्रप्रबोधनं करिष्ये इत्येवं तान् प्रबोध्य व्योममार्गेण सानन्दमृषिम् समाययौ श्रीधेनुकर्णोगुरुः। स्वागतवचनं व्याहृत्य पाद्यादिना सम्पूज्य गुरुणा समादिष्टः सानन्दोऽपृच्छत्— दृश्यं जगत् कुतः जायते कुत्र वा प्रविलीयते, सत्कार्यवादः असत्कार्यवादो वाऽत्रसम्मतः। सत्कार्यवादे परिणामः विवर्तश्चेति द्वौ पन्थानौ किंस्वरूपाविति। अथ महादेवं ध्यायन् श्रीधेनुकर्णः महादेवादधिगततन्त्रविद्यः मुक्तागुच्छइति सूत्रमुखेन समाधत्ते स्म- सत्कार्यवादो वेदागमसम्मतः स च परिणामात्मा परिणामश्च अविकृतस्वरूप इष्यते। दुग्धस्य दधिरूपेण परिणामो विकृतो भवति। यस्तु सुवर्णमय कुण्डलादिः परिणामः स तु अविकृत एवास्ते। तद्वत् तुन्तुषु उत्पन्नः पटस्तन्तुमयो भवति चेद् शिवसमुत्पन्नं चराचरं जगद् शिवमयमेवास्ते। शिवशक्त्योर्यत्सामरस्यं तदेव अविकृतं सद् षट्त्रिंशत्-तत्त्वरूपेण स्थितमाभाति। यथा पटः विलक्षणप्रसारेण कुटीभावमेति तथा शिवः आत्मशक्तिप्रसराद् विश्वात्मरूपेण भाति। तदेवं जगदिदं तत्त्वमौक्तिकसंयुतं मुक्तागुच्छं विजानीहि। अनारोपितं स्वरूपं तत्त्वमित्युच्यते। षट्त्रिंशत्-तत्त्वानां शिवशक्तिमयता लसति। शिवेन अविनाभावतया स्थिता

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विमर्शाख्या पराशक्तिः विश्ववैचित्र्यमादधाति। विमर्शशक्तिः सृष्टेः पूर्वं तावद् अविभागमयी तिष्ठति सृष्टेः पश्चात्तु विभक्ततया विलसति। प्राणिनामदृष्ट फलदानाय एकोऽहं बहु स्यामित्येवं संकल्पाद् प्रकाशशिवस्य विमर्शशक्तिः इच्छादिरूपतया प्रथमाना षट्त्रिंशत्-तत्त्वरूपतां बिभर्ति। परमं चैतन्यं सु-सुखस्फूर्तिविजृम्भितं शिवतत्त्वं तावदन्तरङ्गायां ज्ञानशक्तौ प्रविभाति। बहिरङ्गायां क्रियाशक्तौ प्रविश्य तदेव शक्तितत्त्व-रूपेण समुल्लसति। शिवतत्त्वस्य निमित्तता चेद् शक्ति-तत्त्वस्य उपादानता बोध्या। शक्तितत्त्वं ज्ञानशक्तौ प्रविश्य इदमित्येवं चेदङ्कुरायते तत् सदाशिव तत्त्वम्। क्रियाशक्तौ प्राविश्य इदमित्येवं चेदङ्कुरायते तत् सदाशिवतत्त्वम्। क्रियाशक्तौ प्रविश्य शक्तिरिय तावदीश्वरतत्त्वतयाभाति। अहमिदम्, इदमह मित्येवं वा स्फुरन्ती शक्तिः शुद्धविद्या-इत्याख्ययते। शिवः शक्तिः सदाशिवः ईश्वरः शुद्धविद्या चेति तत्त्वपञ्चकं शुद्धाध्वनाम्ना विजृम्भते। नानाभेदमयं जगदेवत् अण्डस्थरस् वद् भाति तन्माया तत्त्वमुच्यते। मायातत्त्वप्रभावादेव जीवाद् जीवे बुद्धिगो भेदो भाति। माया प्रभावे चैव जीवः ईश्वराद् भिन्नं स्वं मत्वा जननमरणात्म संसारे विभ्रमति। परिणामतः ऐश्वर्यं विस्मरन् जीवः पञ्चकञ्चुकबद्धः शक्तिसंकोचमनुभवति। सर्वकर्तृता संकुचिता कलातत्त्वतां याति। तत्प्रभावाद् जीवोऽल्पकर्ता भवति। सर्वज्ञता संकुचिता विद्यातत्त्वं भवति। तत्प्रभावाद् जीवनः अल्पज्ञो भवति। पूर्णता संकुचिता रागतत्त्वतां याति तत्प्रभावाद् जीवः विषयेषु रज्यति। नित्यता संकुचिता कालतत्त्वतां याति। तत्प्रभावाद जीवः भूतादित्रिक रूपेण कवलितः संजायते। अथ व्यापकता संकुचिता नियतितत्त्वतां याति। तत्प्रभावाद् जीवः नियति नियन्त्रितो भवति। पञ्चभिः कञ्चुकैरावरणाद् मलैरपि आवृतत्वाद् शिव एव गृहीत पशुभावः पुरुष इत्याख्यायते। मायादीनि पुरुषान्तानि सप्त तत्त्वानि शुद्धाशुद्धाध्वतां भजन्ते। गुणत्रय साम्यं प्रकृति तत्त्वं स्थूलजगतः कारणं भवति। अध्यवसाय शीलं बुद्धित्त्वम् प्रथते। न-अहम् अनहम्-तं यदहंकुरुते-सोऽयम् अहंकारः **अनात्मनि आत्मधीः** इत्युच्यते। संकल्पवृत्तिर्मनस्तत्त्वम्।।११-७२।।

**अहंकारो मनो बुद्धिस्तत्त्वान्येतानि वै किल।**
**अन्तस्थकरणत्वाच्चह्यन्तःकरणमुच्यते ।।७३।।**

**प्राबल्यमत्र विज्ञेयं त्रिषु तत्त्वेष्वनुक्रमात्।**
**इच्छाख्य-प्रकृतेरेव सर्वत्रैव विवर्तनात्।।७४।।**

**अहो प्रकृतितत्त्वस्य सत्त्वोद्रेकसमुच्छलात्।**
**ज्ञानेन्द्रियाणि वै पञ्च संभूतानि महामुने।।७५।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तानीन्द्रियाणि सर्वाणि शब्दादिविषयान् किल।
जानन्ति क्रमशस्चैव ह्यतो ज्ञानेन्द्रियाणि हि।।७६।।

गुणस्य रजसो यो हि समुद्रेकस्तदुद्भवः।
कर्मेन्द्रियगणो जातः पञ्चानि शृणु तापस।।७७।।

तत्त्वस्य प्रकृतेस्तस्यास् तमउद्रेकतः किल
प्रोच्यन्ते तानि सर्वाणि सूक्ष्मभूतानि वै खलु।।७८।।

तेभ्यो हि सूक्ष्मभूतेभ्यो स्थूलभूतानि जज्ञिरे।
एवं सर्वाणि तत्त्वानि सञ्जातानि शिवेच्छया।।७९।

एतेभ्यःस्थूलभूतेभ्यो भुवनानि चतुर्दश।
भोगायतनभोग्यानि जीवानां जज्ञिरे तदा।।८०।।

विमर्शशक्तियुक्तस्य शिवस्य परमात्मनः।
संकल्पमात्रतो जातं तत्त्वं तत्त्वमयं जगत्।।८१।।

मुहुर्मुहुरसंकोचात् संकोचेन तथैव च।
स्वेच्छयैव सदा भाति लीलाक्रीडापरायणः।।८२।।

इच्छाख्या प्रकृतिरेव त्रिषु अन्तः करणेषु विवर्तमाना राजते। प्रकृतेः सत्त्वोद्रेकाद् ज्ञानेन्द्रियाणि पञ्च शब्दादि विषयान् गृह्णन्ति। रजोगुणसमुद्रेकात् पञ्च कर्मेन्द्रियाणि, तमसः उद्रेकात् सूक्ष्मभूतानि जायन्ते। सूक्ष्मभूतेभ्यस्तु स्थूलभूतानि जायन्ते। स्थूलभूतेभ्यः चतुर्दशभुवनानि भोगायतन भोग्यानि जायन्ते। तदेवं चराचरात्म जगद् सविमर्श शिवस्य संकल्पमात्रतो जायमानं भवति। स्वेच्छया संकोचासंकोचाभ्यां स्वैरमसौ विश्वोत्तीर्णतया विश्वमयता चाभाति।।७३-८२।।

लोला भाति शिवा लीला सहजा हि शिवेच्छया।
पुनः पुनः समुत्पद्य पुनरेव च लीयते।।८३।।

स्वशक्तिगुणभेदेन भोक्त्रादिरूपतःखलु।
स्वयमेव स्वयं भूत्वा लीलयाऽऽविर्भवत्यसौ।।८४।।

शैव्यां विमर्शशक्तौ हि षट्त्रिंशत् तत्त्वरूपतः।
मुक्तागुच्छ इवोद्भाति जगदेतच्चराचरम्।।८५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



उभाभ्यां शिवशक्तिभ्यां समुत्पन्नमिदं जगत्।
मुक्तागुच्छ इति प्रोक्तं शिवेन परमात्मना।।८६।।

मुक्तागुच्छेन सूत्रेण सूत्ररूपेण वै किल।
देवकृताजगत्सृष्टिर् विवृता हि महामुने।।८७।।

शिवतत्त्वात् समुत्पन्नं जगदेतच्चराचरम्।
शिवरूपं हि विज्ञेयं शिवयोगसमाधिना।।८८।।

सर्वो वै रुद्र एवेति श्रुतिराह सनातनी।
अतो जगदिदं सर्वं विज्ञेयं शिवरूपकम्।।८९।।

शिवात्मकमिदं सर्वं जगदेतच्चराचरम्।
स्वात्मानं च शिवं मत्वा सुखीभव महामुने।।९०।।

मुक्तागुच्छमहासूत्रं यथावद्विवृतं मया।
इतः परं हि योगीन्द्र किमन्यच्छ्रोतुमिच्छसि।।९१।।

धेनुकर्णमहाचार्यमुखोद्गीर्णमिदं वचः।
श्रुत्वा सानन्दयोगीन्द्रो बभाषे विनयान्वितः।।९२।।

सूत्रार्थं त्वन्मुखाच्छ्रुत्वा गतो मे चित्तविभ्रमः।
ज्ञानामृतेन तृप्तोऽहं न ज्ञेयं किञ्चिदस्ति मे।।९३।।

विश्वं शिवमयं जातं जिज्ञासा पूर्णतां गता।
कर्तव्यं मे किमत्रास्ति निश्चित्य वद मे प्रभो।।९४।।

लीलासहजा शिवालीला शिवेच्छम्। उत्पत्तिप्रविलयात्मा विलसति। स्वशक्तिप्रभावाद् भगवान् स्वयमेव भोक्तादि रूपतः स्वयं भूत्वा षट्त्रिंशत् तत्त्व रूपतः मुक्तागुच्छ इव समाभाति। शिवशक्तिभ्यां पूज्याभ्यामुभाभ्याम् उत्पन्नं जगदिदं मुक्तागुच्छनाम्ना प्रकीर्त्यते शिवेन। सर्वो वै रुद्र एवेति श्रुत्या सर्वं जगत् शिवात्मकम्, स्वात्मानं शिवं च मत्वा शिवयोगेन साधको भक्तः परमं सुखं याति। मुक्तागुच्छमहासूत्रतात्पर्यं गुरुमुखतो विज्ञाय सानन्दयोगीन्द्रः ज्ञानामृतेन तृप्तः कर्तव्यं कर्म गुरुमपृच्छत्।।८३-९४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सानन्दस्य वचः श्रुत्वा धेनुकर्णो महागुरुः।
उवाच शान्तया वाचा कर्तव्यं बोधयन्निव।।९५।।

ज्ञानामृतेन तृप्तोपि योगी धर्मं न संत्यजेत्।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः।।९६।।

धर्म एव समस्तानां सिद्धीनामुदयस्थलम्।
निःस्पृहोऽपि महायोगी धर्ममार्गं न सन्त्यजेत्।।९७।

इष्टलिङ्गैकपूजा हि श्रेष्ठो धर्मः सनातनः।
पतिकर्मेति ह्युक्तं तत् ज्ञाते तत्त्वे न बाधकम्।।९८।।

करपीठेष्टलिङ्गं च सदा संपूजयन्निजम्।
जपन्नपि महामन्त्रं मन्त्रसिद्धिमवाप्स्यसि।।९९।।

अचिरान्मन्त्रसिद्धिस्ते भविष्यति महामुने।
वाचकं मन्त्रमुच्चार्य नारकानुद्धरिष्यसि।।१००।।

त्वयोक्तं मन्त्रमाकर्ण्य नरा ये नरके स्थिताः।
पापमुक्ता भविष्यन्ति नास्ति नास्त्यत्र संशयः।।१०१।।

पात्रं शिवप्रसादस्य भवानत्र न संशयः।
इति निश्चित्य कथितं सूत्रं तन्मुक्तगुच्छकम्।।१०२।।

स्थाप्यतां सर्वलोकेषु सूत्रमेतत् त्वया मुने।
ईदृशं शिवबोधस्य साधनं नास्ति कुत्रचित्।।१०३।।

तदेष शिवसिद्धान्तः शिवाद्वैतप्रकाशकः।
परीक्षितेभ्यो दातव्यः शिष्येभ्यो नान्यथा क्वचित्।।१०४।।

अवतीर्णं मया भूमौ सूत्रस्यास्य प्रवृत्तये।
प्रवर्तय शिवाद्वैतं त्वमपि ज्ञानमीदृशम्।।१०५।।

एवं संबोध्य सानन्दं धेनुकर्णो महागुरुः।
उत्थाय व्योममार्गेण सूर्यपीठं समागतः।।१०६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अथज्ञानामृतेन तृप्तेनापि योगिना धर्मो न त्याज्यः। पतिकर्मसमाख्या इष्टलिङ्गपूजा विज्ञाततत्त्वेनापि मन्त्रजपसहिता विधेया। मन्त्रसिद्ध्या समुल्लसितस्त्वं मन्त्रोच्चारेण नारकान् उद्धरिष्यसीति समादिश्य शिवसिद्धान्तः परीक्षितेभ्यो हि आशु शिष्येभ्य प्रकाशनीय इति समवोचत्॥९५-१०६॥

**उषित्वा द्वापरान्तं हि संबोध्य सकलान् जनान्।**
**संस्थाप्य वीरशैवं च पुनर्लिङ्गे लयं ययौ।।१०७।।**

**मुक्तागुच्छमिदं सूत्रं जगत्तत्त्वप्रबोधकम्।**
**धेनुकर्णेन भूलोके बोधितं हि शिवाज्ञया।।१०८।।**

तदनन्तरं व्योममार्गेण सूर्यपीठं प्राप्य द्वारान्तं तत्र निवसन् शिष्यान् प्रबोध्य जगत् तत्त्व प्रबोधकं मुक्तागुच्छसूत्रं प्रबोध्य वीरशैवधर्मं संस्थाप्य महालिङ्गे लयं ययौ॥१०७-१०८॥

## हिन्दी तात्पर्य

## द्वापरयुग का इतिहास

भगवान शिव की आज्ञा से कैलाश से भूमि पर आए हुए गणेश्वर, धेनुकर्ण नाम से प्रसिद्ध हुए। सूर्य सिंहासन पीठाधीश के रूप में उन्होंने सानंद ऋषि को मुक्तागुच्छम् चतुर्थ सूत्र का उपदेश किया। श्री शैल नामक महाक्षेत्र में श्री मल्लिकार्जुन ज्योतिर्लिंग प्रसिद्ध है। उससे आविर्भूत गणेश्वर श्री धेनुकर्ण शिवाचार्य माघकृष्ण चतुर्दशी शिवरात्रि में ज्योतिर्लिंगोद्भव बेला में ही प्रकट हुए। उन्होंने उपस्थित लोगों से कहा वीर शैवतंत्र के १०१ स्थलों की संस्थापना हेतु सानंद योगी को उपदेश देने हेतु मैं प्रकट हुआ हूँ। उस क्षेत्र के कृतयुग में स्थापित सूर्यसिंहासन पर अधिष्ठित होकर वह शिवतंत्र का प्रबोधन करेंगे, ऐसा कहकर शिवाचार्य गुरु सानंद ऋषि के पास व्योममार्ग से पहुँचे। स्वागत-पूजन के पश्चात् उन्होंने गुरु से पूछा दृश्य जगत कहाँ से उत्पन्न होता है? और किसमें लीन हो जाता है? सत्कार्यवाद में उपयोगी परिणाम और विवर्त के क्या स्वरूप हैं? धेनुकर्ण शिवाचार्य जी ने सानंद के प्रश्न का समाधान करने हेतु मुक्तागुच्छम् सूत्र निर्मित किया और सत्कार्यवाद को वेदस्तुति एवं तंत्रस्तुति से सम्मत प्रतिपादित किया। इसमें परिणामवाद अभ्यर्हित है और यह परिणाम भी अविकृत स्वरूप है। दुग्ध का दधि में परिणाम विकृति कहलाती है किंतु सुवर्ण से कुण्डल का परिणाम अविकृत कहलाता है। यथा तंतु से उत्पन्न पट तंतुमय होता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तदवत् शिव से उत्पन्न चराचर जगत शिवमय ही है। शिव और शक्ति का जो सामरस्य है, वह अविकृत रूप से ३६ तत्वों के रूप में स्थित होता है, जैसे पट को प्रकार विशेष से प्रसारित करने पर कुटी बन जाता है। वैसे शिव आत्मशक्ति प्रसार से विश्वात्मा के रूप में आसीन होते हैं। ३६ तत्व की मोती से बना हुआ यह संसार मुक्तागुच्छ के समान स्थित रहता है। जो स्वरूप अनारोपित है, वह तत्व कहलाता है। इसलिए मानव वृक्षादि तथा घट पट गृहादि नाना रूप से भासमान स्वरूप प्रकट होकर नश्वर है। ये आरोपित स्वरूप है और इन सबों का मूलरूप पृथ्वीतत्व अनारोपित होने से तत्व संज्ञक है। ये ३६ तत्व भी शिवशक्तिमय है। शिव की स्वभावभूता विमर्श शक्ति पराशक्ति कहलाती है। यह विश्व में विचित्ररूपता का आधान करती है। यह विमर्शशक्ति सृष्टि से पूर्व प्रकाश से अविभक्त रहती है और सृष्टि के पश्चात् विभक्त होकर स्थित होती है। जीवों के अदृष्ट कर्म फलों को भोग कराने हेतु प्रकाशात्मक शिव की विमर्श शक्ति संकल्पपूर्वक इच्छादि रूप से भासित होकर ३६ तत्वों के रूप में प्रकट होती है जो परमचैतन्य है, वह अंतरंग ज्ञानशक्ति में सुखस्फूर्ति से समुल्लसित होकर शिवतत्वरूप से विभासित होती है। तदवत् बहिरंग क्रियाशक्ति में प्रवेश कर वही चैतन्य शक्ति स्वरूप से उल्लसित होती है। शिवतत्व निमित्त बनता है और शक्ति उपादान। शक्ति तत्व ज्ञान शक्ति में प्रवेश कर इदं इस रूप से अंकुरित होकर सदा शिवतत्व रूप में प्रकट होती है। क्रियाशक्ति में प्रवेश कर इदं इस रूप से अंकुरित होता हुआ शक्तितत्व ईश्वरतत्व के रूप में प्रकट होता है। "अहं इदम्", 'इदम् अहं" इस रूप से स्फुरित होने वाली शक्ति शुद्धविद्या कहलाती है।

१. शिव २. शक्ति ३. सदाशिव ४. ईश्वर ५. शुद्ध विद्या। ये पाँच तत्व शुद्धाअध्वा कहलाते हैं जो संपूर्ण जगत भेदमय भासित हो रहा है, वही अण्ड में स्थित रस की भाँति जगत का कारण मायातत्व कहलाता है। माया के प्रभाव से ही एक जीव से दूसरे जीव में जो भेद है वह वास्तविक नहीं केवल बुद्धि में विद्यमान है। माया के प्रभाव से ही जीव स्वयं को ईश्वर से भिन्न मानकर जन्ममरणात्मक संसार में भटकता है, वह शिवात्मा होने पर भी ऐश्वर्य को भूल जाता है और पाँच प्रकार के जो कंचुक हैं उसमें आबद्ध होकर शक्ति के संकोच का अनुभव करता है। इसीलिए सर्वकतृता जो स्वाभाविक रूप से विद्यमान है, वह संकुचित होकर कला तत्व के रूप में प्रकट होती है। यह प्रथम कंचुक है। इसी कारण से जीव अल्पकर्ता है। सर्वज्ञता जब संकुचित होती है तो विद्या तत्व द्वितीय कंचुक प्रकट होता है। इसके प्रभाव से जीव अल्पज्ञ हो जाता है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पूर्णता संकुचित होती है तो तृतीय कंचुक राग तत्व उपस्थित होता है और इसके प्रभाव से जीव इन्द्रिय विषयों में राग करने लगता है। शिवात्मा होने से नित्यता है किन्तु मायाबल से नित्यता संकुचित होकर कालतत्व चतुर्थ कंचुक उत्पन्न होता है। इसके प्रभाव से जीव भूत, वर्तमान और भविष्यत् काल भेद से स्वयं को कालकवलित मान लेता है। स्वाभाविक व्यापकता मायाप्रभाव से संकुचित होकर पञ्चम कंचुक नियति तत्व उपस्थित होता है। इसके प्रभाव से जीव नियति से नियंत्रित होता है, इसी कारण से यह कार्य हो सकता है अन्य से नहीं। ये उपर्युक्त पाँच प्रकार के कंचुकों से आवृत होकर विविध बलों से आवृत्त हो जाना शिव का ही पशु भाव है, जिसे पुरुष कहा जाता है। माया से लेकर पुरुष पर्यंत ७ तत्वों को शुद्धाशुद्ध अध्वा कहा जाता है। तदनन्तर प्रकृति तत्व है जिसमें तीन गुणों की साम्यावस्था रहती है। माया से उत्पन्न होने वाली इस प्रकृति तत्व को स्थूल जगत का कारण माना जाता है। प्रकृति से निश्चयात्मा अंत:करण बुद्धितत्व प्रकट होता है। इस बुद्धि तत्व से अहंकार तत्व उत्पन्न होता है जिसके द्वारा अनात्मा में आत्मबुद्धि उदित होता है। इसकी बहुत अच्छी व्युत्पत्ति कारिकाकार ने प्रतिपादित की है— (न अहम् = अनहम्) तं यत्र अहं कुरुते स: अहंकार:। संकल्पात्मक वृत्ति का नाम मनस् तत्व है। तीन प्रकार के अंत:करण में जो इच्छा प्रकृति है वही तीन रूपों में विवर्तरूप से भासमान होती है। प्रकृति के सत्वगुण के उद्वेग से उत्पन्न होने वाली पाँच ज्ञानेन्द्रिय-शब्द, स्पर्श, रूप, रस, गन्ध विषयों का ग्रहण करती है। रजोगुण के उद्वेग से उत्पन्न होने वाली कर्मेन्द्रियाँ प्रकट होती हैं तदवत् तमोगुण के उद्वेग से अपञ्चीकृत सूक्ष्म भूत उत्पन्न होते हैं। सूक्ष्मभूतों से स्थूलभूतों की उत्पत्ति होती है तथा स्थूलभूतों से चतुर्दश भुवण, भोगायतन एवं भोग्य वस्तु उत्पन्न होती है। उपर्युक्त प्रकार से अनुशीलन करने पर सुविदित होता है। भगवान शिव के संकल्प मात्र से विमर्श शिवा से उत्पन्न होने वाला यह संपूर्ण स्थावर जंगम जगत भासमान हो रहा है। भगवान शिव की तो अपनी स्वच्छ इच्छा है। वह किसी की पराधीनता के बिना स्वतंत्र रहते हुए शक्ति संकोच से विश्वमय रूप में एवं असंकोच से विश्वोतीर्ण रूप में युगपद भासमान रहते हैं। शिव की सहज लीला उपपत्ति और विनय को आत्मसात करने वाली है। अपनी शक्ति के प्रभाव से भूरिभर्ग भगवान शिव भोक्ता भोज्य और भोग्य के नाना रूपों में स्वयं ही प्रकट होकर ३६ तत्वों की बनी माला मुक्तागुच्छ के रूप में शोभायमान होते हैं। जीवों के द्वारा सतत स्तुत्य एवं पूज्य शिव और शक्ति से उत्पन्न यह संपूर्ण जगत शिव के द्वारा मुक्तागुच्छ नाम से पुकारा जाता है। श्रुति स्पष्ट कहती है, 'सर्वोवैरुद्रएव'' अर्थात् संपूर्ण जगत शिवात्मक ही है।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ऐसे शिव को स्वात्मा रूप से समझकर और मानकर गुरु प्रदत्त शिवयोग के माध्यम से साधक भक्त मोक्षरूप परमसुख से चिदानंद रूप में प्रतिष्ठा प्राप्त कर कृतार्थ हो उठता है। श्री गुरु के मुखारबिंद से सानंद योगी ने ज्ञानामृत का पान किया, संतृप्त हो उठे और गुरु से आदेश माँगा। मैं क्या करूँ? सद्‌गुरु ने कहा—ज्ञानामृत से तृप्त होने पर भी योगी को धर्म का त्याग नहीं करना चाहिए। इष्टलिंग पूजा को शास्त्रकारों ने पतिकर्म कहा है जो स्वयं को स्वात्म महेश्वर के रूप में प्रात्यभिज्ञा प्राप्ति से कृतार्थ हो चुके हैं। ऐसे ज्ञानी को भी मंत्र जप के साथ इष्टलिंग की पूजा करनी ही चाहिए। श्री सानंद! आप मंत्र सिद्धि को प्राप्त कर सिद्धमंत्रोच्चारण से नरकपति जीवों का उद्धार करना और शिवसिद्धांत का पात्र शिष्यों में प्रचार-प्रसार करते रहना। सानंद ऋषि को कर्म का उपदेश कर व्योममार्ग से सूर्यपीठ सिंहासन पहुँचकर द्वापर पर्यन्त निवास करते हुए शिष्यों का प्रबोधन करते हुए मुक्तागुच्छ-सूत्र की निर्मिति एवं प्रबोधन से वीरशैव धर्म को सुप्रतिष्ठित बनाते हुए सद्‌गुरु महालिंग में लीन हो गए।

॥ इति सप्तमाध्यायः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ अष्टमाध्यायः ॥

## ॥द्वापरयुगीनमैतिह्यम्॥

# विश्वकर्णभगवत्पादेन दूर्वाशाय महर्षये पञ्चवर्णमहासूत्रोपदेशः

पञ्चवर्णप्रवक्तारं ज्ञानसिंहासनाधिपम्।
दूर्वाशस्य गुरुं वन्दे विश्वकर्णं जगद्गुरुम्॥१॥

अध्ययारम्भे कारिका कृदत्रभवान् शिवाचार्यः पञ्चवर्णेति॥१॥

काश्यां विश्वेश्वराल्लिङ्गाद्विश्वकर्णो महागुरुः।
धर्मसंस्थापनार्थाय द्वापरे संबभूव ह॥२॥

माघकृष्णचतुर्दश्यां शिवरात्रौ महानिशि।
लिङ्गोद्भवस्य वेलायां लिङ्गात्प्रादुर्बभूव ह॥३॥

उत्तमाङ्गेष्टलिङ्गञ्च कपाले च त्रिपुण्ड्रकम्।
सर्वाङ्गेषु च रुद्राक्षं दण्डं बैल्वं तथैव च॥४॥

स्वर्णं कमण्डलुं चैव दधानं पीतवाससम्।
प्रादुर्भूतं तमालोक्य विस्मिताः सकलाः प्रजाः॥५॥

कृत्वा दण्डप्रणामञ्च विनयादब्रुवन् किल।
तेजोराशिर्महास्वामिन् कुतो वा को भवान् किल॥६॥

प्रयोजनं च किं वा स्यादवतारस्य कथ्यताम्।
इति पृष्टो महायोगी जनैर्विस्मितमानसैः॥७॥

प्रत्युवाच गणेन्द्रः सः शिवाद्वैतपरायणः।
शिवादेशानुसारेण शिवलिङ्गादिहाभवम्॥८॥

नाम्ना च विश्वकर्णोऽहं शिवसिद्धान्तपालकः।
स्थाप्यं मया शिवाद्वैतं भुवि लोकहिताय च॥९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इत्युक्ते हि गणेन्द्रे च विश्वकर्णे हि तत्क्षणम्।
काशीस्थो हि महाराजा दिवोदासो महाप्रभुः॥१०॥

महानिशीथवेलायां शिवदर्शनहेतवे।
भक्त्युत्साहसमेतश्च ह्याजगामेशमन्दिरम्॥११॥

तत्र तं प्रार्थयामास दिवोदासो महाप्रभुः।
प्रासादं मे समागत्य कुलं सर्वं समुद्धर॥१२॥

राज्ञो विनन्तिमाकर्ण्य विश्वकर्णो महागुरुः।
स्वानुज्ञां प्रददे तस्मै प्रसन्नोऽभून्महाप्रभुः॥१३॥

तत्क्षणं हि महाराजो गुरूणां स्वागताय च।
आराजभवनादेष आविश्वेश्वरमन्दिरम्॥१४॥

तिर्यगान्दोलिकां तावद्वाद्यैश्च विविधैरपि।
विधाय वैभवेनैव स्वागतं व्याजहार ह॥१५॥

समागतं तमाचार्यं सपत्नीको महाप्रभुः।
विधाय स्वागतं तस्मै पाद्यं दत्त्वा च पादयोः॥१६॥

प्रासादे पूर्णकुम्भेन वाद्यैश्च विविधैः सह।
प्रावेशयद्गुरुं भक्त्या जयघोषमुदीरयन्॥१७॥

रत्नसिंहासने भूय उपावेश्य महागुरुम्।
विनयादब्रवीत् सोयं कृत्वा तत्पादपूजनम्॥१८॥

भो कल्याण महाभाग शिवज्ञानमहोदधे।
आचार्यवर्य योगीश! पाहि मां शरणागतम्॥१९॥

राज्ञा संप्रार्थितः श्रीमान् विश्वकर्णो जगद्गुरुः।
शक्तिपातेन विधिना दीक्षयाऽयोजयद् नृपम्॥२०॥

दीक्षितो हि महाराजः परिवारसमन्वितः।
प्रसन्नवदनो भूत्वा प्रारेभे गुरुवन्दनम्॥२१॥

अद्य मे सफलं जन्म गतो मे चित्तविभ्रमः।
सर्वाभीष्टप्रदं लिङ्गं त्वत्तः प्राप्तं महाऽनघ॥२२॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इदानीं श्रोतुमिच्छामि त्वन्मुखाद्धि समासतः।
सनातस्य धर्मस्य वीरशैवस्य वैभवम्।।२३।।

राजन्हि बहवःसन्ति धर्मा भिन्नार्थदायकाः।
अपवर्गप्रदो धर्मो वीरशैवःसनातनः।।२४।।

वीरशैवपदेनैव ख्यातिर्यस्य जगत्त्रये।
शिवेन बोधितःसोऽयमस्ति धर्मो सनातनः।।२५।।

आदिदेवो महादेवो यथाऽनादिः प्रकीर्त्यते।
तथैव वीरशैवोऽपि ह्यनादिःपरिकीर्त्यते।।२६।।

शिवादेशानुसारेण सर्वलोकहिताय च।
आचार्यैः पञ्चकैरेव कृते संस्थापितो भुवि।।२७।।

सिद्धान्ताख्येषु तन्त्रेषु शिवेनोक्तेषु वै किल।
भागे तदुत्तरे चैव धर्मोऽयं प्रतिपादितः।।२८।।

वेदेषु सर्वशास्त्रेषु पुराणेष्वखिलुषु च।
स्मृतीतिहासग्रन्थेषु धर्मोऽयं प्रतिपादितः।।२९।।

वर्णानामाश्रमाणां च यो भेदःप्रतिपाद्यते।
निःसार्य दीक्षया तं च साम्यवादोऽत्र साध्यते।।३०।।

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो लभते मुक्तिं लिङ्गंदीक्षाबलेन हि।।३१।।

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तु वा।
सन्यस्थोऽपि च मुच्येत दीक्षादग्धमलत्रयः।।३२।।

दीक्षायां शक्तिपितो हि मानदण्ड इतीरितः।
न वर्णो नाश्रमो नैव न लिङ्गं न वयो मितिः।।३३।।

मन्दिराणि च भव्यानि लोके सन्ति बहूनि च।
देवाय रोचते दिव्यं न भव्यं लोकनिर्मितम्।।३४।।

तत्त्सृष्ट्वा हि स्वयं तत्र प्राविशत् परमःशिवः।
अतो हि मानवो देहो दिव्यो देवालयः श्रुतः।।३५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



देहात् परतरं नास्ति पवित्रं देवमन्दिरम्।
धारिणो हीष्टलिङ्गस्य देहो दिव्यः शिवालयः।।३६।।

दीक्षितानां च भक्तानां देहे देवः स्थितः सदा।
अत एव च देवो हि भक्तदेहीती कथ्यते।।३७।।

वर्णानामाश्रमानां च भेदो मानवनिर्मितः।
अत एव च देवाय स भेदो नैव रोचते।।३८।।

धार्मिकानि च चिन्हानि देहे दृश्यन्ति यस्य वै।
मर्त्त्यो मर्त्यो न विज्ञेयः स नित्यं भगवत्तनुः।।३९।।

मुखे पञ्चाक्षरो मन्त्रः कपाले च त्रिपुण्ड्रकम्।
लिङ्गरूद्राक्षधारी यो वीरशैवः सः उच्यते।।४०।।

लिङ्गे प्राणं समाधाय प्राणे लिङ्गं तु शाम्भवं।
प्राणवल्लिङ्गधारी यो वीरशैवः सः उच्यते।।४१।।

वीरशैवसमो भक्तो त्रैलोक्ये नास्ति वै किल।
देवदेवो महादेवो यस्य हस्ते विराजते।।४२।।

मृत्युञ्जयो महादेवो यस्य देहे च राजते।
मृत्योर्भीतिः कुतस्तस्य कुतो वा जन्मसंभवा।।४३।।

इष्टलिङ्गस्य रूपेण तस्य पूजा निरन्तरा।
न तस्य सूतकं किञ्चित् प्राणलिङ्गाङ्गसङ्गिनः।।४४।।

शिवसंगाद्यथा गङ्गा सदा सूतकवर्जिता।
लिङ्गसंगात्तथा नारी सर्वसूतकवर्जिता।।४५।।

अष्टावरणसम्पन्नः पञ्चाचारपरायणः।
षट्स्थलेनैव मार्गेण चरन्मुक्तिमवाप्नुयात्।।४६।।

एवमाचारसम्पन्नो दृढभक्तिसमन्वितः।
सूतकैश्च सदा मुक्तो वीरशैव इति स्मृतः।।४७।।

वीरास्तु बहवः सन्ति धनेन च बलेन च।
वीरशैवो यथा भक्त्या तथा वीरो न कश्चन।।४८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वैरं पञ्चविधं प्रोक्तं शास्त्रेषु मुनिभिः खलु।
स्त्रीकृतं वास्तुजं वाग्जं ससापत्न्यापराधजम्।।४९।।

एतानि पञ्चवैराणि त्यक्त्वा निर्वैरभावया।
विरोधरहितो यस्तु वीरशैवःस उच्यते।।५०।।

इष्टलिङ्गवियोगे वा व्रतानां वा परिच्युतौ।
तृणवद्यो त्यजेत् प्राणान् वीरशैवः सः उच्यते।।५१।।

वीशब्देनात्र बोद्धव्या विद्या सा चैक्यबोधिका।
तस्यां यो रमते शैवः वीरशैव इति स्मृतः।।५२।।

एतत्सर्वं परीक्ष्यैव शिवो हि परमेश्वरः।
प्राशस्त्यं वीरशैवस्य शिवायै कथितो पुरा।।५३।।

न वीरशैवसदृशं मतमस्ति जगत्त्रये।
सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकम्।।५४।।

क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाधिकाः।
पशुभ्योऽपि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः।।५५।।

द्विजातिष्वधिका विप्रा विप्रेषु क्रतुबुद्धयः।
क्रतुबुद्धिषु कर्तारस्तेभ्यःसन्यासिनोऽधिकाः।।५६।।

तेभ्यो विज्ञानिनःश्रेष्ठास्तेषु शङ्करपूजकाः।
तेषु श्रेष्ठा महाभाग मम लिङ्गाङ्गसंगिनः।।५७।।

लिङ्गाङ्गसंगिष्वधिकः षट्स्थलज्ञानवान् पुमान्।
तस्मादप्यधिको नास्ति त्रिषु लोकेषु सर्वथा।।५८।।

बहुनोक्तेन किं देवि स एवाहं न संशयः।
एवं रूपेण भो राजन् शिवेन कथितं पुरा।।५९।।

पवित्रेऽस्मिन् महाधर्मे दीक्षितो हि भवानपि।
अतस्तन्नियमान् सर्वान् पालयित्वा सुखी भव।।६०।।

विश्वकर्णमुखोद्गीर्णं श्रुत्वा तत्त्वं महत्तरम्।
दिवोदासो महाराजो विनयादब्रवीद् वचः।।६१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रीकाश्याम् विश्वेश्वलिङ्गादुद्भूतोऽत्र भवान् श्री विश्वकर्णो जगद्गुरुः पञ्चवर्णसूत्र प्रवक्ता समभूत्। माघ कृष्णचतुर्दश्यां शिवरात्रौ निशीथवेलायाम् इष्टलिङ्गत्रिपुण्ड्रादिलसितः लिङ्गोद्भवः श्री विश्वकर्णः श्रीशिवाद्वैत प्रतिष्ठापनमुद्देश्यं प्रतिपादयामास। श्रीकाशीमहाराजो दिवोदासः शिवदर्शन हेतवे समागतः श्री विश्वकर्णं दिव्यतेजसं प्रणम्य प्रासादमागन्तुं निमन्त्रयामास। प्राप्तानुज्ञोऽसौ आन्दोलिका-वद्यादिसम्भारपुरः सरं स्वागत वचोभिः सम्मान्य विविधोपचारैः सपत्नीकः समर्चयन् दीक्षापुरःसरमिष्टलिङ्गं समन्त्रं मूर्ध्ना समग्रहीत्॥२-६१॥

तवादेशानुसारेण यावज्जीवमहर्निशम्।
चरन्नेव महाधर्मं प्रजा वै पालयाम्यहम्।।६२।।

दिवोदाससुशिष्यस्य वचः श्रुत्वा महागुरुः।
प्रसन्नवदनःश्रीमानब्रवीद् मधुरं वचः।।६३।।

आनन्दकानने राजन् महाबिल्ववने किल।
कृते संस्थापितं पीठं ममास्ते ज्ञानसंज्ञकम्।।६४।।

उषित्वाऽऽद्वापरं धर्मं शिवाज्ञामनुपालयन्।
दुर्वाशप्रभृतीन् सम्यक् बोधयाम्यहमन्वहम्।।६५।।

भवानपि च भो राजन् ज्ञानसिंहासनं खलु।
काले काले समागत्य सेवां कुरु यथोचितम्।।६६।।

इत्युक्त्वा पश्यतां तेषां विश्वकर्णो महागुरुः।
व्युत्थाय व्योममार्गेण दूर्वाशवासमागतः।।६७।।

वीरशैवंधर्मं प्रचारयितुमाजीवं प्रथततस्तस्य कृते आनन्दकानने महाबिल्ववने ज्ञानसिंहासनपीठं यत् कृते स्थापितं तत्र समागत्य यथाकालं सेवाविधानाय समादिशत्। तदनन्तरं श्री सद्गुरुः विश्वकर्णः व्योममार्गेण तपस्तपतः दूर्वाशस्य आश्रमं व्योममार्जेण ययौ॥६२-६७॥

## ॥ दुर्वाशःप्रसंगः ॥

विश्वकर्णं महाचार्यं सहस्त्रादित्यसन्निभम्।
जटामुकुटसंयुक्तं त्रिपुण्ड्राङ्कितमस्तकम्।।६८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वस्त्रं पीतं दधानं च बिल्वदण्डधरं प्रभुम्।
आकाशाददतिवेगेन ह्यागतं स्वाश्रमं प्रति।।६९।।

योगिनं तं ददर्शाऽसौ दूर्वाशाख्यो महामुनिः।
पूर्णकुम्भेन मन्त्रैश्च स्वागतं व्याजहार ह।।७०।।

समानीय तमाचार्यं पादौ पाद्येन वै किल।
प्रक्षाल्य श्रद्धया चैनं विधिनाऽपूजयद् मुनिः।।७१।।

प्रावेश्य स्वाश्रमे देवमुपावेश्यासनोत्तमे।
स्वयं तदाज्ञया चैवमाससादासनान्तरे।।७२।।

महामुनिं समासीनं परिवीक्ष्य महागुरुः।
उवाच शान्तया वाचा विश्वकर्णो जगद्गुरुः।।७३।।

निर्विघ्नं वर्तसे किं त्वं नित्या ते नियमक्रिया।
तपस्वी साधु दूर्वाश कुतःस्युस्तेन्तरायकाः।।७४।।

अनसूयासुगर्भाद्वै ह्युत्पन्नोऽसि शिवः स्वयम्।
जगत्यां विश्रुतः शुक्लो जगत्कल्याणहेतवे।।७५।।

पितरौ ते तपःपूतौ सन्तुष्टोऽकिञ्चनः स्वयम्।
तपसा दग्धपापानामन्तरायाःकुतः किल।।७६।।

तपतस्तपनस्याग्रे नैव तामिश्रजृम्भणम्।
आस्तिकस्य तपोमूर्तेः कुतःप्रत्यूहसंभवः।।७७।।

शिवनिर्माल्यमालां यत् त्वत्प्रदत्तां पुरा किल।
अवज्ञाय तु देवेन्द्रः श्रीहीनोऽभूत् सुदुःखितः।।७८।।

भवतः सिद्धमन्त्राद्वै मन्त्रं प्राप्य पुरा किल।
कुन्ती माद्र्या सहप्राप्नोत् दिव्यपुत्रान् सुविश्रुतान्।।७९।।

भवद्दत्तप्रसादस्य पादादन्यत्र वै किल।
लेपनाद्भगवान् कृष्णो वज्रकायोऽभवत् तदा।।८०।।

लीलया त्वनया एव प्रसादमहिमाद्भुतः।
सर्वत्र जगति ख्यातः कथं विस्मर्यते मुने।।८१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विश्वकर्णमुखोद्गीर्णं स्वकीयं शंशनात्मकम्।
वचः श्रुत्वा च दूर्वाशो विनयादब्रवीन्मुनिः।।८२।।

शंसनं स्वं भृशं श्रुत्वा गुरोर्वक्त्राद्मुहुर्मुहुः।
दूर्वाशो लज्जितो भूत्वा विनयादब्रवीत् तदा।।८३।।

शंसनं शृणुयाद्यः स्वं परनिन्दां तथैव च।
त्रिकालं निरयस्तस्य जायतेऽनुपदं ध्रुवम्।।८४।।

दिव्यं जटात्रिपुण्ड्रादिमण्डितं श्री विश्वकर्णं सद्गुरुं समागतं मन्त्रैः पाद्यात्दिना च स्वागतं व्याहृत्य सम्पूज्य च उच्चैरुपाविश्य अधस्तादुपविष्टः। यस्य चितरौ तपः पूतौ स्वयंचासौ सन्तुष्टोऽकिञ्चनः आस्तिकः तपोमूर्तिश्च स नूनमन्तरायरहितः स्यादिति व्याहरन् सद्गुरुः दूर्वाशस्य देवेन्द्रश्रीहीनता, कुन्तीमाद्रयोः दिव्यपुत्र प्राप्तिः, श्रीकृष्णस्य वज्रकायता चेति कथाप्रसङ्गं यद् व्याहरति तद् स्वशंसन श्रवणं परनिन्दाकरणं च निरयप्रदमिति कृत्वा दूर्वाशः लज्जामाप॥६८-८४॥

तपस्व्यपि च कोपेन रजसाविष्टमानसः।
शपन्नस्मि सदाकालं जनान् सर्वत्र वै किल।।८५।।

स्वभावेन मदीयेन संत्रस्ता भावुका जनाः।
दृष्ट्वा मां भीतभीताः स्युर्व्रजेर्युदूरतो दिशि।।८६।।

दुर्गुणेन च कोपेन द्वारेण निरयस्य च।
पीडितोऽहमुपायं त्वं वद मे करुणानिधे।।८७।।

कोपी यतिस्तु चाण्डाल इति शास्त्रेषु निश्चितः।
ततः कोपं समुत्सार्य मामुद्धर महागुरो।।८८।।

तपस्वी सन्नपि रजसा कोपेन चाप्लुतः जनान् शपन् भावुकान् भीतभीतान् कुर्वन् कोपदुर्गुणद्वारकं निरयं चाण्डालतां वा यथा न प्राप्नुयां तथा कृपा विधेहीति मुनिराह सद्गुरुम्॥८५-८८॥

## ॥ पञ्चवर्णसूत्रोपदेशः ॥

दुर्गुणेन तु कोपेन त्रस्तं दृष्ट्वा महामुनिम्।
गभीरशान्तया वाचा विश्वकर्णोऽब्रवीत् किल।।८९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इन्धनेन यथा नाग्निः शान्तिमेति कदाचन।
तथैव तपसा कोपो न शाम्यति महामुने।।९०।।

अग्निर्यथेन्धनं प्राप्य भूय एवाभिवर्धते।
तपसा भवतः कोपस्तथैव परिवर्धते।।९१।।

अज्ञानमेव कोपस्य कारणं मूलमुच्यते।
तपसा तस्य नाशस्तु न शक्यः कल्पकोटिभिः।।९२।।

मा भैषीः कोपशान्त्यर्थं ज्ञानं सुलभसाधनम्।
मलाऽवृतेन तज्ज्ञानं नैव प्राप्यं कदाचन।।९३।।

आणवादिमलानां च ह्यनादीनां महामुने।
निवृत्तिर्दीक्षया शक्या तस्मात् त्वं दीक्षितो भव।।९४।।

विश्वकर्णवचःश्रुत्वा मुदितो हि महामुनिः।
प्रणम्य दण्डवद्भूमौ विनयादब्रवीद् वचः।।९५।।

भो कल्याणमहाभाग ज्ञानामृतमहोदधे।
आचार्यवर्य संप्राप्तं रक्ष मां शरणागतम्।।९६।।

विधिवद्दीक्षयित्वाथो मलान्मां प्रविमोचय।
कोपशान्तेर्महाज्ञानं निबोधय महागुरो।।९७।।

विनीतेन प्रशान्तेन दूर्वाशेन तपस्विना।
विहितां प्रार्थनां श्रुत्वा मुमुदे हि महागुरुः।।९८।।

शुभं शीघ्रं प्रकर्तव्यमिति न्यायेन वै गुरुः।
संस्थाप्य कलशान् पञ्च पञ्चब्रह्ममयान् तदा।।९९।।

संपूज्य विधिवत्तान्हि संप्रोक्ष्य तज्जलेन च।
अङ्गलिङ्गे विशोध्यैव मुनिं दीक्षितवान् गुरुः।।१००।।

दूर्वाशो हि महातेजा लब्धदीक्षो गुरोः किल।
ज्ञानार्थं प्रार्थयामास येन कोपो लयं व्रजेत्।।१०१।।

प्रार्थनां तां समाकर्ण्य विश्वकर्णो महागुरुः।
ध्यात्वा क्षणं महादेवं साम्बमाह समाहितः।।१०२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मा भैषीः कोपशान्त्यर्थं ज्ञानं सुलभसाधनम्।
तज्ज्ञानं निहितं सूत्रे पञ्चवर्णाख्यके किल।।१०३।।

तत्त्वमस्यादिवाक्येन श्रुतौ यत् प्रतिपादितम्।
निहितं सर्वमेकस्मिन् सूत्रेऽस्मिन् पञ्चवर्णके।।१०४।।

प्रबोधनाय तत्सूत्रं शिवादेशादिहाऽभवम्।
भाग्यवान् हि भवानद्य मत्तः संश्रृणुते शुभम्।।१०५।।

शिव एवात्मकेस्मिन् वै सूत्रे पञ्चवर्णसमन्विते।
विशदं निहितं शास्त्रं शिवाद्वैतं महत्तरम्।।१०६।।

अल्पगात्रे महद् वृक्षं वटबीजे यथा स्थितम्।
तथा शास्त्रं शिवाद्वैतं सर्वमस्मिन् प्रतिष्ठितम्।।१०७।।

विश्वकर्णमुखोद्गीर्णं श्रुत्वा सूत्रं महत्तरम्।
जिज्ञासुस्तद्विशेषार्थं दूर्वाशःपृष्टवान् गुरुम्।।१०८।।

जिज्ञासामेतदीयां च लोककल्याणकारिणीम्।
श्रुत्वा च विश्वकर्णाख्यो गुरुराह समाहितः।।१०९।।

पदद्वयं हि सूत्रेऽस्मिन् विद्येते मुख्यतः खलु।
प्रथमः शिव एव स्यादात्मा च द्वितीयो मतः।।११०।।

अनयोः शब्दयोरत्र तत्वार्थो हि चिकीर्ष्यते।
तदा च तात्त्विको ह्यर्थःसूत्रस्य परिभाव्यते।।१११।।

अस्ति सच्चित्सुखाकारं निर्विकारं निरञ्जनम्।
परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवम्।।११२।।

अनादिमलसंश्लेषप्रागभावात् स्वभावतः।
अत्यन्तपरिशुद्धात्मा शिव इत्यभिधीयते।।११३।।

शिवतत्त्वं तदेवोक्तं सर्वतत्त्वशिरोगतम्।
शिवरुद्रमहादेव - भवादिपदसंज्ञितम्।।११४।।

अनादिमलशून्यत्वात् विशुद्धत्वात् स्वभावतः।
शिव इत्युच्यते शम्भुश्चिदानन्दघनः प्रभुः।।११५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिवमिच्छति जन्तूनां तस्माद्देवःशिवःस्मृतः।
दृष्टेस्तस्य समत्वाच्च शिव इत्यभिधीयते।।११६।।

सर्वज्ञत्वादिषण्णां च लोककल्याणकारिणाम्।
शिवानां सद् गुणानां च ह्यागारत्वाच्छिवःस्मृतः।।११७।।

शेतेऽस्मिन् प्रलये विश्वं मातुरङ्के शिशुर्यथा।
अत एव च तन्नाम शिव इत्यभिधीयते।।११८।।

आद्यक्षरेण वेदानां चतुर्णामपि सादरम्।
शिवशब्दो हि संसिद्धो ह्यतो वेदमयःशिवः।।११९।।

अयं शिवो हि जीवानां शरीरे ह्यात्मरूपतः।
वर्तते हि सदा योगिन् नास्ति नास्त्यत्र संशयः।।१२०।।

अत एवात्र सूत्रेऽस्मिन् एवशब्देन वै किल।
आत्मनःशिवरूपत्वं दृढेन प्रतिपादितम्।।१२१।।

एतत्तत्वमजानन्तो बहवोऽत्र विपश्चितः।
अनात्मन्यात्मबुद्ध्या च विवदन्ति परस्परम्।।१२२।।

शरीरमेव चात्मेति चार्वाकैरभिमन्यते।
इन्द्रियाणि हि चात्मेति तदन्यैःपरिभाष्यते।।१२३।।

बद्धितत्त्वगतैर्बौद्धैर्बुद्धिरात्मेति गीयते।
नेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत्।।१२४।।

अहंप्रत्ययवेद्यत्वमात्मनो हि सुलक्षणम्।
शरीरादिषु सर्वेषु लक्षणं तत्र लक्ष्यते।।१२५।।

ममप्रत्ययवेद्यत्वमेतेषु परिलक्ष्यते।
अतो नात्मत्वमेतेषां जानीहि मनिपुङ्गव।।१२६।।

नश्वराणि शरीराणि नानारूपाणि कर्मणा।
जायन्ते कर्मभोगाय म्रियन्ते च पुनः पुनः।।१२७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अस्तीत्यादिविकारैश्च सदा विक्रियते च यत्।
कथं तदात्मतत्त्वं स्यात् शरीरं भोगसाधनम्।।१२८।।

आध्यात्मिकेन दुःखेन पीड्यमानमहर्निशम्।
शरीरं कथमात्मा स्याद्विचारय महामुने।।१२९।।

भोगानां सुखदुःखानां साधनानीन्द्रियाणि च।
तेषामप्यात्मरूपत्वं कथंचिन्नैव शक्यते।।१३०।।

पञ्चानामेव भूतानां रजोभिश्च गुणैः किल।
पञ्चप्राणाःसमुद्भूता देहधारणकारणाः।।१३१।।

भूतानामेव पञ्चानां सात्विकैश्च गुणैः किल।
मनोबुद्ध्यादिकानां च ह्युत्पत्तिः प्रतिपादिता।।१३२।।

अतः प्राणादिकं सर्वं बुद्ध्यन्तं सर्वदेहिनाम्।
अनात्मत्वं हि विज्ञेयं सर्वदा च विवेकिभिः।।१३३।।

शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः।
अहं प्रत्ययवेद्यो यः स आत्मेत्यवधारय।।१३४।।

घटोपाधिर्यथाकाशः परिपूर्णः स्वभावतः।
तथा पिण्डस्थितो ह्यात्मा परिपूर्णः प्रकाशते।।१३५।।

पिण्डाण्डस्थो यथाकाशो महाकाशान्न भिद्यते।
पिण्डस्थितस्तथा ह्यात्मा परमात्मेति निःश्चिनु।।१३६।।

शिव एव परं तत्त्वं सच्चिदानन्दलक्षणम्।
तदीया परमा शक्तिः सच्चिदानन्दरूपिणी।।१३७।।

सृष्टिकाले च सा शक्तिरविद्यारूपतः खलु।
भूत्वोपाधिर्हि जीवानां जीवत्वं प्रददाति भोः।।१३८।।

अविद्याशक्तिभेदेन जीवा बहुविधाःस्मृताः।
अविद्यावशगा जीवा शिवैक्यज्ञानवर्जिताः।।१३९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वस्वरूपं शिवं चैव विस्मृत्याहर्निशं किल।
परिभ्रमन्ति संसारे निजकर्मानुसारतः।।१४०।।

अनाद्यविद्यया चैव सर्वजीवेषु वै किल।
भेदबुद्धिःसमुत्पन्ना सानादिरिति कीर्तिता।।१४१।।

शिवाज्जीवाच्च जीवस्य जीवाज्जडाज्जडस्य च।
जडादीशस्य विज्ञेया भेदाःपञ्चविधाः खलु।।१४२।।

भेदबुद्ध्यैव जायेते रागद्वेषौ महामुने।
सर्वानर्थकरौ प्रोक्तौ संसारद्रुमकारिणौ।।१४३।।

अथ सद्गुरुः मुनिं प्रोवाच— यथा इन्धनेन अग्नेः शान्तिः न सम्भवति तथा तपसा कोपो न शाम्यति! इन्धनेनाग्निरिव तपसा कोपो भवदीयः समेधते। कोपस्य कारणं प्रधानम्— अज्ञानमेव-तस्य विनाशः तपसा नैव सम्भवति। ज्ञानेन अज्ञानं नश्येदिति यत्र निहितं ज्ञानं तत् सूत्रमिदानीं शृणोतु– पञ्चवर्णमिति। तत्त्वमसि अहंब्रह्मास्मि, प्रज्ञानं ब्रह्म, अयमात्मा ब्रह्मेति यत् महावाक्यचतुष्टयं राजते तदीयं सर्वं रहस्यमात्मसात्कुरुते पञ्चवर्णमिति सूत्रम्। एतत्सूत्रतात्पर्यार्थमवबोधयितुमहमत्र भवदन्तिकं समागतोऽस्मि। भवताम् भवदाश्रितानां च कल्याणकारीदं सूत्रमिति निश्चिनु। पुनश्चाह सद्गुरुः— शिवाद्वैतप्रतिपादकस्य तन्त्रागमशास्त्रस्य सकलं रहस्यमेकस्मिन् सूत्रेऽस्मिन् विलसतीति। वटबीजे महद् वृक्षवत् अल्पीयसि पञ्चवर्णमिति सूत्रे आगममहाद्रुमः समाहितो विद्यते। प्रवृद्धायां शुश्रुषायां सद्गुरुः सूत्रार्थरहस्यमुद्घाटयन् व्याख्यातवान्-सच्चिदानन्द स्वरूपः प्रपञ्चोत्तीर्णः अपरिच्छिन्नः महादेवः शिवरुद्रभवादिपदवेद्यः अनादिः निर्मलः जन्तूनां कल्याणप्रदः सर्वज्ञत्वादि समुल्लसितः "मातुः क्रोड शिशुरिव प्रत्यये यस्मिन् विश्वं सानन्दं शेते" इति शिवः— इत्येवं व्युत्पत्त्या शंसितः जयति। चतुर्णां वेदानाम् आद्येन अक्षरेण शिव शब्द संसिद्ध्या शिवस्य वेदमायता बोध्या। परमतत्त्वरूपस्य शिवस्य शक्तिः सच्चिदानन्दलक्षणा जयति। शिवे सिसृक्षायां समुदिता यां तदीया शक्तिः अविद्यात्मना उपाधिना जीवे जीवत्वमादधाति। अविद्याशक्ति भेदाद् बहुविधा इमे जीवा अविद्यावशंवदाः शिवैक्यज्ञानशून्या भवन्ति। अविद्या अनादिः तथा जीवेषु भेदबुद्धि रुत्पद्यते। सोऽयं भेदः पञ्चाविधः— १. शिवाद् जीवस्य भेदः २. जीवाद् जीवस्य भेदः ३. जीवाद् जडस्य भेदः ४. जडाद् जडस्य भेदः ५. जडाद् ईश्वरस्य मुदेश्चेति। भेदबुद्धेः रागद्वेषयो रुत्पत्तिः। आभ्यां रागद्वेषाभ्यां जीवस्य संसारिता उत्पद्यते।।८९-१४३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अज्ञानं हि तयोर्मूलं ज्ञानं तस्य निवर्तकम्।
तदर्थं गुरुमाश्रित्य ज्ञानमेव समभ्यसेत्।।१४४।।

गुरोरनुग्रहेणाथो शास्त्राभ्यासबलेन च।
ज्ञानमेव समभ्यस्येत् किमन्येन प्रयोजनम्।।१४५।।

शिवाख्ये परमे तत्त्वे निर्गुणे चित्सुखात्मनि।
आत्मैकत्वानुसन्धानं ज्ञानमित्युच्यते बुधैः।।१४६।।

शिवज्ञानेन पुंसां हि जन्मरोगो निवर्तते।
तज्ज्ञानं सुलभं प्रोक्तं योगिनां ज्ञानचक्षुषाम्।।१४७।।

विना दीपं हि गेहस्थो नान्धकारो निवर्तते।
तथा चित्तस्थमोहोऽपि विना ज्ञानं महामुने।।१४८।।

पुरःस्थानि च वस्तूनि यथान्धो नैव पश्यति।
ज्ञानहीनस्तथा जीवो नात्मस्थं वीक्षते शिवम्।।१४९।।

शिवाद्वैतस्य विज्ञानमपवर्गस्य कारणम्।
भावयन् सततं योगी संसारेण न लिप्यते।।१५०।।

रागद्वेषौ विजानीहि संसारपरिवर्धकौ।
तयोरेव निवृत्त्यर्थं शिवज्ञानं समाश्रयेत्।।१५१।।

सर्वबीजेषु सर्वत्र ह्यङ्कुरो वर्तते यथा।
तथा जीवेषु सर्वेषु शिवः सन्निहितः सदा।।१५२।।

स्वात्मरूपेण सर्वेषु संस्थितं हि शिवं किल।
परागिन्द्रियजीवात्मा नैव जानाति कश्चन।।१५३।।

हेतवोऽत्र मलानीति प्रवदन्ति विपश्चितः।
तानि च त्रिप्रकाराणि कीर्तितानि महामुने।।१५४।।

आणवं प्रथमं प्रोक्तं मायीयं च द्वितीयकम्।
कार्मणं च तृतीयं स्यात् मलान्येतानि वै शृणु।।१५५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इच्छाज्ञानक्रियाभिख्या ईश्वरस्था हि शक्तयः।
संकोचं प्राप्य जीवेषु मलरूपेण संस्थिताः।।१५६।।

तत्रेच्छाशक्तिसंकोचादाणवाख्यं मलं स्मृतम्।
तेनावृतो हि जीवोऽयमपूर्णं स्वं हि मन्यते।।१५७।।

ज्ञानशक्तेस्तु संकोचाद् मायीयं मलमुच्यते।
भिन्नवेद्यप्रथारूपं तत्स्वरूपं प्रचक्षते।।१५८।।

तन्मलावरणेनैव सर्वत्र भेददर्शनः।
रागद्वेषैर्हि युक्तोऽयं संसारे संसरत्यसौ।।१५९।।

क्रियाशक्तेस्तु संकोचात् कार्मणं मलमुच्यते।
तत् प्रोक्तं वासनारूपं शुभंचाशुभरूपकम्।।१६०।।

कार्मणेन मलेनैव वासनाप्रेरिताःखलु।
जीवाः कुर्वन्ति कर्माणि शुभाशुभमयानि च।।१६१।।

भेदबुद्धिरूपाद् ज्ञानाद् जायमानाभ्यां रागद्वेषाभ्याम् क्लेशप्रदः संसारः परमं दुःखं जन्मजराद्यात्मा। अज्ञानस्य निवृत्त्यैव दुःखोपशमः सम्भवति। ज्ञानमेव अज्ञानं निवर्तयेदिति अज्ञान निवृत्त्यै ज्ञानमेवाभ्यसेत्। ज्ञानं नाम चिदात्मनिशिवे आत्मैकत्वानुसन्धानम्। एनेन शिवात्मैक्यज्ञानेन रागद्वेषनिवृत्तिपुरःसरं जन्मजरादि संसार दुःखमपि निवर्तते। ज्ञानमिदं ज्ञानचक्षुषां सुलभम्। ज्ञानं विना मोहात्मककमज्ञानं नैव नश्यति। ज्ञानहीनो जनः आत्मस्थं शिवं द्रष्टुं न क्षमः। शिवाद्वैतज्ञानम् संसारान्मोचयति। यथा बीजमात्रे अंकुरः सन्निहितः तथा जीवमात्रे शिवः सन्निहितः। त्रिविधैः मलैरावृतस्य जीवस्य आत्मतया स्थितोऽपि शिवः न प्रकाशते। ईश्वरस्य इच्छाशक्तिः संकुचिता आजवं मलं, तेन जीवः स्वस्मिन्नपूर्णत्वमभिमन्यते। ज्ञानशक्तिः संकुचिता मायीयं मलम्, तच्च भिन्नवेद्यप्रथा रूपं भवति। अनेनावृतः जीवः सर्वत्र भेदं पश्यन् राजद्वेषयुतः संसारी संजायते। क्रियाशक्तिः संकुचित। कार्मणं मलं, तच्च शुभाशुभकर्मवासनास्वरूपम्, अनया वासनया शुभाशुभकर्मसु जीवानां प्रवृत्तिः।।१४४-१६१।।

जीवत्वं चैव जीवानां मलकल्पितमीदृशम्।
निरस्यते गुरोर्बोधाज् ज्ञानशक्तिः प्रकाशते।।१६२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मलानां हि निवृत्त्यर्थं दीक्षा प्रोक्ता महामुने।
वेधा मान्त्री क्रिया चेति सा दीक्षा त्रिविधा मता।।१६३।।

गुरोरालोकमात्रेण हस्तमस्तकयोगतः।
यःशिवत्वसमावेशो वेधा दीक्षेति सा मता।।१६४।।

अनया दीक्षया चैव निःसार्य ह्याणवं मलम्।
गुरुणा बोध्यते भावलिङ्गं तत्सोहमात्मकम्।।१६५।।

मान्त्री दीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी।
प्राणलिङ्गप्रदा चैव मायामलनिकृन्तिनी।।१६६।।

कुण्डमण्डलिकोपेता क्रिया दीक्षा क्रियोत्तरा।
इष्टलिङ्गप्रदा चैव वासनानां निकृन्तिनी।।१६७।।

एवं दीक्षात्रयेणैव दग्धेऽनादिमलत्रये।
परिशुद्धे भवेज्जीवे प्रस्फुटा भक्तिरैश्वरी।।१६८।।

सा भक्तिःषड्विधा प्रोक्ता शिवागमविशारदैः।
आद्या श्रद्धा द्वितीया च निष्ठेति प्रोच्यते किल।।१६९।।

अवधाना तृतीया च ततो ह्यनुभवाभिधा।
आनन्दाख्या ततः प्रोक्ता षष्ठी समरसा स्मृता।।१७०।।

एता भक्तीः समालम्ब्य भक्तादिषट्स्थलेषु च।
साधनातत्परो योगी सामरस्यमवाप्नुयात्।।१७१।।

सामरस्ये समापन्ने भेदाः पञ्चविधाः समे।
समूलं विलयं यान्ति सर्वं शिवमयं भवेत्।।१७२।।

स्वात्मरूपं शिवं यस्तु सर्वत्रानुभवेद्यतः।
न तस्य जायते रागो द्वेषो वा मत्सरोऽपि वा।।१७३।।

देवस्य जीवत्वं मलकल्पितमेव। सद्गुरोः दीक्षां प्राप्तस्य उदितायां ज्ञानशक्तौ अज्ञानरूपं मलं नश्यति। दीक्षा त्रिविधा— १. वेधादीक्षा २. मान्त्रीदीक्षा ३. क्रियादीक्षाचेति। गुरोः दृष्टिपातेन हस्तमस्तकसंस्पर्शेन वा यः शिवत्वसमावेशः सा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वेधादीक्षा। वेधा दीक्षया आणवे मले विनष्टे सोऽतगित्येवमात्मकं भावलिङ्गः गुरूणा प्रबोध्यते। सेयं मन्त्रोपदेशिनी मान्त्रीदीक्षा प्राणलिङ्गप्रदानपुरःसरं मायामलं निकृन्त ति। यातु कुण्डमण्डलसापेक्षा क्रियादीक्षा सा इष्टलिङ्गप्रदा वासनां छिनत्ति। अनया कार्ममलं क्षीयते। अनादीनां त्रिविधानां मलानां त्रिविधेन दीक्षा विधिणा दाहात् परिशुद्धे जीवे ईशभक्तिः प्रस्फुरति। सैषा भक्तिः षोढ़ा— १. श्रद्धाभक्तिः २. निष्ठाभक्तिः ३. अवधानभक्तिः ४. अनुभवभक्तिः ५. आनन्दभक्तिः ६. समरसाभक्तिश्चेति। षड्विधाः भक्तीरिमाः समवलम्ब्य भक्तसाधकः षट्सु भक्तस्थलप्रभृतिषु साधनया शिवसामरस्यमुपैति। सामरस्य मवाप्तस्य भक्तसाधकस्य प्रसिद्धाः पञ्चभेदाः समूलं नश्यन्ति। परिणामतः साधकः सर्वं शिवमयं पश्यति। सर्वत्र स्वात्मरूपं पश्यतः रागो द्वेषो मत्सरोवा सर्वथा विलुप्तो भवति॥१६२-१७३॥

रागद्वेषादयो भावाः संसारक्लेशकारिणः।
तेषामुपरमो यत्र तत्र भावः शिवात्मकः॥१७४॥

शिवभावे स्थिरे जाते निर्लेस्य महात्मनः।
ये ये भावाःसमुत्पन्नास्ते ते शिवमयाः स्मृताः॥१७५॥

शिव एव जगत्सर्वं शिव एवाहमित्यपि।
भावयन् सततं योगी रागद्वेषैर्न बाध्यते॥१७६॥

शिव एवात्मकं सूत्रं शिवाद्वैतप्रबोधकम्।
विस्तरेण गुरोः श्रुत्वा पुनराह समाहितः॥१७७॥

अद्य मे सफलं जन्म गतो मे क्रोधविप्लवः।
ज्ञातवान् त्वत्प्रसादेन ज्ञानं क्रोधस्य नाशकम्॥१७८॥

क्रोधशान्त्यै भृशं पूर्वं तपस्तप्तं मयाऽनघ।
अथाप्ययं महाक्रोधो वर्धमानो दिने दिने॥१७९॥

तव ज्ञानप्रबोधेन शिव एवात्मकेन च।
मूलाऽज्ञानं लयं यातं सर्वभेदस्य कारणम्॥१८०॥

भेदबुद्धेर्हि नाशेन द्वेष्मि कं प्रीणयामि वा।
अतोऽहं पूर्णरूपेण शान्तोऽस्मि भो गणाधिप॥१८१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इतः परं मया देव कर्तव्यं किं प्रबोधय।
यावज्जीवं गुरोर्नूनं तवाज्ञां पालयाम्यहम्।।१८२।।

दूर्वाशस्य वचः श्रुत्वा विश्वकर्णो जगद्गुरुः।
शान्तं मुनिवरं दृष्ट्वा बभाषे ह्यादिशन्निव।।१८३।।

शिव एवात्मकं सूत्रं पञ्चवर्णात्मकं किल।
प्रसार्यतां त्वया लोके लोककल्याणहेतवे।।१८४।।

रागद्वैषौ बृहद् - दोषौ पुनर्जन्मकरौ श्रुतौ।
ताभ्यां द्वाभ्यां विमुक्तश्च मुक्तस्थाणुरिव स्थितः।।१८५।।

इह लोके जना ये त्वां श्रद्धया समुपासते।
पञ्चवर्णं महासूत्रं प्रबोध्य तान् समुद्धर।।१८६।।

आनन्दकानने काश्यां महाबैल्ववने शुभम्।
ज्ञानसिंहासनं पीठं कृते संस्थापितं मया।।१८७।।

द्वापरान्तं हि तत्रैव निवसामि महामुने।
स्वेच्छया पुनरागत्य शृणुष्व शास्त्रविस्तरम्।।१८८।।

इत्युक्त्वा पश्यतस्तस्य व्योममार्गेण वै किल।
ज्ञानं सिंहासनं पीठं ह्याजगाम क्षणान्तरे।।१८९।।

शिवादेशानुसारेण विश्वकर्णो महागुरुः।
पञ्चवर्णाख्यकं सूत्रं प्रबोध्य सकलान् जनान्।।१९०।।

युगान्ते पुनरागत्य विश्वनाथस्य मन्दिरम्।
प्रार्थयामास देवेशं शङ्करं लोकशङ्करम्।।१९१।।

देवदेव महादेव जगत्प्राथमकारण।
त्वदाज्ञावशगोऽभूवं पञ्चवर्णप्रबोधकः।।१९२।।

युगान्तसमयः प्राप्तः कृतकृत्योऽस्मि साम्प्रतम्।
वीरशैवमहाधर्मं भुवि स्थापितवानहम्।।१९३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इतः परं न कर्तव्यमवशिष्टं महीतले।
अतोऽहं प्राप्तुकामोऽस्मि त्वत्स्वरूपं महाप्रभो।।१९४।।

भक्त्या चैवार्द्रभावेन स्तावकं श्रीगणेश्वरम्।
दृष्ट्वा तृप्तो महादेवः प्राह साम्बः सदाशिवः।।१९५।।

वत्साऽगच्छ महाभाग प्रीतोऽस्मि तव कर्मणा।
इत्युच्चैर्गदिते शम्भौ पुष्पवृष्टिर्बभूव ह।।१९६।।

विश्वेश्वरालये चैवं सम्पश्यत्सु गणेश्वरम्।
लिङ्गे विश्वेश्वरे तत्र प्राविशद् विश्वकर्णकः।।१९७।।

एवं गणेश्वरेणैव द्वापरे स्थापितःखलु।
वीरशैवमहाधर्मः शाश्वतः संबभूव ह।।१९८।।

तदेवं शिव एवात्मा इत्येवमर्थसमर्पकं शिवाद्वैतप्रबोधकं पञ्चवर्णमिति सूत्रं यदुपदिष्टं दुर्वाशः तेन ज्ञानेन अज्ञानं सर्वविधो भेदः रागो द्वेषः क्रोधो मोहश्चेति तत्कार्यसहितं नष्टमिति प्रहृष्टमनाः कर्तव्यं कर्म गुरुं पृष्टवान्। श्री विश्वकर्णः सद्गुरुः प्राह— "शिवएवात्मा" इत्येतद्पञ्चवर्णकं यत्सूत्रं तदेव व्याख्यानप्रवचनादिना सर्वत्र भूलोके प्रचारय प्रसारयचेति। श्रीगुरुः दूर्वाशमाह— मया कृत ये श्रीकाश्यां तावदानन्दकानने महाबैल्ववने ज्ञानसिंहासनपीठं यत् स्थापित मासीत् तत्रैव द्वापरान्त महं स्थास्यामि-स्वेच्छया तत्रागत्य शास्त्र विस्तरं ज्ञानं प्राप्तुं काले काले समागच्छेद् भवानिति।।१७४-१९८।।

## हिन्दी तात्पर्य

## भगवत्पाद विश्वकर्ण द्वारा महर्षि दूर्वाश को पंचकर्ण-महासूत्र का उपदेश

श्री काशी पुण्यपुरी में विश्वेश्वर लिङ्ग से प्रकट पूज्य जगद्गुरु श्री विश्वकर्ण महास्वामी ने पंचवर्णसूत्र का निष्पादन किया था। आपका प्राकट्य माघ कृष्ण चतुर्दशी शिवरात्रि महापर्व में निशीथ वेला में हुआ था। प्राकट्य का मुख्य उद्देश्य श्री शिवाद्वैत का प्रतिष्ठापन था। एक बार श्रीकाशी-महाराजा दिवोदास जी शिवदर्शनार्थ विश्वेश्वर मंदिर पधारे थे। उस प्रसंग में शिवाचार्य श्री विश्वकर्ण दिव्य तेजस्वी महानुभाव का उन्होंने दर्शन किया प्रणामपुरस्सर उन्होंने राजप्रासाद में आने

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



को निमंत्रित किया। अनुज्ञा प्राप्ति के अनंतर आंदोलिका एवं बाद्य संभार के साथ स्वागत करते हुए श्री गुरुदेव को रानी के साथ पूजा करते हुए पुण्यात्मा महाराजा ने गुरुदेव से दीक्षा प्राप्त की, इष्टलिङ्ग प्राप्त की, प्राप्त मंत्र को शिरोग्राह्य किया। गुरुदेव ने आनंदकानन महाबिल्ववन में ज्ञानसिंहासन पीठ की स्थापना वीर शैव धर्म की प्रचार हेतु की थी। ऐसे ज्ञान सिंहासनपीठ में समय-समय पर उपस्थित होकर सेवा करने की आज्ञा प्रदान कर सद्गुरु विश्वकर्ण शिवाचार्य व्योममार्ग से दुर्वासा के आश्रम पहुँचे।

दिव्य सद्गुरु को उपस्थित होने पर दुर्वासा जी ने ऊँचे आसन पर बिठाकर स्वयं उनके समक्ष नीचे के आसन में विराजमान हो गए। दुर्वासा जी की माँ और पिता तप:पूत थे तथा स्वयं दुर्वासा जी अकिंचन आस्तिक एवं संतुष्ट तपस्वी थे। ऐसी स्थिति में इन्हें किसी प्रकार का विघ्न कैसे हो सकता था। दुर्वासा जी का जो प्रभाव है जिसके कारण देवेन्द्र श्रीहीन होने को विवश हुए। कुन्ती और माद्री को दिव्य पुत्रों की प्राप्ति हुई। श्रीकृष्ण का शरीर वज्रमय बना। ऐसे कथा-प्रसंग को सद्गुरु ने दुर्वासा के समक्ष स्थापित किया पर दुर्वासा जी इस प्रशंसा वचन को सुन बहुत लज्जित हुए। कारण यह है कि अपनी प्रशंसा का श्रवण करना तथा दूसरों की निंदा करना नरक की ओर धकेलते हैं।

तपस्वी होने पर भी रजोगुण-प्रकोप से आप्लुत दुर्वासा लोगों को श्राप देते थे और भक्तभावुकों को भी डराते थे। अत: उनके मन में एक आशंका थी, कहीं कोप दुर्गुण के कारण उन्हें नरक जाना पड़ता अथवा चांडाल योनि मिलती। इसीलिए उन्होंने सद्गुरु से क्रोध दुर्गुण को हटाने का उपाय पूछा। सद्गुरु ने मुनि से बताया इंधन की आपूर्ति से अग्नि शांत नहीं होती तदवत् तपश्चर्या करने से कोप शांत नहीं होता है। मुने इंधन से अग्नि की तरह तप से आपका कोप भी बढ़ता है। समाधान यह है कि कोप का कारण अज्ञान है। उसका विनाश तपस्या से संभव नहीं, अज्ञान तो ज्ञान से ही नष्ट होता है। अत: ज्ञानप्राप्ति के लिए मैं आपको एक सूत्र निर्मित कर प्रदान करता हूँ। यह सूत्र है— पञ्चवर्णम। इस सूत्र में श्रुति के चार महावाक्यों का रहस्य भरा है—

(१) प्रज्ञानं ब्रह्म

(२) अयमात्मा ब्रह्म

(३) तत्वमसि

(४) अहं ब्रह्मास्मि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आपके लिए और आपके आश्रित जनों के लिए पञ्चवर्णसूत्र कल्याणकारी है। शिवाद्वैत का प्रतिपादन करने वाले आगमशास्त्र का सम्पूर्ण रहस्य इस सूत्र में सुघटित है जैसे वट वृक्ष में महान वटवृक्ष सूक्ष्म रूप से विद्यमान रहता है। उसी तरह अत्यंत छोटे पञ्चवर्णसूत्र में आगम का महावृक्ष समाहित है। भगवान महादेव प्रपंच से ऊर्ध्व प्रतिष्ठित हैं, अपरिच्छिन्न हैं, सच्चिदानन्द स्वरूप हैं। आपके लिए शिव, रूद्र, भव, भैरव इत्यादि हजारों हजार नाम प्रयुक्त होते हैं, जिन्हें भक्त एवं ज्ञानी शिरोधार्य करते हैं। सभी जन्तुओं के कल्याणकारी सर्वज्ञान एवं सर्वकतृत्व से उल्लसित शिव सर्वदेवों के भी वंदनीय हैं। जैसे माँ की गोद में बच्चा बैठता है, उस तरह से प्रलयकाल में संपूर्ण विश्व भगवान शिव में आनंदपूर्वक शयन कर जाता है। शेते सर्वंजगद्यस्मिन् इति शिव: चारों वेदों के प्रथम चार अक्षरों से शिव शब्द की निष्पत्ति होती है। अत: शिव वेदमय हैं। परमतत्व स्वरूप शिव की शक्ति भी सच्चिदानन्दस्वरूप ही है। शिव में सिसृक्षा उत्पन्न होने पर उनकी शक्ति अविद्या रूप से उपाधि के द्वारा जीव में जीवत्व का आधान करती हैं। अविद्या शक्ति के भेद होने से जीव बहुत-बहुत प्रकार के हैं और अविद्या के वशीभूत हैं। परिणामस्वरूप शिवैक्य का ज्ञान उन्हें नहीं हो पाता। अनादि अविद्या के द्वारा जीवों में भेद बुद्धि उत्पन्न होती है। यह भेद पाँच प्रकार की है—

(१) शिव से जीव का भेद

(२) जीव से जीव का भेद

(३) जीव ले जड़ का भेद

(४) जड़ से जड़ का भेद

(५) जड़ से ईश्वर का भेद

भेद बुद्ध से राग-द्वेष की उत्पत्ति होती है। राग और द्वेष से जीव संसारी जीवन में फँसता है। भेदबुद्धि रूप से उत्पन्न होने वाले राग-द्वेष के कारण जन्म, जरा, आदि दु:खों से व्याप्त संसार, जीवों को क्लेश प्रदान करता है। अज्ञान की निवृत्ति से ही दु:ख का शमन संभव है। ज्ञान ही अज्ञान का निर्वतक है। अत: अज्ञान निवृत्ति हेतु ज्ञान का अभ्यास करना चाहिए। चिदात्मा भगवान शिव में आत्मैकत्व का संधान करना ज्ञान कहलाता है। इस शिवाभेद ज्ञान द्वारा अज्ञान निवृत्ति सहित राग, द्वेष, जन्म, जरा एवं सकल दु:ख की निवृत्ति हो जाती है। ज्ञान के बिना अज्ञानमोह कभी भी नष्ट नहीं हो सकता। ज्ञानहीन मानव आत्मस्थ

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शिव को जान नहीं सकता। शिवाद्वयबोध संसार में मुक्ति दिलाता है। वस्तुस्थिति यह है अंकुर अथवा वृक्ष बीज में ही सन्निहित रहकर अपने विकसित स्वरूप में प्रकट होता है। त्रिविध मलों से आवृत्त जीव के आत्मारूप से शिव प्रतिष्ठित है फिर भी अज्ञानी को प्रकाशित नहीं होते। ईश्वर की इच्छाशक्ति ही संकुचित होकर आणवमल बनती हैं। उससे जीव निजरूप में अपूर्णता का अभिमान करता है। तदवत् ज्ञानशक्ति संकुचित होकर मायीय मल कहलाती है, जिससे वेद्य वस्तु भिन्न रूप से प्रथित होती है। इस मायीय मल से आवृत पशु सभी जगह भेद को देखता हुआ राग और द्वेष से संयुत होकर संसारी बन जाता है। क्रियाशक्ति संकुचित होकर कार्म मल बन जाती है, यह शुभ और अशुभ कर्मवासना रूप है। इस मल से जीवों की प्रवृति शुभ अथवा अशुभ कर्म में होती है। जीव की बद्धरूपता मलकल्पित है। सद्गुरु से दीक्षा प्राप्त साधक की ज्ञानशक्ति पूर्णतया उदित होती है और अज्ञानमल नष्ट हो जाता है। दीक्षा तीन प्रकार की है— (१) वेधा (२) मान्त्री (३) क्रिया।

दीक्षा द्वारा त्रिविध मलों के नष्ट हो जाने पर परिशुद्ध जीव के अंत:करण में शिवभक्ति उदित होती है। यह ६ प्रकार की होती है—

(१) श्रद्धा भक्ति (२) निष्ठा भक्ति

(३) अवधान भक्ति (४) अनुभव भक्ति

(५) आनंद भक्ति (६) समरसा भक्ति

इनके द्वारा भक्त साधक, षड्विध भक्तस्थल आदि में साधना से शिव सामरस्य को प्राप्त होता है। सामरस्य प्राप्त भक्त साधक के प्रसिद्ध पाँच भेद नष्ट हो जाते हैं। अत: साधक सर्वशिवममय की दृष्टि प्राप्त कर लेता है। सर्वत्र स्वात्मरूप को देखते हुए साधक के राग, द्वेष, मात्सर्य सर्वथा नष्ट हो जाते हैं। पाँच वर्णों वाला पञ्चमसूत्र है— "शिव एवात्मा" इस सूत्र के अर्थबोध को गुरुमुख से प्राप्त कर साधक योगी दुर्वासा को परिपूर्ण आत्मज्ञान उदित हो गया। इस ज्ञान से अज्ञान नष्ट हो गया। अत: दुर्वासा प्रसन्न होकर अपने कर्तव्य कर्म की जिज्ञासा व्यक्त की। सद्गुरु ने उन्हें आदेश दिया, इस सूत्र का व्याख्यान प्रवचन कर भूलोक में प्रचार-प्रसार करें तथा काशी ज्ञान सिंहासन पीठ में मैं द्वापरान्त स्थित रहूँगा वहाँ शास्त्रज्ञान की जिज्ञासा से आप हमारे ज्ञानपीठ में पधारते रहें।

।।इति अष्टमाध्याय:।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ नवमाध्यायः ॥

## श्रीरम्भापुरीपीठस्य कलियुगीनमैतिह्यम्

प्रायेणाऽल्पायुषःप्रोक्ताः कलौ सर्वेऽपि जन्तवः।
मन्दाः सुमन्दमतयो धर्ममार्गबहिष्कृताः।।१।।

एवं धर्मक्षयं लोके दृष्ट्वा च परमेश्वरः।
गणानाहूय तान् पञ्चह्यादिदेश महाप्रभुः।।२।।

कलिकालःसमारब्धो ह्यधर्मस्ताण्डवायते।
पुनर्भवद्भिर्गन्तव्यं धर्मसंस्थापनाय च।।३।।

पञ्चाननसमादेशात् पञ्चाचार्याःपुनर्भुवि।
कलौ प्रादुर्बभूवुस्ते लिङ्गपञ्चकतः खलु।।४।।

रेणुको हि गणश्रेष्ठः कुल्यपाकपुरोत्तमे।
नाम्ना रेवणसिद्धेन लिङ्गात् प्रादुर्बभूव ह।।५।।

फाल्गुने शुक्लपक्षे च त्रयोदश्यां तिथौ किल।
रेवणोऽवतरत् तत्र सोमेशाल्लिङ्गतस्तदा।।६।।

तन्त्रमन्त्रेषु संसिद्धो रेवणः सिद्धशेखरः।
भूमौ चचार वर्षाणि चतुर्दशशतानि च।।७।।

एतावत् कालपर्यन्तं प्रान्तेषु विविधेषु च।
राज्ञः प्रजाश्च सर्वाश्च दीक्षया तान् समुद्धरन्।।८।।

वीरशैवमहाधर्मं वेदवेदान्तसम्मतम्।
सुप्रतिष्ठं पुनश्चक्रे रेवणो हि महागुरुः।।९।।

तदा देशे च सर्वत्र गणपस्य महीतले।
प्रश्रुता धवला कीर्तिः रेवणस्य महात्मनः।।१०।।

श्री रम्भापुरीपीठस्य कलियुगीनम् ऐतिह्यं संचिन्वन्तः श्रीचन्द्रशेखरशिवाचार्याः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



दशभिः कारिकाभिः कलौ भगवता शिवेन कैलासतः पञ्च गणान् भूमौ लिङ्गपञ्चकतः प्रादुर्भवितुं यद् आदिष्टं, यश्च तेषु सोमेशलिङ्गतः पूर्वरेणुकाभिधानः रेवणसिद्धनाम्ना कुल्यपाकपुरोत्तमे प्रादुर्भूतः चतुर्दश शतानि वर्षाणि सप्रजान् राज्ञः समुद्धरन् सुकीर्तिमाप तत्सर्वं विस्तरेण प्रत्यपादयन् प्रायेणेत्यादिना॥१-१०॥

रेवणस्य महाकीर्तिं श्रुत्वा चैवादिशङ्करः।
दर्शनेप्सुस्तदा तत्र शृङ्गेरीक्षेत्रतः किल॥११॥

शिष्यैः समं समागत्य पीठं तद्वीरसंज्ञकम्।
ददर्श योगिनं तत्र रेवणं सिद्धशेखरम्॥१२॥

समागतं महाचार्यं शङ्करं लोकशङ्करम्।
रेवणो हि महाचार्यो स्वागतं व्याजहार ह॥१३॥

भद्रपीठे ह्युपावेश्य चादिशङ्करमादरात्।
पप्रच्छ कुशल-प्रश्नान् रेवणो हि महागुरुः॥१४॥

साङ्गान् वेदान् भवान् वेत्थ वर्षे चैवाष्टमे किल।
षोडशे कृतवान् भाष्यान् सद्यस्त्वं मुनिरभ्यगाः॥१५॥

कृतकृत्यो भवानद्य सफलं तव जीवितम्।
यावज्जीवं च कर्तव्यं लोककल्याणमेव च॥१६॥

भवादृशानां सिद्धानां प्रवृत्तिर्निष्फला कथम्।
अतो ब्रूहि तवेच्छां मां लोककल्याणकारिणीम्॥१७॥

अथ श्रुतरेवणसत्कीर्तिः आदिशङ्करः शिवाचार्यं द्रष्टुकामः शृङ्गेरीक्षेत्रतः सशिष्यः वीरपीठसमासीनं श्रीरेवणशिवाचार्यम् उपगम्य ददर्श। तमेनं स्वागतसत्कारकुशलप्रश्नैः भद्रपीठम् आरोह्य आगमनप्रयोजनं पप्रच्छ शिवाचार्यः—

"लोककल्याणकारिणीं स्वाभिमतिं जिज्ञासां वा प्रतिपादयत्विति"॥११-१७॥

प्रणम्य शिरसा देवं सिद्धं तं रेवणं गुरुम्।
शङ्करो हि महाज्ञानी पप्रच्छ विनयान्वितः॥१८॥

जगद्व्याप्तं हि यद्ब्रह्म सच्चिदानन्दलक्षणम्।
शक्यं चेदर्चितुं बाह्ये तद् बोधय विधिं च मे॥१९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शङ्करेण कृतां तां च प्रार्थनां रेवणो गुरुः।
श्रुत्वा च शान्तया वाचा प्रत्युवाचादिशङ्करम्।।२०।।

वेदान्ते ब्रह्मशब्देन यत्तत्त्वमभिधीयते।
तदेव लिङ्गशब्देन ह्यागमेषु निगद्यते।।२१।।

अपरिच्छिन्नमव्यक्तं लिङ्गं ब्रह्म सनातनम्।
उपासनार्थं तल्लिङ्गमन्तास्त्रिस्थानगोचरम्।।२२।।

भ्रूमध्यं हृदयं वापि मूलाधारमितिस्फुटम्।
अन्तःस्थानानि कथ्यन्ते योगिगम्यानि तानि च।।२३।।

आधारे कनकप्रख्यं हृदये विद्रुमप्रभम्।
भ्रूमध्ये स्फटिकच्छायं लिङ्गं तद्भावयेत् सुधीः।।२४।।

निरुपाधिकमाख्यातं लिङ्गस्यान्तरभावनम्।
विशिष्टं कोटिगुणितं बाह्यलिङ्गस्य पूजनात्।।२५।।

अन्तःपूजयितुं लिङ्गमशक्तःशक्त एव वा।
बाह्यं तु पूजयेन्नित्यं तद्रूपमितिनिश्चयात्।।२६।।

गुरोरादेशमासाद्य पूजयेल्लिङ्गमैश्वरम्।
लिङ्गे सम्पूजिते चैव पूजिताः सर्वदेवताः।।२७।।

न यथा विधिलोपः स्याद्यथा देवः प्रसीदति।
यथागमः प्रमाणं स्यात् तथा पूजां समाचरेत्।।२८।।

शिवस्यैव नियोगो हि विधिरित्यभिधीयते।
अनुसृत्य विधिं तस्मात् पूजयेल्लिङ्गमैश्वरम्।।२९।।

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दया क्षमा।
दानं पूजा जपो ध्यानमिति धर्मस्य संग्रहः।।३०।।

एते धर्मा महाभाग शिवेन विहिताः किल।
तस्मात्तानाचरन् धर्मान् तत् प्रसादाय कल्प्यते।।३१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आगमोक्तेषु धर्मेषु सत्याऽहिंसादिकेषु च।
प्रधानो धर्म इत्युक्तः श्रीलिङ्गार्चनसंज्ञकः।।३२।।

अन्तर्ध्यायन् महालिङ्गमिष्टं बाह्ये समर्चयन्।
स्वाचारानाचरन् लोके लोकवन्द्यो भविष्यति।।३३।।

ज्ञानामृतेन तृप्तोऽपि ज्ञानी धर्मं न सन्त्यजेत्।
आचारं ज्ञानिनां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः।।३४।।

धर्म एव समस्तानां सिद्धीनां मूलकारणम्।
निःस्पृहोऽपि महाज्ञानी धर्ममार्गं न सन्त्यजेत्।।३५।।

अधर्मं न स्पृशेत् किञ्चिद्विहितं धर्ममाचरेत्।
तञ्च कामविनिर्मुक्तं तमपि ज्ञानपूर्वकम्।।३६।।

ज्ञानहीनं सदा कर्म प्रतिबध्नाति मोक्षकम्
ज्ञानयुक्तं हि तत्कर्म संसारविनिवर्तकम्।।३७।।

ज्ञानी कर्मनिरूढोऽपि लिप्यते न क्रियाफलैः।
घृतादिना यथा जिह्वा भोक्त्री चापि न लिप्यते।।३८।।

रेवणेनोक्तवाक्यानि श्रुत्वा चैवादिशङ्करः।
प्रसन्नहृदयो भूत्वा ह्यब्रवीद्रेवणं गुरुम्।।३९।।

ब्रह्मतत्त्वं मया ज्ञातमात्मरूपेण निश्चयम्।
अथापि ह्युत्कटा मेऽस्ति पूजनेच्छा महाप्रभो।।४०।।

भूमौ वा भक्तदेहे वा लिङ्गस्य स्थापना-विधौ।
भवन्तो हि गणाः पञ्च शिवेनाधिकृताःखलु।।४१।।

तदर्थं दीयतां मह्यं लिङ्गमेकं महोज्ज्वलम्।
यत्पूजनेन मे तृप्तिः परां काष्ठामवाप्नुयात्।।४२।।

शङ्करस्य वचः श्रुत्वा रेवणो गणनायकः।
तथेति ह्यभयं दत्त्वा ह्यागमोक्तविधानतः।।४३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मण्डले स्थापयित्वा च पञ्चब्रह्ममयान् किल।
सम्पूज्य विधिना सोह्लयं कलशान् हि महागुरुः।।४४।।

तेनोदकेन तत्रैव लिङ्गं तच्चन्द्रमौलिकम्।
रत्नगर्भं गणेशं च ह्यभिषिच्य गुरुः स्वयम्।।४५।।

तत्र प्राणान् प्रतिष्ठाप्य महामन्त्रपुरःसरम्।
चन्द्रमौलीश्वरं लिङ्गं गणेशं रत्नगर्भकम्।।४६।।

दत्त्वा च शङ्करार्याय पूजाविधिमबोधयत्।
चरलिङ्गमिदं प्रोक्तं त्रिसन्ध्यं पूजयेदिदम्।।४७।।

नित्यो विधिरयं प्रोक्तः प्रमादो न भवेत् क्वचित्।
अतो लिङ्गं हि नेतव्यं यत्र वा गम्यते त्वया।।४८।।

पीठेऽथ वा बहिर्देशे लिङ्गं सर्वत्र पूजयेत्।
सिंहासने शुद्धे रम्ये प्रोज्ज्वले रत्नचित्रिते।।४९।।

चन्द्रमौलीश्वरं लिङ्गं नित्यं संस्थाप्य पूजयेत्।
शिष्यप्रशिष्यरूपेण पारम्पर्येण वै किल।।५०।।

अखण्डं हि भवत्वस्य पूजा तन्नित्यमेव च।
गुरोः संबोधनं श्रुत्वा चन्द्रमौलीश्वरं तथा।।५१।।

मवाप्यासौ सगणेश मुमुदे लोकशङ्करः।
तदा श्रीशङ्करो भक्त्या प्रणम्य च महागुरुम्।।५२।।

यथाऽदिष्टं त्वया देव तथैव पालयाम्यहम्।
इति भक्त्या प्रतिज्ञाय सशिष्यः शङ्करस्तदा।।५३।।

प्रत्याजगाम शृङ्गेरीं तुङ्गातटनिवासिनीम्।
श्रृङ्गेरीशारदापीठे लिङ्गं तच्चन्द्रमौलिकम्।।५४।।

संस्थाप्य वैभवेनैव राजितं मण्डपे शुभम्।
अर्चयच्छङ्कराचार्य आगमोक्तविधानतः।।५५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**अद्यापि तन्महापूजा शङ्करार्य - मठे किल।**
**परम्परागताचार्यैः क्रियते प्रत्यहं शिवम्।।५६।।**

महाज्ञानी आचार्यशङ्करः सविधि जगति व्याप्तस्य विभोः ब्रह्मणः अर्चाविधिः कः इतीमां जिज्ञासाम् उपशमयितुं श्रीरेवणशिवाचार्यं प्रार्थितवान्। प्रार्थितः शिवाचार्यः प्राह भगवत्पादंब्रह्मलिङ्गशब्दाभ्यां प्रत्युपेयं तत्त्वं-मूलाधारे कनकप्रख्यं, हृदये विद्रुमप्रख्यं, भ्रूमध्ये तु स्फटिकप्रभं, इत्येवं त्रिधा समुपासयन् साधकः आन्तरोपासनवत् बाह्योपासनया शक्नोति सुतरामात्मसात्कर्तुम्।

लिङ्गशब्दावाच्यस्य ब्रह्मणः आन्तर भावनं बाह्यपूजनात् कोऽपि गुणितं विशिष्टं भवति, अथाऽपि यः जनः अन्तःपूजां कर्तुं शक्तः अशक्तो वा भवेत् तस्यापि कृते नित्यं बाह्यपूजनम् आवश्यकं भवति। यतश्च शिवस्य नियोगात्मकं वचः विधिः भवति अतः विधिमनुसरन् ईशलिङ्गपूजनम् अत्यावश्यकम्। शिवेन विहिताः धर्माः— अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यं, दया, क्षमा, दानं, पूजा, जपः ध्यानञ्चेति प्रोच्यन्ते। एतान् धर्मान् यः आचरति तेन शिवप्रसादः लभ्यते। एषु धर्मेषु श्रीलिङ्गार्चनं प्रधानो धर्मः। आन्तरध्यानपुरःसरं बाह्यलिङ्गम् अर्चयन् आचारानुष्ठानकृत् ज्ञानी सन्नपि लोकसङ्ग्रहाय धर्माचरणं कुर्यात्। कामविनिर्मुक्तं ज्ञानयुक्तं कर्म संसारविनिवर्तकं सत् मोक्षाय कल्पते। श्रीरेवण शिवाचार्यात् उपर्युक्तं वाक्यं श्रावं श्रावम् आदिश्करः प्रसन्नहृदयः सन् पूजनेच्छया उज्ज्वलं लिङ्गं गणेशं च विधिवत् प्राणप्रतिष्ठापुरःसरं पूजाविधिप्रबोधनपूर्वकं प्रदत्तवतः सम्प्राप्य यथानिर्देशं सगणेशं चन्द्रमौलीश्वरं लिङ्गम् आगमोक्तिविधानतः शृङ्गेरीशारदापीठे पूजां समारभत। अयापि शङ्कराचार्यमठे प्रत्यहं परम्परागताचार्यैः लिङ्गपूजा विधीयते।।१८-५६।।

## ।।वरदराजशिरःस्तम्भनलीला।।

**रेवणो हि महायोगी लोककल्याणहेतवे।**
**बोधयन् धर्मतत्त्वानि लीलयाऽसंचरत् किल।।५७।।**

**कांश्चिद् दृष्टिनिपातेन कांश्चित् संबोधनेन च।**
**स्पर्शनेनैव चान्यान् स उद्धरन्नाचचार ह।।५८।।**

**एकदा संचरन् योगी विष्णुकाञ्चीं समागतः।**
**उन्मत्तलीलया तत्र प्रतिवीथिवीथ्यां चचार ह।।५९।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तदीयाचरणं दृष्ट्वा बालाश्च तरुणास्तथा।
चेष्टया पीडयामासुर्गणपं रेवणं गुरुम्।।६०।।

एकदा बालकैस्तस्य रेवणस्य शिरस्यधात्।
प्रहारं चाश्मभिर्जातं व्रणितं तेन मस्तकम्।।६१।।

तदा स रेवणो योगी लीलयन्मूर्छितोऽभवत्।
अनेनैवापराधेन काञ्च्यां विष्णोश्च वै तदा।।६२।।

शिरःकम्पनमारब्धं चकिताश्च पुरोहिताः।
कर्णाकर्णिकया वार्ता काञ्च्यां सर्वत्र विश्रुता।।६३।।

सैषा वार्ता क्षणार्द्धेन ग्रामे ग्रामे गृहे गृहे।
अनर्थं भावयन्तस्ते भयभीताः समे जनाः।।६४।

तदा सर्वेऽपि शीघ्रेण गत्वा तं चोलभूपतिम्।
अनर्थं घटितं सर्वं विस्तरेण न्यवेदयन्।।६५।।

वार्तां श्रुत्वा च भूपालो मनसा विह्वलेन च।
गत्वा स विदुषां पार्श्वे पर्यपृच्छदुपायकम्।।६६।।

विदुषां च विचारेण कृतोपायोऽपि भूपतिः।
न समर्थोऽभवत् स्तब्धुं शिरःकम्पनमेव च।।६७।।

तस्य स्वप्ने च रात्रौ हि समागत्य शिवस्तदा।
उक्त्वा च घटितं सर्वं राजानमिदमब्रवीत्।।६८।।

रेवणो हि महायोगी सञ्चरन् भूतले किल।
तथैव च महद्भाग्यात् पुरीं काञ्चीं समागतः।।६९।।

भैक्षुकेणैव वेषेण ह्यटन्तं शिवयोगिनम्।
अनभिज्ञाय तानज्ञा अपचारपराः खलाः।।७०।।

प्रहारेणास्मभिश्मस्य शिरोभग्नं समाचरन्।
अतो वरदराजस्य शिरः - कम्पनमीदृशम्।।७१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अनादरो हि भक्तानां परमानर्थकारणम्।
आयुःश्रियं कुलं कीर्तिं निहन्ति हि शरीरिणाम्।।७२।

मम प्रतापमतुलं मद्भक्तानां विशेषतः।
अतःकेनापि लोकेऽस्मिन् नापराधो भवेत् तथा।।७३।।

मम भक्तमवज्ञाय मार्कण्डेयं पुरा यमः।
शिक्षितो मत्त्रिशूलेन कथं विस्मर्यते त्वया।।७४।।

मद्भक्तस्य भृगोरेव विष्णुः कृत्वा ह्यनिष्टकम्।
दशयोनिषु संजन्य महद्दुःखमवाप्तवान्।।७५।।

अश्वमेधान् बहून् कृत्वा दक्षःकिल प्रजापतिः।
भक्तानामवमानेन मेषवक्त्रोऽभवत् पुरा।।७६।।

दधीचेन च भक्तेन कृत्वा युद्धं जनार्दनः।
भग्नायुधस्तदा भूत्वा पराभवमुपागमत्।।७७।।

एवमेव जनाः पूर्वं मद्भक्तानवमन्य च।
परिभूता हताश्चासन् भक्ता मे दुरतिक्रमाः।।७८।।

अतो हि रेवणं गत्वा क्षमां तं प्रार्थयन्मुहुः।
तदीयामृतहस्तेन कम्पनं तन्निवार्यताम्।।७९।।

स्वप्ने कृतं शिवादेशं श्रद्धया पालयन् प्रभुः।
रेवणस्यान्तिकं गत्वा ययाचे श्रद्धया मुहुः।।८०।।

अविचार्य कृतं पापं क्षमस्व नो गणेश्वर।
प्रभोर्वरदराजस्य वारयत्वथ कम्पनम्।।८१।।

राज्ञो विनयमाकर्ण्य रेवणो हि महाप्रभुः।
कारुण्यदृष्टिपातेन सर्वानाश्वासयन् जनान्।।८२।।

मन्दिरं हि समागत्य स्पृष्ट्वा तन्मस्तकं तदा।
स्तम्भितं कृतवान् तस्य मस्तकस्य प्रकम्पनम्।।८३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कम्पनं स्तम्भितं दृष्ट्वा सप्रजो हि महाप्रभुः।
योगिनो रेवणस्यैव ह्याचचार महोत्सवम्।।८४।।

उत्सवानन्तरं योगी रेवणो हि महाप्रभुः।
शिवाद्वैतं सुसंबोध्य सर्वान् संतोषयन् बभौ।।८५।।

श्री रेवणशिवाचार्यः लोककल्याणार्थं पर्यटन् धर्मतत्त्वं प्रबोधयन् दृष्ट्या स्पर्शेन बोधनेन लोकान् उद्धरति स्म। यदा असौ विष्णुकाञ्चीं गतः उन्मत्तलीलां कुर्वन् चचार तदा बालाः तरुणाः अपि स्वचेष्टया तस्मै पीडाचरणम् आरब्धवन्तः। केनचिद् बालेन अश्मभिः शिरसि प्रहारे कृते व्रणितः शिवाचार्यः लीलाविधौ मूर्च्छितः अभवत्। तदनेन अपराधेन काञ्च्यां श्रीविष्णुविग्रहे आरब्धे शिरःकम्पे पुरोहिताः ग्रामीणः भयभीताः सन्तः चोलभूपतिम् उपसृत्य निवेदितवन्तः। विद्वद्भ्यः पृष्टोपायः राजा आचरितोपायः अपि शिरःकम्पस्तम्भे असमर्थः किंकर्त्तव्यविमूढो अतिष्ठत। अथ रात्रौ स्वप्ने दत्तदर्शनः शिवः महाेगिनः श्रीरेवणगुरोः काञ्च्याम् आगमनम् उन्मत्तलीलां बालप्रहारेण तदीयशिरोभग्नं तदपराधेन वरदराज भगवतः शिरः कम्पनम् अत्र निवसताम् आयुः श्रियं कुलं कीर्तिं च हन्यात् इत्येवं राजानं प्रबोधितवान्। भकतानां विशिष्य शिवभक्तानाम् अनादरः महते अनर्थाय कल्पते। मार्कण्डेयं प्रति यमस्य अपराधः, भृगुं प्रति विष्णोः अपराधः, शिवभक्तं प्रति दक्षस्यापराधः, दधीचं प्रति जनार्दनस्यापराधः, अपराधिनं पराभवेन योजितवान् इति लोकेषु शास्त्रेषु च प्रथितम्। शीघ्रं त्वं मम भक्तं श्रीरेवणशिवाचार्यं उपसृत्य तच्चरणयोः पतित्वा क्षमां सम्प्रार्थ्य तदीयेनैव अमृतहस्तस्पर्शेन वरदराज भगवतः शिरःकम्पं निवारयितुम् अर्हसि। भूपालेन शिवादेशं शिरसि कृत्य श्रीरेवणं सम्प्रसाद्य श्रद्धया मन्दिरमानीय शिरःकम्पनं स्तम्भयितुं प्रार्थितवान्। स्पर्शमात्रेण श्रीविष्णुशिरःकम्पनस्तम्भनं विहितवतः श्रीरेवणाचार्यः शिवाद्वैतं प्रबोध्य सर्वान् विनीतान् सन्तोष्य स्वलीलाम् उपसंहृतवान्।।५७-८५।।

## ।।मत्कुणवेषधारिराक्षससंहारलीला।।

एवं च रेवणो योगी लीलां कुर्वन् महीतले ।
नगरीं मासनूराख्यामाजगाम जगद्गुरुः।।८६।।

तत्रासीन्मन्दिरं दिव्यं देवदेवस्य शूलिनः।
ग्रामादनतिदूरे च भीमायाःपावने तटे।।८७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तत्रस्थोपवने चासीद्वटवृक्षं महत्तरम्।
दम्पती रक्षसां तत्रासाते वट-महत्तरे।।८८।।

दिवा मत्कुणरूपेण वसन्तौ तौ च दम्पती।
रात्रौ राक्षसरूपेण निर्दयाचरणेन तु।।८९।।

आगतान् मन्दिरे रात्रौ भक्षयन्तौ तु तिष्ठतः।
अतस्तन्मन्दिरे रात्रौ न निवासस्तु कस्यचित्।।९०।।

सन्ध्यापूजां समाप्यैव ह्यर्चको मन्दिरस्य च।
गृहं प्रस्थातुमैच्छद् यद् रेवणस्तत् समागतः।।९१।।

आगन्तं योगिनं दृष्ट्वा नत्वा तं ह्यर्चकस्तदा।
वार्तां तां रक्षसः कृत्वा विनयेन न्यवेदयत्।।९२।।

अत्र वासो न कर्तव्यो भवता गणनायक।
रात्रावत्रास्ति भीतिर्हि राक्षसात् सा महाप्रभो।।९३।।

अतो ग्रामं समागत्य कृत्वा पूजादिकं तथा।
बोधयित्वा जनान् सर्वान् त्रायस्व ग्रामवासिनः।।९४।।

अर्चकस्य वचः श्रुत्वा ह्युवाच गणनायकः।
मृत्युञ्जयो हि मे त्राता मृत्युर्मे किं करिष्यति।।९५।।

दम्पत्योरनयोस्तावद् अवसानक्षणोऽधुना।
पश्यतु प्रातरागत्य मल्लीलावैभवं शिवम्।।९६।।

वचांसि रेवणस्यैवं श्रुत्वा स ह्यर्चकस्तदा।
चिन्तयन् देवदेवं च जगाम ग्रामकं स्वकम्।।९७।।

अर्चके च गते ग्रामे रेवणो योगिनां वरः।
प्रविश्य मन्दिरं तत्र ध्यानमग्नो बभूव ह।।९८।।

स्वस्थं च परिपुष्टं च ध्यानमग्नं च रेवणम्।
दृष्ट्वा तौ दम्पती तुष्टौ पक्वान्नं स्वयमागतम्।।९९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



राक्षसौ तावुभौ रात्रौ त्यक्त्वा मत्कुणवेशकम्।
परिधाय विराड्रूपं रेवणं भक्षितुं किल।।१००।।

सहसाऽऽक्रान्तवन्तौ तौ क्रुद्धः श्री रेवणो गुरुः।
पश्यन् संधर्षयन सद्यो ददाह चक्षुषाग्निना।।१०१।।

दाहस्य पीडया तौ च चक्रतुर्मेघ-गर्जनम्।
सशब्दं पतितौ वृक्षात् लौहखण्डस्व रूपतः।।१०२।।

तृतीयेन च नेत्रेण रेवणस्य महात्मनः।
दग्धौ तौ राक्षसौ भूतौ बृहद्लौहस्य खण्डकौ।।१०३।।

आकाशे ध्वनितं शब्दं मेघवद्गर्जितं किल।
श्रुत्वा पौरजनाःसर्वे क्षणे मन्दिरमागताः।।१०४।।

तत्काले राक्षसौ तौ च धृत्वा गन्धर्वरूपकम्।
प्रार्थयन्तौ गुरुं सम्यक् क्षमस्वेत्याहतुर्मुहुः।।१०५।।

गन्धर्वदम्पती चावां कामासक्तौ पुरा किल।
उद्याने च सुरम्येऽत्र कामकेलिमहर्निशम्।।१०६।।

कुर्वन्तौ च बहोः कालादुषित्वात्रैव हे प्रभो।
पवित्रे मन्दिरोद्याने कामासक्तौ बभूविव।।१०७।।

योगिना केनचिद् दृष्ट्वा शपताऽऽवांहि तत्क्षणम्।
प्रापितौ राक्षसीं योनिं हीनां क्लेशकरीमिमाम्।।१०८।।

भीतौ विह्वलचित्तौ च प्रार्थयामासतुर्भृशम्।
अज्ञानेन कृतं पापं क्षमस्व परमेश्वर।।१०९।।

दयार्द्रो हि तदा योगी वीक्ष्माणोऽब्रवीद् वचः।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।।११०।।

अतो हि राक्षसौ भूत्वा यावद्रेवणदर्शनम्।
तावत् कर्मफलं भुक्त्वा कर्मबन्धं प्रहास्यतः।।१११।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तच्छापवचनादेव घोरकर्मफलं किल।
एतावत् कालपर्यन्तमन्वभूव भुवि प्रभो।।११२।।

अद्य त्वत्कृपया चैव ह्यभूच्छापस्य मोचनम्।
इत्युक्त्वा दम्पती तौ हि गतौ गन्धर्वलोककम्।।११३।।

योगिना रेवणेनैव राक्षसौ तौ हतौ किल।
सुमहत् संकटात् तस्माद् ग्रामोऽस्माकं तु रक्षितः।।११४।।

इति तुष्टाः शिवाचार्यं नत्वा श्रीरेवणं मुहुः।
भक्त्या सम्प्रार्थयामासुर्योगिनं शिवयोगिनम्।।११५।।

भगवन् को भवानस्ति पप्रच्छुरेककण्ठतः।
तदा स रेवणो योगी ह्युक्तवान्सदृशं वचः।।११६।।

पार्श्ववर्ती शिवस्याऽहं रेवणो गणनायकः।
धर्मसंस्थापनार्थाय शिवादेशादिहाऽभवम्।।११७।।

शिवेनैवोपदिष्टोऽस्ति वीरशैवः सनातनः।
यद्दीक्षया नरःसद्यो मुक्तिमेति न संशयः।।११८।।

माहात्म्यं वीरशैवस्य श्रुत्वा सर्वे जनास्तदा।
सम्प्रार्थ्य रेवणं सर्वे तेनैव दीक्षिताः खलु।।११९।।

रेवणो ह्यतितेजस्वी ह्यादायलोहखण्डकौ।
खड्गौ शुभ्रौ विनिर्माय नद्यामेकं व्यसर्जयत्।।१२०।।

अवशिष्टं सुतीक्ष्णं च द्वितीयं खड्गमुत्तमम्।
विक्रमादित्यराज्ञे स निरचैषीद् ददाम्यहम्।।१२१।।

श्रीरेवणसद्गुरुः लीलापरायणः चोलदेशात् मानसूरनगरीं जगाम। तत्र भीमानद्याः तटे देवदेवस्य मन्दिरात् एकस्मिन् उपवने वटवृक्षः आसीत्। तत्र राक्षसदन्तकी निवसन्तौ दिवा मत्कुणरूपेण रात्रौ तु प्रकटराक्षसरूपेण मन्दिरे समागतान् भक्षयन्तौ तिष्ठतः स्म। यदा मन्दिरस्य अर्चकः सन्ध्यापूजां विधाय मन्दिरात् गृहं प्रस्थातुम् इच्छति तदा समागतं श्रीरेवणगुरुं रक्षसः वार्तां श्रावयित्वा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



रात्रिवासं प्रतिषेधितवान्। अर्चकवचः श्रुत्वा मृत्युञ्जयरक्षितः गणेश्वरः नास्ति मे मृत्युभयम् प्रत्युत राक्षसयोरेव अवसानकालः समागतः इत्येवमुद्घोषं विधाय मन्दिरस्याभ्यन्तरे ध्यानमग्नः समजायत। अथ परिपुष्टं ध्यानमग्नं पक्वान्नमिव दृष्ट्वा हृष्टो दम्पती सहसा मत्कुणवेषं विहाय विकरालराक्षसो भूत्वा रेवणं भक्षितुम् आक्रमणं कृतवन्तौ। महायोगी अग्निनेत्रेण तयोर्दाहं सद्यः विहितवान्। दाहपीडया मेघगर्जनं कुर्वन्तौ तौ राक्षसौ बृहद् लौहखण्डौ भूत्वा वृक्षात् भूमौ पतितवन्तौ। यदा मेघवद् गर्जनं श्रुत्वा पौरजनाः मन्दिरम् आगतवन्तः तस्मिन् काले धृतगन्धर्वरूपौ क्षमस्व इति प्रार्थनावचः प्रयुञ्जानौ लोकैः दृष्टौ। इमौ गनधर्वदम्पती मन्दिरे तदीये उद्यानप्राङ्गणे च मन्दिरविरुद्धं कामकेलिकर्मकुर्वन्तौ केनचिद् योगिना अभिशप्तौ राक्षसीं योनिं प्राप्तवन्तौ। अथ भीताभ्यां ताभ्यां प्रार्थितः योगी यावद् रेवणदर्शनं कर्मफलं भोक्तुम् आदिशत्, श्रीरेवणकृपया शापमोचनं प्राप्तवद्भ्यां ताभ्यां मुहुर्मुहुः सवजनसमक्षं सच्चरणयोः प्राणिपातपुरःसरं प्राप्तगुरुशुभाशिषौ गन्धर्वलोकं जग्मतुः। तदनन्तरं रेवणयोगिना निवारितकष्टाः जनाः ज्ञातवन्तः एष गणनायकः शिवादेशात् धर्म संस्थापनाय भुवि समागतः इति। श्रीरेणुकगुरोः आगमनस्य मुख्यम् उद्देश्यं सनातनवीरशैवधर्मस्य उपदेशः अस्तीति विज्ञाय सर्वे जनाः श्रद्धया तस्माद् गुरोः शैवधर्मदीक्षामवाप्य मोदमानाः श्रीरेवणं पूजितवन्तः। लीलावपुः श्रीरेवणगुरुः राक्षसलोहखण्डाभ्यां खड्गौ निर्माय एकं नद्यां विसृज्य अपरं खड्गं विक्रमादित्यराज्ञः कृते रक्षयामास॥८६-१२१॥

## ।।विक्रमादित्याय खड्गप्रदानम्।।

तत्रत्यसर्वभक्तेभ्यो धर्मतत्त्वं प्रबोध्य च।
उत्थाय व्योममार्गेण ह्यागतोऽवन्तिकां पुरीम्।।१२२।।

योगिनं ह्यागतं ज्ञात्वा तूज्जयिन्या महाप्रभुः।
विक्रमादित्यराजा तु स्वागतं व्याजहार ह।।१२३।।

प्रासादे तत्र वै दिव्ये रत्नसिंहासने खलु।
योगिनं तं ह्युपावेश्य परिवारसमन्वितः।।१२४।।

सपत्नीको महाराजः पूजां तत्पादयोस्तदा।
विधिना वैभवेनैव भक्त्या विहितवान् खलु।।१२५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**तत्कृतेनादरेणैव प्रसन्नो रेवणो गुरुः।**
**स्वप्रसादस्वरूपं तत्खड्गं प्रादान्महामनाः॥१२६॥**

**राजन् खड्गेन दिव्येन पराक्रमविधायिना।**
**शिष्टान् संरक्षयानेन दुष्टानां निग्रहं कुरु॥१२७॥**

**शस्त्रं सद्गुरुणा दत्तं गृहीत्वा विनयेन च।**
**आदेशं पालयामीति राजा वचनमब्रवीत्॥१२८॥**

**खड्गस्यास्य प्रभावेण विक्रमो विश्वकीर्तिमान्।**
**शशासावन्तिका - राज्यमिन्द्रवदलकां पुरीम्॥१२९॥**

**ततः स रेवणो योगी वटक्षेत्रस्थितं किल।**
**सद्धर्मपीठमागत्य सिद्धेन मरुलेन च॥१३०॥**

**उषित्वा च बहोः कालाच् चर्चयित्वा शिवागमान्।**
**सत्कृतो मरुलेनैव प्रस्थानं कृतवान् गुरुः॥१३१॥**

व्योममार्गेण अवन्तिकां प्राप्तं गुरुम् उज्जयिनीसम्राट् विक्रमादित्यः सपरिवारः स्वप्रासादे रत्नसिंहासने उपावेश्य पूजितवान्। अथ श्रीरेवणाद् गुरोः प्रसादस्वरूपम् अद्भुतं तत्खड्गं प्राप्तवान्। शिष्टानां रक्षणं, दुष्टानां निग्रहं च कर्तुम् आदिष्टः विक्रमादित्य; तथैव कुर्वन् अलकापुरीम् इव अवन्तिकां शशास कीर्तिं च प्राप्त। श्रीरेवणगुरु; वटक्षेत्रस्थितं सद्धर्मपीठं सम्प्राप्य सिद्धेन मरुलेन साकं बहुकालं यावत् शिवागमधर्मचर्चां विधाय मरुलेन सत्कृतः महाराष्ट्राय प्रस्थितवान्॥१२२-१३१॥

## ॥गोरक्षस्य गर्वहरणम्॥

**चरन् भिन्न-प्रदेशेषु ह्युद्धरन् सकलान् जनान्।**
**प्राप प्रान्ते महाराष्ट्रे लक्ष्मीदेव्याःपुरीं किल॥१३२॥**

**कोल्हापुरं हि तत्प्रोक्तं करवीरं तथैव च।**
**तत्रास्ति शक्तिपीठं च महालक्ष्म्याः शुभङ्करम्॥१३३॥**

**तत्र स्थिता महालक्ष्मीर्लिङ्गं धृत्वा तु मस्तके।**
**माहात्म्यं शिवलिङ्गस्य बोधयत्येव निश्चितम्॥१३४॥**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गोरक्षो हि महाराजः शशास तां पुरीं खलु।
मन्त्रतन्त्रेषु संसिद्धो दुष्टचित्तो दुराग्रही।।१३५।।

पालकःसन् प्रजानां च पीडादायी बभूव ह।
कुलस्त्रियश्च तत्रत्या बभूवुर्मानवर्जिताः।।१३६।।

मन्त्रिणो मान्त्रिका यत्र प्रजारक्षा कथं भवेत्।
गोरक्षपुर्यां गोरक्षः प्रजानां भक्षकोऽभवत्।।१३७।।

अतः प्रतिदिनं सर्वे गोरक्षस्य कुशासनात्।
भीतभीताश्च संत्रस्ताः शिवं हि शरणं ययुः।।१३८।।

अत्रान्तरे महायोगी रेवणो गणनायकः।
भिक्षुकेनैव वेषेण प्राविशन्नगरं किल।।१३९।।

ग्रामे कोल्हापुरे तत्र ह्यटन् योगी गृहे गृहे।
प्रासादमगमद्योगी राज्ञो गोरक्षकस्य च।।१४०।।

स्थित्वा तस्य महाद्वारे भिक्षां देहीति चाब्रवीत्।
भिक्षुकस्यारवं श्रुत्वा क्रुद्धो गोरक्षकस्तदा।।१४१।।

धर्मपत्नीं समाहूय खड्गं दत्वा च तत्करे।
छेद्यौ तद्याचकस्यैव हस्तावित्यादिदेश ह ।।१४२।।

भीत भीता महाराज्ञी लक्कमाम्बा पतिव्रता।
आगत्य च महाद्वारे नत्वा पादौ सुयोगिनः।।१४३।।

प्रार्थयन्ती विनीता सा राज्ञी वचनमब्रवीत्।
गोरक्षो हि महाराजो धर्ममार्गाद् बहिर्गतः।।१४४।।

तन्त्रमन्त्रसमायुक्तो सदा पापरतः किल।
विस्मृतातिथ्यधर्मोऽसौ हस्तौ च्छेतुं हि मां किल।।१४५।।

खड्गं दत्त्वाऽऽदिशत् क्रूरो प्रार्थये त्वां महागुरो।
भर्तुर्मे भावना दुष्टा तं क्षमस्व महाप्रभो।।१४६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इत्युक्त्वाऽभ्यधिकं प्रदत्तं स्वामिना दृढम्।
खड्गं सुयोगिहस्ते तं भक्त्या न्यधापयद् भृशम्।।१४७।।

रेवणस् तत्क्षण सद्यो दृष्टिपातेन खड्गकम्।
लौहाद् रसं विनिर्माय पीतवान् योगशक्तितः।।१४८।।

एवं भिक्षाटनांलीलां कृत्वा श्री रेवणो गुरुः।
मन्दिरं स महालक्ष्म्याः प्राप विश्रान्ति-हेतवे।।१४९।।

उदरं रेवणस्यैव प्रविष्ट तद्रसः किल।
खड्गो भूत्वा पुनश्चैव राज्ञो ह्युदरमाविशत्।।१५०।।

खड्गाघातेन गोरक्षो परया पीडया युतः।
आक्रन्दन् रक्ष रक्षेति शय्यायां पतितस्तदा।।१५१।।

राज्ञो ह्याक्रन्दनं श्रुत्वा राजवैद्या हि तत्क्षणे।
उपचारान् बहून् कृत्वा बभूवुर्निष्फला हि ते।।१५२।।

लक्कमाम्बा तदा राज्ञी लक्ष्मीं तां कुलदेवताम्।
स्वीयसौभाग्यरक्षार्थं प्रार्थयन्ती न्यवेदयत्।।१५३।।

भो भो देवि महालक्ष्मि ह्यस्माकं कुलरक्षिका।
गोरक्षं रक्ष हे मातः कण्ठस्खलितजीवितम्।।१५४।।

लक्कमाम्बाकृतां तां च प्रार्थनां भक्तिपूर्विकाम्।
श्रुत्वा प्राह महालक्ष्मीर्नैतद् मद्वशगं किल।।१५५।।

रेवणो हि महायोगी गोरक्षेण तिरस्कृतः।
अपराधेन तेनैव नृपतिः प्राप दुर्दशाम्।।१५६।।

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।
अतो गुरुवरं गत्वा सेव्यतामात्मशुद्धये।।१५७।।

अपराधं स्वकं ज्ञात्वा राजा गोरक्षकस्तदा।
योगिनो रेवणस्यैव सत्वरं शरणं गतः।।१५८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भिक्षुकं क्षुद्रकं मत्वा ह्यपराधो मया कृतः।
क्षन्तव्यो मेऽपराधो हि ब्रुवन्नेवं मुहुर्मुहुः।।१५९।।

मत्समः पातकी नास्ति त्वत्समो नास्ति पापहा।
अतो निःसार्य पापानि मामुद्धर जगद्गुरो।।१६०।।

दयनीयां स्थितिं दृष्ट्वा राज्ञो गोरक्षकस्य च।
दयार्द्रो रेवणो योगी खड्गं निःसार्य तत्क्षणे।।१६१।।

पुनर्जीवं प्रदायैव प्रोवाच स महागुरुः।
राजन् हि मानवं जन्म सुराणामपि दुर्लभम्।।१६२।।

दुर्लभं मानुषं प्राप्य जननं ज्ञानसाधनम्।
ये न जानन्ति देवेशं तेषामात्मा निरर्थकः।।१६३।।

बहूनि ते व्यतीतानि वर्षाण्येवायुषःकिल।
अवशिष्टेषु वर्षेषु धर्ममार्गं समाचर।।१६४।।

धर्म एव समस्तानां दुःखानां शमनौषधम्।
तस्माद्धर्मामृतं पीत्वा सुखी भव सदा किल।।१६५।।

एवं धर्मं प्रबोध्यैव रेवणो हि महागुरुः।
तेषामिच्छानुसारेण सुदीक्षत् सकलान् नरान्।।१६६।।

प्राणेष्टभावलिङ्गानां विधानं धारणस्य च।
पूजायाः पद्धतिं चैव सर्वान् स समबोधयत्।।१६७।।

राज्ञा प्रजाजनश्चापि पूजितो हि महागुरुः।
लोककल्याणकार्यार्थमगमच्चरजङ्गमः ।।१६८।।

महाराष्ट्रां समागतः श्री रेवणयोगी कोल्हापुरं करवीरं शक्तिपीठमवाप्य ददर्श— महालक्ष्मीः स्वशिरसि शिवलिङ्गम् इष्टधिया धारयन्ती शिवलिङ्गमाहात्म्यं प्रबोधन्ती राराजते। तत्र गोरक्षः शासकः दुष्टचित्तः अभिचारतन्त्रेण प्रजानां पीडाकरः कुलस्त्रीणां मानभङ्गं करोति स्म। प्रस्तेषु भीतेषु च प्रजाजनेषु शरण्यं शिवं प्राप्तेषु रेवणमहायोगी तदीयनगरे प्रविश्य कोल्हापुरे ग्रामे प्रतिगृहं पर्यटन् गोरक्षस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रासादद्वारा भिक्षा देहीति प्रोक्तवान्। भिक्षुकशब्दं श्रुत्वा क्रुद्धः गोरक्षः राजा धर्मपत्नीं खड्गकरां विधाय याचकस्य हस्तौ छेत्तुमादिदेश। भीता पतिव्रता लक्कमाम्बा योगिनः पादौ नत्वा गोरक्षस्य आज्ञां तस्मै निवेध खड्गं भिक्षुहस्ते अर्पितवती। स्वनेत्र तेजसा सद्यः खड्गं लौहरसं विधाय पीतवान् योगी मालक्ष्म्याः मन्दिरे विश्रामाय व्रतस्थे। रेवणस्य उदरात् निर्गतः तद्रसः खड्गो भूत्वा राज्ञः उदरं प्राविशत्। खड्गाघातपीडया आक्रन्दन् गोरक्षः शय्यायां पतितः। राजवैद्याः सर्वे निष्फलाः अभूवन्।

राज्ञा प्रार्थिता कुलदेवता महालक्ष्मीः शिवे रुष्टे गुरुस्त्राता इति उद्घोष्य रेवणशरणं राजा गच्छेद् इति आदिष्टवती। अथ शरणागतं गोरक्षं दयार्द्रः रेवणः खड्गं निःसार्य पुनर्जीवनं प्रदाय मानुषजन्मनः साफल्यं धर्माचारपुरःसरं शिवात्मैक्यप्राप्तिरेवेति उपदिदेश। राजा गोरक्षः गुरुणा अनुगृहीतः स्वस्थः प्राणेष्टभावलिङ्गानां धारणस्य पूजायाः पद्धतेश्च विधानं विज्ञाय श्रद्धावान् पूजन-परायणः तोषम् अवाप। प्रजाभिः सह राज्ञा अपि सम्पूजितः जङ्गमः शिवाचार्यो गुरुः लोककल्याणकर्तुं देशात् देशान्तरं जगाम॥१३२-१६८॥

## ॥सुग्गलाम्बायै सन्तानाशीर्वादः॥

भटाः शिष्या जनाः श्रेष्ठं श्रीरेवणंगुरुम्।
उपावेश्यादरेणैव मेनायां प्रस्थितास्ततः॥१६९॥

मार्गमध्ये बहून् ग्रामान् विटादिप्रमुखान्किल।
लङ्घयित्वा समागच्छन् पुरं सोल्लापुरं किल॥१७०॥

सोल्लापुरस्य क्षेत्रस्य सीम्न्ययं हि महागुरुः।
मेनातश्चावतीर्यैव भूमिं स्पृष्ट्वा ननाम यत्॥१७१॥

जगत्पूज्यः स्वयं भूत्वा ह्यवनेर्नमनं कुतः।
इति पृष्टो महायोगी जनैर्विस्मितमानसैः॥१७२॥

रेवणो हि क्षणं ध्यात्वा देवदेवं त्रियम्बकम्।
उवाच शान्तया वाचा जनान् विस्माययन् किल॥१७३॥

शिवो ह्यवतरत्यत्र योगिरूपेण वै किल।
अतो हि नगरं चैतद् भूकैलासो भविष्यति॥१७४॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इत्युक्त्वा पादचारेण संचरन्नगरे किल।
मुद्दगौडगृहं गत्वा सुग्गलाम्बां ददर्श ह।।१७५।।

षष्ठिवर्षवयोवृद्धां सत्सौभाग्यसमन्विताम्।
दृष्ट्वा तां च महासाध्वीं जगन्मातुःसमप्रभाम्।।१७६।।

त्वद्गर्भकोटरादेव शिवः सन्तानरूपतः।
जायते वंशपुण्यात्मा लोककल्याणहेतवे।।१७७।।

इत्युक्त्वा तद्भविष्यं च पवित्रमुदरं किल।
स्पृष्ट्वा च रेवणो योगी ह्याशीर्वादानदात् खलु।।१७८।।

योगिनो वचनं श्रुत्वा दम्पती भक्तिभावतः।
तत्पादकमलौ नत्वा विनयादेवमूचतुः।।१७९।।

अपत्यार्थं बहोः कालात् घोराद् घोरतरं किल।
तारुण्ये च तपस्तप्तं निष्फलं तदजायत।।१८०।।

अभवावाधुना वृद्धौ जर्जरे चावयोस्तनू।
वार्धके मुनिवृत्तौ च कथं सन्ततिसंभवः।।१८१।।

दम्पत्योर्वचनं श्रुत्वा प्रोवाच योगिनां वरः।
यदसाध्यं भवेल्लोके साध्यं तत्कृपया किल।।१८२।।

नयेद्वाचालतां मूकं पङ्गु च लङ्घयेद्गिरिम्।
सन्ततिं विन्दयेद्वन्ध्या हीश्वरेच्छा बलीयसी।।१८३।।

अतोऽवश्यं भवेदेव सन्ततिर्न हि संशयः।
करोतु नाम्ना तं चैव सिद्धराम इति स्फुटम्।।१८४।।

तीर्थानामष्टषष्ठीनां लिङ्गानां स्थापनात् किल।
ग्रामं सोल्लापुरं चैव भूकैलासो भविष्यति।।१८५।।

वापीकूपतडागानां निर्माणं स करिष्यति।
अतः सर्वेषु सिद्धेषु प्रसिद्धो हि भविष्यति।।१८६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



रेवणस्य महावाणीं श्रुत्वा तुष्टौ हि तावुभौ।
योगिनःपादपूजां च कृत्वा विधिवदर्चनम्।।१८७।।

पादोदकप्रसादौ च स्वीकृत्य तत्क्षणं किल।
अवाप्य तत्कृपां चैव धन्यभागौ बभूवतुः।।१८८।।

षडङ्गयोगसल्लीलां कुर्वन्नाचार्यसद्गुरुः।
श्री-वीरशैवसद्धर्मं स्थापयामास भूतले।।१८९।।

जगत्पूज्याः रेवणगुरवः मेनां गन्तुं प्रस्थिताः ग्रामतः ग्रामं सञ्चरतः सोल्लापुरं प्रविशन्त; क्षेत्रस्य सीम्नि मेनातः अवतीर्य अवनिम् प्रणेमुः। तत्र च हेतुः आसीत् सुग्गलां वा गर्भतः शिवस्य तस्यां भूमौ अवतरणम् आसन्नम् आसीत्। पादचारेण सञ्चरन्तः इमे गुरवः मुद्दगौडगृहं गत्वा वष्टिवर्षवयस्कान् तान् अम्बान् आशिषं प्रयच्छन्तः प्राहुः— भवत्याः गर्भतः शिव; पुत्ररूपेण आविर्भविष्यतीति।

योगिनाम् आशिषात् मुद्दगौडगृहे जातः सिद्धरामसुतः अष्टषष्टिलिङ्गानां स्थापनं कृत्वा सोल्लापुरे भूकैलासताम् आनयत्। तदेव सुग्गलाम्बायै सन्तानाशिवं प्रदाय तदङ्गयोगलीलाम् आचरन्तः भूतले वीरशैवधर्मं सुनिभृतं प्रतिष्ठापयामासुः।।१६९-१८३।।

## ।।रुद्रमुनीश्वरस्य पीठारोहणम्।।

एवं चचार वर्षाणि चतुर्दशशतानि च।
तन्नाम्ना भारते देशे मन्दिराणि बहूनि च।।१९०।।

यत्र यत्र गतो योगी तत्र तन्मन्दिरं बहु।
निर्मितं स्मारकं तस्य भ्राजते राजते शिवम्।।१९१।।

अन्ते स रेवणो योगी वीरसिंहासनं परम्।
समागत्य स्वकं शिष्यं मुनिं रुद्रमुनिं किल।।१९२।।

अभिषिच्य महापीठे ह्यागमोक्तविधानतः।
कुल्यपाकं समागत्य लिङ्गे लीनो बभूव ह।।१९३।।

कृत एकाक्षेरेणैव वीरसिंहासनं महत्।
स्थापितं मलयाद्रौ च भक्तकामार्थदायकम्।।१९४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वीरसिंहासने पीठे कलौ चास्मिन् युगे किल।
विंशोत्तरशताचार्याः प्रथिताः शिवयोगिनः।।१९५।।

ते च सर्वे महाचार्या धर्मतत्त्वं प्रबोध्य च।
उद्धरन्तोजनान् सर्वान् संरेजू राजयोगतः।।१९६।।

तेषु सर्वेषु सिद्धेषु महाचार्येषु राजराट्।
आसीदृषभराजेन्द्रःशिवाचार्यो महागुरुः।।१९७।।

काश्यामधीत्य शास्त्राणि विश्वाराध्यस्य सन्निधौ।
धर्मकार्याणि कुर्वाणो महतीं कीर्तिमाप सः।।१९८।।

चन्द्रशेखरराजेन्द्रः शिवयोगिशिखामणिः।
ततः पीठाधिपो भूत्वा शशास धर्मपीठकम्।।१९९।।

ततःपञ्चाक्षराचार्यःशिवाचार्यशिखामणिः।
अधिरुह्य महापीठं राजभिः सम्प्रपूजितः।।२००।।

ततस्तच्छिष्यराजेन्द्रो शिवानन्दो महाप्रभुः।
अविमुक्ते महाक्षेत्रे कृतशास्त्रपरिश्रमः।।२०१।।

विद्वद्बलेन पीठेशः सर्वप्रान्तेषु सर्वथा।
कृत्वा धर्ममहाकार्यं कीर्तिकायो बभूव ह।।२०२।।

श्रीशिवानन्दराजेन्द्रवरशिष्यो महागुरुः।
वीरगङ्गाधरेन्द्रो हि ततः पीठाधिपोऽभवत्।।२०३।।

धुरन्धरोऽयं पूजायामिष्टलिङ्गस्य वै किल।
भर्गं तं भावयन्ति स्म भक्ता भावविभूषिताः।।३०४।।

ततस्तच्छिष्यशैवार्यो वीररुद्रमुनिर्गुरुः।
प्रसन्नरेणुकोपाह्वः पीठाधीशो महानभूत्।।२०५।।

अयं चैव महाचार्यो वेदवेदान्तपारगः।
काश्यां गुरुकुले चैव स्थित्वा सर्वमधीतवान्।।२०६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**एते सर्वे महाचार्यास् तपोविद्याविभूषिताः।**
**कृत्वा धर्ममहाकार्यं स्वे महिम्नि प्रतिष्ठिताः।।२०७।।**

**वीररुद्रमुनीनां च कृपाच्छत्रे प्रवर्धितः।**
**विद्याविनयसम्पन्नो धार्मिकःकुशली सुविद्।।२०८।।**

**प्रसन्नरेणुकोपाधिर्वीरसोमेश्वरोऽधुना ।**
**आचार्यो वर्तते पीठे सर्वलक्षणलक्षितः।।२०९।।**

**आशीर्वादं गुरोर्लब्ध्वा दानलब्धधनेन च।**
**धर्मकार्यं कृतं तेन क्रियते च निरन्तरम्।।२१०।।**

**एवमेवास्य पीठस्य धर्ममूलं प्रशैक्षिकम्।**
**वर्धतां वर्धतां कार्यं संस्कृतेरभिनन्दकम्।।२११।।**

चतुर्दशवर्षशतं विचरन्तः रेवगुरवः सम्पूर्णे भारते वर्षे बहूनि मन्दिराणि निर्मापयन्तः वीरसिंहासनं समागत्य रुद्रमुनीश्वरं शिवयम् अभिषिच्य कुल्यपाकं समागत्य लिङ्गलयलीलां सम्पादितवन्तः। मलयाग्रौ एकाक्षरेण ककृतयुगे यद् वीरसिंहासनं स्थापितं तत्र कलौ युगे विंशोत्तरशतसंख्याकाः आचार्याः प्रथमानाः बभूवुः। सिद्धेषु शिवाचार्येषु राजेन्द्रशिवाचार्यः काश्याम् अधीत्य धर्मकार्याणि कुर्वन् महतीं कीर्तिं प्रयेदे। अनन्तरं श्रीचन्द्रशेखरराजेन्द्रः, क्रमेण पञ्चाक्षराचार्यः, तत्पश्चात् वीरगंगाधरेन्द्रः, वीररुद्रमुनिः इत्येवं वीरपीठशैवाचार्याः विद्याविनयसम्पन्नाः सिद्धाः अभूवन्। सम्प्रति प्रसन्नरेणुकोपाधिः वीरसोमेश्वरशिवाचार्यः पीठस्यास्य गौरवं संवर्धयन् धर्मकार्यामि सम्पादयन् प्रशैक्षिकं कार्यं प्रवर्धयन् संस्कृतिसंरक्षकतां संवर्धयन् विजयते।।१९०-२११।।

## हिन्दी तात्पर्य

## श्रीरम्भापुरीपीठ का कलियुग इतिहास

आचार्य श्रीचन्द्रशेखर शिवाचार्य अपनी कारिका के माध्यम से श्रीरम्भापुरी पीठ के कलियुग इतिहास का संचय मनोरम शैली में किया है। नवम अध्याय के प्रारम्भ की दस कारिकाओं में श्री जगद्गुरु शिवाचार्य ने यह प्रतिपादित किया है कि पूर्व युग में सोमेश लिङ्ग से प्रकट हुए जगद्गुरु श्री रेणुक कलियुग में रेवणसिद्ध नाम से कुल्यपाक पुण्यभूमि में प्रादुर्भूत हुए। उन्होंने १४०० वर्षों तक

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



राजा एवं उनकी प्रजाओं का उद्धार वीरशैव धर्मदर्शन की पद्धति द्वारा करते रहे और इस क्रम में उनकी यशःश्री सर्वत्र विश्रुत होती रही।

जगद्गुरु श्रीरेवण शिवाचार्य की विश्रुत कीर्ति को सुनकर भगवत्पाद आद्य शंकाराचार्य शृंगेरी क्षेत्र से सशिष्य प्रस्थान कर वीरपीठ सिंहासन के अधिपति श्री रेवण शिवाचार्य के पास उपस्थित हुए। श्री शिवाचार्य ने भगवत्पाद आद्य शंकराचार्य को स्वागत-सत्कार के साथ भद्रपीठ पर बिठाया और दोनों आचार्यों के मध्य कुशल प्रश्न के साथ वार्ता का क्रम प्रवर्तित हुआ। श्रीरेवणशिवाचार्य जी ने भगवत्पाद से उनकी लोककल्याणकारिणी पद्धति से परिचित होने की बात बताई। साथ ही उन्होंने अपनी पद्धति को विस्तारित करने हेतु किसी भी जिज्ञासा को प्रकट करने हेतु सबहुमान निवेदन किया।

भगवत्पाद शंकराचार्य महान् ज्ञानी थे। उन्होंने जगद्गुरु श्रीरेवणशिवाचार्य से अपनी जिज्ञासा प्रकट करते हुए पूछा, "ब्रह्म अनन्त कोटि ब्रह्माण्डों में व्यापक रूप से विद्यमान रहते हैं। ऐसी स्थिति में उनकी अर्चा-विधि क्या हो सकती है, कृपया इसे प्रतिपादित करें। श्री शिवाचार्य ने विनम्रतापूर्वक निवेदन करते हुए भगवत्पाद से बताया कि ब्रह्म, शिव एवं लिङ्ग पर्याय शब्द हैं। आन्तर उपासना एवं बाह्य उपासना के भेद से विश्वव्यापी ब्रह्म की अर्चा दो प्रकार की होती है। साधकों द्वारा प्रत्युपेय लिङ्गतत्त्व की उपासना मूलाधार में सुवर्णप्रभा-मण्डित ध्यान के साथ की जाती है। तद्वत् हृदय में विद्रुम आभामण्डित ध्यान एवं भ्रूमध्य में स्फटिक आभा-मण्डित ध्यान के साथ की जाने वाली अर्चा भी आन्तर उपासना कहलाती है।

।।इति नवमाध्यायः।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



॥ दशमाध्यायः ॥

## श्रीमदुज्जयिनीपीठस्य कलियुगीनमैतिह्यम्

पञ्चाननशिवादेशं कृत्वा मूर्ध्नि महागुरुः।
मरुलाख्यो महायोगी पुरे चावन्तिके श्रुते।।१।।

क्षिप्रानद्यास्तटे चैव वटक्षेत्रे विराजितात्।
सिद्धेश्वरमहालिङ्गात् प्रादुरासीद्गणेश्वरः।।२।।

कृते संस्थापिते तत्र पीठे सद्धर्मसंज्ञके।
अधितिष्ठन्महाचार्य एष धर्ममवर्धयत्।।३।।

कालकालो महाकालो यत्र चानादिकालतः।
कालभीतिं स्वभक्तानां वारयन् भाति भानभूः।।४।।

क्षिप्रपापहरा क्षिप्रा सन्माङ्गल्यप्रवर्षिणी।
श्रौतपालो महाराजो यत्रासीच्च प्रशासकः।।५।।

एकदा श्रौतपालो हि स्वर्गप्राप्तिसमीहया।
कर्तुकामोऽश्वमेधं स गुरोः सान्निध्यमागतः।।६।।

सद्धर्मे धर्मपीठे च राजमानं महागुरुम्।
प्रणिपत्य सपत्नीको विनयादब्रवीद्वचः।।७।।

ऐहिकं सकलं भाग्यमनुभूतं मयाऽधुना।
परत्र स्वर्गकामोऽस्मि गुर्वाज्ञा तत् प्रदीयताम्।।८।।

मनोऽभिलषित प्राप्तौ कारणं परिकीर्तितम्।
कारुण्य च गुरोरेव सर्वेषां यन्नृणां कृते।।९।।

तत् सान्निध्यं महायज्ञे स्वीकुरुष्व महागुरो।
अनुगृह्णीष्व मामेवं प्रार्थयामास भूपतिः।।१०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



राज्ञो विनयमाकर्ण्य मरुलाख्यो महागुरुः।
महाकालं स्मरन्नेवं प्रत्युवाच वचो महत्।।११।।

हिंसया साध्यते यज्ञः पशुकर्म विगर्हितम्।
क्षणिकं फलदाय्येतत् पातयत्येव निश्चितम्।।१२।।

मा हिंस्यात् सर्वभूतानि शास्त्रादेशो महानयम्।
समुल्लङ्घ्य सुमेधाविन् कुतः शान्तिमवाप्स्यसि।।१३।।

अहिंसा परमो धर्मो दशधर्मेषु कीर्तितः।
परमं धर्ममुत्सृज्य कथं सुखमवाप्स्यसि।।१४।।

धर्म एव समस्तानां दुःखानां शमनौषधम्।
तस्माद्धर्मामृतं पातुं धर्ममाचर सन्ततम्।।१५।।

## ।।स्वर्गस्य गुणदोषाः।।

मनःप्रीतिकरः स्वर्गो नरकस्तद्विपर्य्ययः।
इत्येवं सर्वशास्त्रेषु द्वयोर्लक्षणमुच्यते।।१६।।

पुण्यानां कर्मणां भोगो भुज्यते यत्र धार्मिकैः।
स एव स्वर्गशब्देन कीर्तितः शास्त्रचिन्तकैः।।१७।।

तथैव कृतपापानां विविधानां फलानि च।
भुज्यन्ते पापिभिर्यत्र स एव निरयःखलु।।१८।।

जीवानां कर्मभोगार्थं शिवेन परमात्मना।
निर्मितानि हि लोकानि चतुर्दशविधानि च।।१९।।

ऊर्ध्वानि सप्तलोकानि पुण्यभोगप्रदानि च।
अधो वर्तीनि लोकानि पापभोगप्रदानि हि।।२०।।

भूर्भुवःस्वर्महश्चैव जनश्च तप एव च।
सत्यलोकश्च सप्तैते तूर्ध्वलोकाः प्रकीर्त्तिताः।।२१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अतलं वितलं चैव सुतलं च रसातलम्।
तलातलं महत् प्रोक्तं पातालं सप्तमं स्मृतम्।।२२।।

एतानि सप्तलोकानि ह्यधो लोकानि वै खलु।
सर्वेषां विस्तृतं रूपं पुराणेषु प्रदृश्यते।।२३।।

पुण्यपापानुरूपेण गत्वा भुवनमण्डले।
भुज्यन्ते सुखदुःखानि सर्वजीवैः समन्ततः।।२४।।

ऊर्ध्वलोकेषु भो राजन् सुखाऽभासानि सन्ति च।
वक्ष्यामि शृणु तानीह सन्मते प्रविवेचय।।२५।।

नन्दनादीनि दिव्यानि रम्याणि विविधानि च।
तत्रोद्यानानि पुण्यानि सर्व्वकामप्रदानि च।।२६।।

सर्व्वकामफलैर्वृक्षैः शोभितानि समन्ततः।
विमानानि सुदिव्यानि सन्त्यत्र सुबहून्यपि।।२७।।

चन्द्रमण्डलशुभ्राणि हेमशय्यासनानि च।
रम्भाद्यप्सरसस्तत्र राजन्ते रूपसम्पदः।।२८।।

नराःसुकृतिनस्तत्र विचरन्ति यथासुखम्।
न रोगो न जरा मृत्युर्न शोको न च विप्लवः।।२९।।

न तत्र क्षुत्पिपासे स्तो ग्लानिर्नास्ति च नास्ति च।
एवं हि बहवस्तत्र गुणाः सन्ति सहस्रशः।।३०।।

यावत् पुण्यं शुभं राजन् भुक्त्वा तत्र सुखानि च।
क्षीणे च सुकृते जीवाः पतन्ति हि पुनःक्षितौ।।३१।।

अमुत्र सन्ति ये लोकास्तेपि क्षयिण ईरिताः।
पतनाख्येन दोषेण जायन्ते दूषिता हि ते।।३२।।

क्षणिकं हि सुखं दातुः पातकात् पशुकर्मणः।
पतिकर्म वरं प्रोक्तं सद्यो मुक्तिप्रदं नृणाम्।।३३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भो पुण्यात्मन् महाराज प्राप्तये मोक्षसम्पदः।
पशुकर्म परित्यज्य पतिकर्म समाश्रये:।।३४।।

इष्टलिङ्गस्य या पूजा पतिकर्म मतं हि तत्।
पूजाविधासु सर्वासु सर्वोत्कृष्टा हि सा मता।।३५।।

अग्निहोत्रादिभिर्यज्ञैस्तपोभिर्दुश्चरैश्च सा।
लिङ्गार्चनरतिःश्रेष्ठा सर्वसिद्धिप्रदायिका।।३६।।

ब्रह्मादयः सर्वदेवा विबुधा लिङ्गमाश्रिताः।
सिद्धाः स्वस्वपदे भान्ति जगत्तन्त्राधिकारिणः।।३७।।

योगिनः सनकाद्याश्च मुनयो गौतमादयः।
परित्यज्य क्रियाः सर्वा लिङ्गपूजैकतत्पराः।।३८।।

लिङ्गस्य धारणं पुण्यं सर्वपापौघनाशनम्।
स्वीकृतं मुनिभिः सर्वैः शिवागमपरायणैः।।३९।।

तल्लिङ्गधारणं प्रोक्तं द्विधा सर्वार्थसाधकम्।
शिवागमेषु सर्वेषु शिवेन परमात्मना।।४०।।

चिद्रूपं परमं लिङ्गं शैवं सर्वार्थसाधकम्।
यत्तस्य धारणं चित्ते तदान्तरमुदाहृतम्।।४१।।

चिल्लिङ्गं तद्धि भूतानामन्तस्त्रिस्थानगोचरम्।
आधारे हृदये वापि भ्रूमध्ये वा निरन्तरम्।।४२।।

अपरिच्छिन्नमव्यक्तं तल्लिङ्गं ब्रह्म शाश्वतम्।
उपासनार्थं भक्तानां परिच्छिन्नं स्वमायया।।४३।।

लयं गच्छति यत्रैव जगदेतच्चराचरम्।
पुनःपुनः समुत्पत्तिं तल्लिङ्गं ब्रह्म चोच्यते।।४४।।

मूलाधारे भ्रुवोर्मध्ये हृदये वा निरन्तरम्।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणम्।।४५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आधारे कनकप्रख्यं हृदये विद्रुमप्रभम्।
भ्रूमध्ये स्फटिकच्छायं लिङ्गं योगी विभावयेत्।।४६।।

वैराग्यज्ञानयुक्तानां योगिनां स्थिरचेतसाम्।
अन्तर्लिङ्गानुसन्धाने रुचिर्बाह्ये न जायते।।४७।।

अतो हि साधकः सर्वोलिङ्गं चिद्रूपमुत्तमम्।
अन्तर्विभाव्य सततं दुर्लभां मुक्तिमाप्नुयात्।।४८।।

अन्तर्धारयितुं लिङ्गमशक्तःशक्त एव वा।
बाह्यं तु धारयेल्लिङ्गं तद्रूपमिति निश्चयात्।।४९।।

बाह्ये यद्धार्यते लिङ्गं तत् स्थूलमभिधीयते।
परिहारादनिष्टानामिष्टलिङ्गं तदुच्यते।।५०।।

मूर्ध्नि कण्ठे ककुद्देशे कुक्षौ वक्षसि हस्तके।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात्।।५१।।

नाभेरधो हि तल्लिङ्गं भक्तेन न कदाचन।
धारयेत् त्रिकभागे च जटाग्रे नैव नैव च।।५२।।

वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च।
लिङ्गधारणमाख्यातं शिवभक्तस्य निश्चयात्।।५३।।

ब्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः।
धारयन्ति सदा लिङ्गमुत्तमाङ्गे विशेषतः।।५४।।

तथैव शक्तयः सर्वाः शिवभावविभाविताः।
धारयन्त्यलिकाग्रेषु शिवलिङ्गं मनोरमम्।।५५।।

लिङ्गधारी सदा शुद्धः सर्वसूतकवर्जितः।
अर्चयेदिष्टलिङ्गं हि करपीठे समाहितः।।५६।।

यज्ञादयः क्रियाः सर्वाः लिङ्गपूजांशसम्मिताः।
अतस्ता हि परित्यज्य लिङ्गमेकं समाश्रयेत्।।५७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः।
दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गमुत्तमम्।।५८।।

गुरोर्मरुलसिद्धस्य मुखपद्माद्विनिर्गतम्।
माहात्म्यमिष्टलिङ्गस्य श्रुत्वा तु भूपतिस्तदा।।५९।।

दण्डवत् प्रणिपत्यैव सपत्नीको महामतिः।
श्रौतपालःसुसन्तुष्टः श्रीगुरुं चाब्रवीदिदम्।।६०।।

माहात्म्यमिष्टलिङ्गस्य श्रुत्वाऽहं त्वन्मुखात् किल।
स्वर्गभ्रान्तिर्विनिष्क्रान्ता गतो मे चित्तविभ्रमः।।६१।।

भो कल्याणमहाभाग शिवज्ञानमहोदधे।
आचार्यवर्य मामज्ञं रक्ष स्वशरणागतम्।।६२।।

इति सम्प्रार्थिनं दृष्ट्वा राजानं हि महागुरुः।
चक्रे सविधिवद्दीक्षां सपत्नीकाय तत्क्षणे।।६३।।

राजानं दीक्षितं दृष्ट्वा तुष्टा सर्वे प्रजाजनाः।
दीक्षायै प्रार्थुयामासुः मरुलं सिद्धसद्गुरुम्।।६४।।

प्रजानां प्रार्थनां श्रुत्वा शक्तिपातं परीक्ष्य च।
दीक्षां दत्वा हि सर्वेभ्यः समुद्धारधुरन्धरः।।६५।।

आवन्तिकान् जनान् सर्वान् एवमद्धार्य-देशिकः।
सञ्चरन् व्योममार्गेण केदारक्षेत्रमागतः।।६६।।

आकाशादागतं दृष्ट्वा मरुलार्यं महागुरुम्।
एकोरामो महापीठे स्वागतं व्याजहार ह।।६७।।

उषित्वा तावुभौ तत्र चर्चयन्तौ परस्परम्।
ध्यायन्तौ सुबहोः कालाद् लोकानुद्धरतां खलु।।६८।।

आचार्यौ ह्येकदा तत्र गौरीकुण्डं सुनिर्मलम्।
गत्वा कृत्वा महास्नानं ध्यायन्तावासतुर्यदा।।६९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कुण्डात् तस्मात् तदानीं वै तेजोराशिर्महाबलः।
दिव्यमूर्तिःसमुद्भूय गुर्वोःसानिध्यमागतः।।७०।।

एकोरामस्तु दृष्ट्वा तं बालकं दिव्यरूपिणम्।
साश्चर्यं मरुलं प्राह त्वदर्थमयमागतः।।७१।।

पाठयित्वाऽगमान् सर्वान् योगसंसिद्धिदायकः।
सद्धर्मपीठमारोह्य ह्यवतारं समापय।।७२।।

एकोरामवचः श्रुत्वा मरुलार्यो महागुरुः।
तथेति वचनं दत्त्वा सशिष्यो ह्याजगाम ह।।७३।।

आगत्यावन्तिकां तत्र वटुं सम्पाठ्य एव च।
विधिवद्दीक्षयित्वा च श्रीमुक्तिमुनिसंज्ञकम्।।७४।।

नूतनं नाम तस्मै च दत्वा चारोह्य पीठकम्।
सिद्धेश्वरालयं गत्वा प्रार्थयामास शंकरम्।।७५।।

देव देव महादेव ह्याज्ञां पालयता मया।
कलौ संस्थापितो धर्मो वीरशैवो महत्तरः।।७६।।

तस्यैव च प्रसारार्थं सुशिष्योऽपि नियोजितः।
अतो मे सामरस्यार्थं ह्याज्ञां देहि महाप्रभो।।७७।।

याचकं ह्यार्द्रभावेन मरुलं लोकशंकरः।
वत्साऽगच्छेति सम्बोध्य लिङ्गे तल्लयमादिशत्।।७८।।

तस्मिन् सद्धर्मपीठे तु गुरुशिष्यपरम्परा।
अखण्डदीपरूपेण सानूचाना प्रवर्तते।।७९।।

मुक्तिमुनिं समारभ्य यावदद्य निरन्तरम्।
पीठे सद्धर्मके तत्र गुरवःस्युःशताधिकाः ।।८०।।

केनचित् कारणेनैव देशे कर्नाटके किल।
स्थलान्तरितमेतद्धि पीठमुज्जयिनी - पुरे।।८१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अत्रास्ति मरुलार्यस्य गुरोः संजीवनात्मकः।
समाधिर्महिमा तस्य शक्यो वर्णयितुं नहि।।८२।।

उज्जयिन्यां पुरे ह्यत्र पीठेऽपि बहवः खलु।
सिद्धाश्च योगसंसिद्धा गुरवो ह्यभवन् किल।।८३।।

चन्नो वृषभराजेन्द्रः सिद्धलिङ्गो महागुरुः।
सिद्धेश्वरस्तथा चैव मरुलाराध्य - सत्प्रभुः।।८४।।

नाम्ना मरुलसिद्धेन ख्याताश्च गुरवः किल।
भूषयित्वा शुभं पीठं रेजुः कीर्तिशरीरिणः।।८५।।

महनीये महापीठे सद्धर्मसंज्ञके किल।
सिद्धलिङ्गाख्य - राजेन्द्रो राजते ह्यधिराजते।।८६।।

गुरूणामेव सर्वेषां कृपाच्छत्रेण रक्षितः।
पालयन् हि सदा धर्मं धर्ममार्गपरायणः।।८७।।

धर्मप्रचारधौरेयो ह्यतन्द्रितमनाः खलु।
भाषासु सर्व - शास्त्रेषु कृतभूरिपरिश्रमः।।८८।।

भक्तदत्तार्थसार्थक्यं कुर्वाणो हि दिने दिने।
समाजोत्थानकार्याणि कुर्वन्नेवास्त्यहर्निशम्।।८९।।

वटक्षेत्रस्थपीठस्य शिप्रातीरे स्थितस्य च।
जीर्णोद्धारं महत्कार्यं समारब्धमनेन हि।।९०।।

वाचा दृशा तथा कृत्या माधुर्यरसपूर्णया।
जयेद्यच्छन् समाह्लादं सिद्धलिङ्गो जगद्गुरुः।।९१।।

एतेषां कार्यकाले च धार्मिकं शैक्षिकं तथा।
कार्यं सामाजिकं चैव वर्धतेऽहर्निशं नवम्।।९२।।

कलियुगे पञ्चानन शिवादेशं शिरसि संधार्य मरुलशिवाचार्यः क्षिप्रानद्याः तीरे सिद्धेश्वमहालिङ्गात् प्रादुर्भूतः श्रौतपाले महाराजे शासति सद्धर्मपीठे राजमानो बभूव। स्वर्गकायेन राज्ञा चरणसान्निध्यं दातुं प्रार्थितः मरुलशिवाचार्यः हिंसासाध्यं पशुकर्म

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विगर्हितं भवतीति ऊर्ध्वाध: स्थितेषु चतुर्दश लोकेषु सर्वेषां क्षयिष्णुत्वं प्रतिपादयामास। तस्मात् पशुकर्म विहाय पतिकर्म इष्टलिङ्गपूजनात्मकं शिवप्रोक्तम् अनुष्ठेयम्। एतत् पतिकर्म द्विविधम् आन्तरं बयं च। एतत् कर्म ब्रह्मा विष्णु; अन्ये देवा: मुनय: देव्य: प्रकुर्वन्ति। विस्तरेण मरुलसिद्धस्य गुरो: मुखपद्माद् विनिर्गतम् इष्टलिङ्गमाहात्म्यं श्रुत्वा सन्तुष्ट: निर्गतस्वर्गभ्रान्ति: वीरशैवदीक्षां सपत्नीक: श्रीमरुलसिद्धगुरो; उपवाप्य प्रकाशमानो बभूव। अनन्तरं प्रजाजनानपि दीक्षापवित्रितान् विधाय अवन्तिदेशात् केदारक्षेत्रमागतं तं मरुलशिवाचार्यम् एकोराम: स्वागतं वितिवान्। तत्रवसतो: तयो: लोकानुद्धरतो: एकदा गौरीकुण्डम् स्नातवतो: ध्याविधि: प्रावर्तत। तदानीं कुण्डात् उद्भूत: दिव्य: बालक: उपयो: गुर्वो: दृष्टिम् आचकर्ष। एकोराम; मरुलं प्रत्या— एवं बालं बटुं श्रीमुक्तिमुनिसंज्ञकम् उत्तरदायित्वेन योजयन् सिद्धेश्वरमन्दिरं गत्वा सामरस्यप्रार्थनया लिङ्गे लयं प्राप। मुक्तिमुने: आरभ्य अद्य यावत् शताधिका: गुरव: सम्भबूवु:। सद्धर्मतीर्थम् एतत् कर्नाटके उज्जयिनीपुरे स्थलान्तरितं सञ्जातम्। अत्र मरुलगुरो: माहन् सञ्जीवनसमाधि: राजते। अस्मिन् पीठे अपि सिद्धा: योगिन: बहव: गुरव: अभूवन्। चन्न: वृषभराजेन्द्र: सिद्धलिङ्ग: सिद्धेश्वर: मरुलसिद्धश्चेति शुभं पीठं भूषयित्वा कीर्तिशरीरिण: जेगीयन्ते। सम्प्रति सिद्धलिङ्गराजेन्द्र: एतत्पीठाधिपति: भाषासु शास्त्रेषु च कृतभूरिपरिश्रम: समाजोत्थानकार्याणि जीर्णोद्धारं च कुर्वन् जगद्गुरु: अर्निशं वर्धमान: शराजते।।१-९२।।

## हिन्दी तात्पर्य

## स्वर्ग के गुण एवं दोष

कलियुग में शिव की आज्ञा से गणेश्वर, मरुलशिवाचार्य के नाम से सिद्धेश्वर महालिंग से क्षिप्रा नदी के तट पर प्रकट हुए थे। उस समय महाराजा श्रौतपाल का शासन था उन्होंने मरुल शिवाचार्य से यज्ञ में पधारने का निवेदन किया। आचार्य ने राजा से बताया जिस यज्ञ में पशु की हिंसा होती हो उससे मिलने वाले फल नश्वर ही होते हैं। अत: पशु कर्म का परित्याग करना चाहिए और पतिकर्म-इष्टलिंग पूजा भगवान शिव द्वारा आदिष्ट है। उसे करना चाहिए। इसके दो भेद हैं— आन्तर पूजन एवं बाह्य पूजन। ब्रह्मा, विष्णु, रूद्र आदि देवगण एवं मुनिगण शिव की उपासना करते हैं। इष्टलिंग महिमा को गुरु से जानकर राजा ने अपनी पत्नी के साथ वीरशैव दीक्षा को प्राप्त कर प्रसन्न हुए और प्रजाजन में भी वीरशैव धर्म का प्रचार किया। अवन्तिका से केदार क्षेत्र में आगत मल्लशिवाचार्य को एकोराम ने स्वागत किया। वहाँ लोकमंगल करते हुए इन दोनों के सामने एक दिन पूजाकाल में कुंड से दिव्यबालक प्रकट हुआ। एकोराम

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ने मरुल से कहा— इस बटु को श्रीमुक्ति मुनि नाम से विभूषित कर उत्तराधिकारी बना दें और ऐसा करने के बाद सिद्धेश्वर मंदिर जाकर सद्‌गुरु मरुल ने सामरस्य प्रार्थना के साथ लिंगलीनता प्राप्त कर ली। मुक्तिमुनि से लेकर आज तक सौ से अधिक गुरु वहाँ शैव धर्म का प्रचार-प्रसार करते रहे। तदनंतर यह धर्म तीर्थ कर्नाटक के उज्जैनपुरी में स्थानांतरित हो गया। यहाँ मरुल गुरु की संजीवन समाधि विहित हुई। इस पीठ में भी बहुत सारे सिद्ध योगी सद्‌गुरु बने। चन्न, वृषभराजेन्द्र, सिद्धलिंग, सिद्धेश्वर एवं मरुल इस शुभ पीठ को विभूषित कर यशः शरीर में आज भी विद्यमान हैं। वर्तमान काल में सिद्धलिंग राजेन्द्र इस पीठ के अधिपति हैं। अनेक भाषाओं में तथा शास्त्रों में ज्ञानवान वर्तमान जगद्‌गुरु उत्थान कार्यों का संपादन करते हैं।

।।इति दशमाध्यायः।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ एकादशाध्यायः ॥

## श्रीमत्केदारपीठस्य कलियुगीनमैतिह्यम्

वैराग्यधर्मपीठेशं मुनिराजैःप्रपूजितम्।
एकोरामं गुरुं वन्दे केदारक्षेत्रवासिनम्।।१।।

कलौ युगे च सम्प्राप्ते ह्येकोरामो जगद्गुरुः।
शिवादेशं समासाद्य ह्यान्ध्रदेशे महत्तरे।।२।।

द्राक्षारामाख्यसुक्षेत्रे भीमनाथाख्यलिङ्गतः।
अवतीर्णो महायोगी धर्मसंस्थापनाय च ।।३।।

तत्रत्यान् सर्वसद्भक्तान् समाधायोपदेशतः।
महिम्ना व्योममार्गेण वैराग्यपीठमागतः।।४।।

कृते संस्थापीते तत्र उषित्वा च महागुरुः।
आगतान् सर्वधर्मीयान् शिवतत्त्वमबोधयत्।।५।।

एवं चैवोत्तराखण्डे वीरशैवमतं परम्।
संस्थाप्यादीक्षयत् सर्वान् महाचार्योजनान् निजान्।।६।।

ततो ह्याकाशमार्गेण संचरन् क्षितिमण्डले।
पीठान्यन्यानि संपश्यन् पुनः केदारमागतः।।७।।

अवतारसमाप्तेश्च पूर्वमेव जगद्गुरुः।
शिष्यायानन्दलिङ्गाय पट्टबन्धं चकार ह।।८।।

द्राक्षारामं ततो गत्वा भीमनाथस्य सन्निधौ।
प्रार्थयामास देवेशं प्राञ्जलि प्रह्वतान्वितः।।९।।

देव देव महादेव त्वदाज्ञां पालयन्नहम्।
कृतकृत्योऽस्मि भो देव सामरस्यं प्रदेहि मे।।१०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



एकोरामवचः श्रुत्वा प्रसन्नः परमेश्वरः।
एहि वत्सेति चाहूय स्वात्मसात्कृतवान् विभुः।।११।।

भीमनाथात्समुद्धूय धर्मं संस्थाप्य सर्वतः।
पुनस्तत्र विलीनस्य लिङ्गलीला विशिष्यते।।१२।।

ततो ह्यानन्दलिङ्गस्तु कठोरं तप आचरन्।
घोरवैराग्यवृत्त्यासौ सुप्रसिद्धो हिमालये।।१३।।

तन्माहात्म्यं समाकर्ण्य त्विन्द्रप्रस्थमहाप्रभुः।
जनमेजयभूपालो भूमिदानं चकार ह।।१४।।

मन्दाकिनी तु पूर्वास्यां क्षीरगङ्गा तु पश्चिमे।
स्वर्गद्वारनदी चैव दक्षिणे राजते शुभा।।१५।।

उत्तरे मधुगङ्गेति चतुःसीमसु राजितम्।
क्षेत्रं केदारकं नाम भूरिदो भूपतिः स्वयम्।।१६।।

दानपत्रं लिखित्वा च भूरिभक्त्या समर्प्य तत्।
सद्गतिं पूर्वजानां स ययाचे गुरुसन्निधौ।।१७।।

आशीर्वादं गुरोर्लब्ध्वा सन्तुष्टो भूपतिस्तदा।
इन्द्रप्रस्थं ततो गत्वा ह्येकचक्रः शशास च।।१८।।

संस्कृते लिखितं चैतद् दानपत्रं महत्तरम्।
पीठे वैराग्यसंज्ञे वै ह्यद्यापि भ्राजते शुभम्।।१९।।

दानदत्ते च क्षेत्रेऽस्मिन् मन्दिरा बहवःखलु।
केदारविश्वनाथा सन्नाम्ना विलसन्तिहि।।२०।।

तेषां पूजादिकं चैव जङ्गमैरर्चकैः खलु।
प्रवर्तमानमद्यापि पूर्वकालात् सनातनात्।।२१।।

अर्चकाः सर्व एवैते दाक्षिणात्या हि जङ्गमाः।
चेला-शब्देन कथ्यन्ते पीठाचार्येण दीक्षिताः।।२२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



चेलामध्ये तुविद्वांसो निष्ठाचारयुताश्चये।
तस्य जगद् गुरु त्वं स्याद् अन्यस्य न कदाचन।।२३।।

एवमस्मिन् महापीठे त्रिशतादधिकाः किल।
आचार्याः पीठमारुह्य धर्ममार्गमबोधयन्।।२४।।

प्रायशः सर्व एवैते विश्वाराध्यस्य सन्निधौ।
काश्यां गुरुकुले स्थित्वा ह्यधीत्य शास्त्रपारगाः।।२५।।

विश्वलिङ्गशिवाचार्यशिष्य आसीन्महागुरुः।
नीलकण्ठ इति ख्यातो विद्वान् सच्छास्त्रकोविदः।।२६।।

छात्राणां पर्वतीयानां विद्यादानप्रशान्तये।
अत्तराखण्डनाम्ना वै विद्यापीठं महत्तरम्।।२७।।

गुरुणा नीलकण्ठेन स्थापितं तु हिमालये।
पारम्परिकशास्त्राणामध्ययनार्थमन्वहम् ।।२८।।

सहस्त्राधिकसच्छात्राः शास्त्राध्ययनतत्पराः।
पाण्डित्यं प्राप्य सन्तुष्टा आद्रियन्ते सदैव हि।।२९।।

छात्राश्चाध्यापकाश्चैव पार्वतीया जना इमे।
नीलकण्ठशिवाचार्यं संस्मरन्ति मुहुर्मुहुः।।३०।।

ततो वैराग्यपीठे च विश्वनाथो जगद्गुरुः।
पश्चाच्च शान्तलिङ्गस्तु ततो सिद्धेश्वरःप्रभुः।।३१।।

सिद्धेश्वरस्य शिष्यस्तु गुरुभक्तिधुरंधरः।
भीमाशङ्करलिङ्गस्तु वर्तमानो जगद्गुरुः।।३२।।

बाल्यादेव गृहत्यागी वैराग्येण परिप्लुतः।
काश्यामसावुषित्वैव विश्वाराध्यस्य सन्निधौ।।३३।।

अधीत्यागमशास्त्राणि बहुभ्यो गुरुतः किल।
सिद्धेश्वरगुरोरेव कृपाच्छत्रे प्रवर्धितः।।३४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तपोऽनुष्ठाननिरतो लिङ्गपूजाधुरन्धरः।
सदाचरणशीलश्च सर्वप्राणिहिते रतः।।३५।।

अनेनाचार्यवर्येण प्राचीनोषामठस्य तु।
जीर्णोद्धारःकृतःसम्यक् भक्तावासाय हेतवे।।३६।।

अन्नदानमहाक्षेत्रं प्रारब्धमधुना किल।
नित्यं निरन्तरं तत्र ह्यन्नदानं प्रवर्तते।।३७।।

एवमेवास्य पीठस्य धार्मिकं शैक्षिकं तथा।
कार्यं सामाजिकं चैव वर्धतामेधतां सदा।।३८।।

एकोराम जगद्गुरुः केदारक्षेत्रे उत्तराखण्डे वीरशैवमतं सुबहोः कालात् संस्थाप्य जनान् दीक्षाविधिना अनुगृह्णन् क्षितिमण्डले व्योममार्गेण संचरन् अन्यानि पीठानि अपि विलोक्य पुनः केदारम् आगतः। अवतारसमाप्ते; पूर्वम् आनन्दलिङ्गाय शिष्याय पट्टबन्धं विधाय भीमनाथलिङ्गं सम्प्रार्थ्य लिङ्गलयलीलां समापितवान्। हिमालये तपः आचरिते आनन्दलिङ्गशिवाचार्याय इन्द्रप्रस्थभूपालः जनमेजयः भूमिदानं चकार। पूर्वस्यां मन्दाकिनी पश्चिमायां क्षीरगंगा, दक्षिणदिशि स्वर्गद्वारनदी, उत्तरस्या मधुगङ्गेति केदारक्षेत्रं भूपतिः दानपत्रं लिखित्वा गुरवे समर्प्य पूर्वजानां सद्गतिं याचमानः जनमेजय; लब्धाशीर्वाद; एकचक्रः इन्द्रप्रस्थं शशास। एतस्मिन् क्षेत्रे केदारविस्वनाथप्रभृतिमन्दिरेषु दक्षिणात्याः जङ्गमाः पीठाचार्येण दीक्षिता; अर्चकाः पूजनं सम्पादयन्ति अत्र महापीठे धर्ममार्गप्रबोधनपराः शतत्रयात् अधिका; शिवाचार्याः जगद्गुरवः सम्बभूवुः। अत्रत्याः सर्वे आचार्याः प्रायेण काश्यां विश्वाराध्य गुरुकुले अधीत्य शास्त्रपारगाः सम्बभूवुः। श्रीनीलकण्ठशिवाचार्यैः उत्तराखण्डविद्यापीठं सहस्राधिक छात्राणां कृते पारम्परिकम् अध्ययनं लम्भयति। विश्वनाथः शान्तलिङ्गः सिद्धेश्वरः बीमाशंकरलिङ्गः इत्येवं पारम्पर्येण अत्र पीठे शिवाचार्याः सञ्जाताः। भीमाशंकरलिङ्गेन प्राचीनोषामठस्य जीर्णोद्धारो विहितः। सम्प्रति अन्नदानमहाक्षेत्रम् अत्र संप्रवर्त्तमानम् आस्ते। धार्मिकं शैक्षणिकं सामाजिकं च बहुविधं कार्यम् प्रचलतीति परमप्रमोदास्पदमेतत्।। १-३८।।

## हिन्दी तात्पर्य

## एकादश अध्याय

जगद्गुरु एकोराम केदार क्षेत्र में उत्तराखंड में वीरशैवमत को स्थापित कर लोगों को दीक्षाविधि से अनुग्रहीत करते हुए व्योममार्ग से अन्य पीठों का

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अवलोकन करते हुए पुनः केदार क्षेत्र आ गए उन्होंने अवतार कार्य समाप्ति के पूर्व अपने आनंदलिंग नामक शिष्य को पट्टबन्ध विहित कर भीमनाथ लिंग की प्रार्थना के साथ लिंगलय लीला का समापन किया। हिमालय में तपस्या करते हुए आनंदलिंग शिवाचार्य को इन्द्रप्रस्थ के राजा जनमेजय ने भूमिदान किया था। पूर्व में मंदाकिनी, पश्चिम में क्षीर गंगा, दक्षिण में स्वर्ग द्वारा नदी तथा उत्तर में मधु गंगा इस तरह केदार क्षेत्र के दानपत्र लिखने के साथ जनमेजय ने गुरु को अर्पित किया और पूर्वजों की सद्गति को प्राप्त किया। आशीर्वाद प्राप्त कर जनमेजय ने एकच्छत्र शासन किया। इस क्षेत्र में जो विश्वनाथ आदि देवों के मंदिर हैं उनमें दक्षिणभारत के जंगम साधु अर्चन और पूजन का संपादन करते हैं। इस महापीठ में तीन सौ से अधिक शिवाचार्य गुरु हो चुके हैं। यहाँ के सभी आचार्य काशी के विश्वाराध्य कुल में पढ़कर शास्त्र के पारगामी विद्वान हुए। श्री नीलकण्ठ शिवाचार्य ने उत्तराखण्ड में पारम्परिक अध्ययन का विद्यापीठ खोलवाया है जिसमें हजारों छात्र अध्ययन करते हैं। श्री विश्वनाथ, श्री शांतलिंग, श्री सिद्धेश्वर एवं श्री भीमाशंकरलिंग, इस तरह के क्रमश; इस पीठ के शिवाचार्य हुए हैं। भीमाशंकरलिङ्ग ने प्राचीन ओषा मठ का जीर्णोद्धार कराया है यहाँ आज भी अन्नदान का महाक्षेत्र चलता है। साथ में धार्मिक, सामाजिक उत्थान का कार्य चल रहा है। यह हर्ष की बात है।

।।इत्येकादशाध्याय:।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ द्वादशाध्यायः ॥

# श्रीशैलपीठस्य कलियुगीनमैतिह्यम्

तत्पुरुषमुखोद्भूतं सूर्यसिंहासनाधिपम्।
पण्डितं पण्डिताराध्यं श्रीशैलेशं सदा भजे॥१॥

आन्ध्राख्ये च महादेशे श्रीशैलशिखरे खलु।
मल्लिकार्जुनसन्नाम्ना यज्ज्योतिर्लिङ्गं तु राजते॥२॥

माहात्म्यं मल्लिनाथस्य व्यासेन मुनिना खलु।
स्कान्दे श्रीशैलखण्डे च वर्णितं बहुसुन्दरम्॥३॥

काश्यां चेन्मरणान्मुक्तिः श्रीशैल-शिखरे खलु।
दृष्टे मुक्तिरिति प्रोक्तं क्षेत्रमाहात्म्यमद्भुतम्॥४॥

मुनिना च शिलादेन पुत्रेण पर्वतेन च।
तपस्तप्तं बहोः कालात् कालकालकृपाप्तये॥५॥

कलौ युगे च सम्प्राप्ते पण्डिताराध्य एव च।
शिवादेशमनुप्राप्य मल्लिकार्जुनलिङ्गतः॥६॥

माघे कृष्णे चतुर्दश्यां शिवरात्रौ महानिशि।
लिङ्गोद्भवस्य वेलायां लिङ्गात्प्रादुर्बभूव ह॥७॥

सुधाकुण्डाख्यसुक्षेत्रे कृते संस्थापिते किल।
सूर्यसिंहासने तत्र ह्युपविश्य महागुरुः॥८॥

शक्तिपातं समीक्ष्यैव वर्णभेदं वनै च।
दीक्षया चेष्टलिङ्गं वै दत्त्वा सर्वोपकारकृत्॥९॥

दीक्षां शिक्षां प्रदायैव शिवाद्वैतं प्रबोध्य च।
धर्मं श्रीवीरशैवं च स्थापयामास भूतले॥१०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पण्डिताराध्यसच्छिष्यःसदानन्दो जगद्गुरुः।
तपःशक्त्या समुद्दीप्तः ख्यातनामा बभूव ह।।११।।

एकदा श्वेतपुत्रो हि रुग्णः पिङ्गळनामकः।
पीडितःकुष्ठरोगेण सन्नार्तो गुरुमाययौ।।१२।।

गलितं रक्तहीनं च पिङ्गलं हि जगद्गुरुः।
दृष्ट्वा ह्यभयदानेन निवास्य स्वकसन्निधौ।।१३।।

दत्त्वा पादोदकं तस्मै सुप्रसादं तथैव च।
कुष्ठं निवार्य तं चैव रोगमुक्तं चकार ह।।१४।।

पिङ्गळो हि तदा तुष्टः प्रणिपत्य गुरुं तदा।
भवरोगनिवृत्त्यर्थं विनयादब्रवीद् वचः।।१५।।

बाह्यं चाध्यात्मिकं दुःखं निवृत्तमधुना खलु।
दुःखत्रयाभिघातार्थं दीक्षां मे देहि सद्गुरो।।१६।।

पिङ्गळस्य वचः श्रुत्वा सदानन्दो जगद्गुरुः।
विधाय त्रिविधां दीक्षां लिङ्गत्रयमुपादिशत्।।१७।।

अष्टावरणसंपन्नः पञ्चाचारपरायणः।
षट्स्थलेनैव मार्गेण चरन् मुक्तो बभूव सः।।१८।।

ततः श्रृणुत यूयंहि भवरोगभयान्विताः।
आप्नुत दीक्षया शुद्धिं सान्निध्यं प्राप्य सद्गुरोः।।१९।।

गुरोर्माहात्म्यमेतद्धि स्कान्दे व्यासेन वै किल।
लिखितं विस्तरेणैव द्रष्टव्यं चादरेण तत्।।२०।।

एकदा हि सदानन्दः शिवाचार्यो जगद्गुरुः।
समपीठान् समाहूय चकारात्र महोत्सवम्।।२१।।

भित्तिषु मन्दिराणां हि शिलासु चित्रितानि च।
उत्सवस्य विचित्राणि दृश्यन्ते ह्यधुनापि च।।२२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आचार्या आगताःपञ्च मठान् संस्थाप्य तत्र वै।
बहुकालमुषित्वा च पुनः स्वस्थानमागताः।।२३।।

घण्टामठस्तथा चैव नन्दुलमठ एव च।
रुद्राक्षाख्यो मठश्चैव सारंगमठ एव च।।२४।।

चतुर्णामपि पीठानां शाखारूपेण संस्थिताः।
अद्यापि प्रविभासन्ते मल्लिनाथस्य सन्निधौ।।२५।।

एकदा हि महायोगी शिवानन्दो जगद्गुरुः।
मल्लिकार्जुननामानं शिष्यमाहूय स्वान्तिकम्।।२६।।

स्वकीयमधिकारं च तस्मै दत्त्वा स्वयं खलु।
शिवयोगेन मार्गेण शिवसायुज्यमाप्तवान्।।२७।।

जङ्गमोपाधियुक्तोऽयं मल्लिकार्जुनसद्महागुरुः।
पाण्डित्ये शिवयोगे च प्रभुत्वं प्राप्तवानसौ।।२८।।

आचार्याणां हि पाण्डित्यं महिमा शिवयोग-भूः।
कविना नन्नचूडेन ह्यनुभूतो निरन्तरम्।।२९।।

अतःस्वरचितं काव्यं ह्यान्ध्रभाषामयं खलु।
कुमारसम्भवं नाम ह्यर्पितं गुरुवे किल।।३०।।

सूर्यसिंहासने तत्र शिवागमविशारदः।
चन्द्रगुण्डशिवाचार्यः ख्यातनामा बभूव ह।।३१।।

मुदनूरुमहाज्ञानी दासिमार्यो महाकविः।
एतैरेव महाचार्यैः शिवतत्त्वमबुध्यत।।३२।।

कलौ युगे च पीठेऽस्मिन् गुरुशिष्यपरम्परा।
वर्तते च ह्यनूचाना दीपज्योतिर्निरन्तरम्।।३३।।

मुख्याचार्यास्त्रयस्त्वेषु पण्डितत्रयसंज्ञकाः।
तेषां संक्षेपतो वक्ष्ये चारित्र्यमुत्तमोत्तमम्।।३४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रथमःश्रीपतिःप्रोक्तो द्वितीयो मञ्चणः खलु।
मल्लिकार्जुननामाऽयं तृतीयः परिकीर्तितः।।३५।।

शिवभक्तो महायोगी श्रीपतिःपण्डितःखलु।
बध्वाग्निं पट्टवस्त्रे च लीलां कृत्वा महत्तराम्।।३६।।

शिवभक्तस्य श्रेष्ठत्वं प्रतिपादितवान् मुहुः
लिखितं श्रीकराख्यं हि भाष्यं श्रीपतिना खलु।।३७।।

व्यासीयसर्वसूत्राणां शिवाद्वैतपरं परम्।
भाष्यं तच्छ्रीकराख्येन निर्मितं विश्रुतं भुवि।।३८।।

आन्ध्रस्थे नगरे तत्र बेजवाडे महत्तरे।
उपविश्य शमीवाट्यां भाष्यं तल्लिखितं महः।।३९।।

एतद् भक्तेर्हि माहात्म्यं मल्लेशस्य शिवालये।
शिलायां लिखितं चास्ति द्रष्टव्यं भक्तितत्परैः।।४०।।

कविभिः सोमनाथाद्यैः चारित्र्यं श्रीपतेः किल।
लिखितं चान्ध्रभाषायां प्रसिद्धिस्तु गृहे गृहे।।४१।।

मञ्चणस्य महती जाता ख्यातिरान्ध्रे तु सूत्तमा।
अद्य यावत् प्रसिद्धिस्सा श्रूयते श्राव्यतेपि च।।४२।।

तृतीयः पण्डिताख्यो हि मल्लिकार्जुन एव च।
साहित्यं विपुलं चान्ध्रे लिलेख च महागुरुः।।४३।।

ईश्वराख्यशिवाचार्यशिष्यःप्रतापरुद्रकः ।
सप्ततिग्रामकं दत्त्वा दानपत्रमदात् खलु।।४४।।

जडेशंकरनाम्ना वै प्रसिद्धो हि जगद्गुरुः।
सिद्धीनां निलयश्चासीद्योगस्यैव बलेन च।।४५।।

एकदा स महायोगी तुङ्गभद्रां नदीं तदा।
कम्बले चोपविश्यैव भक्तानुत्तारयत् किल।।४६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



एवमेवास्य पीठस्य सर्वेऽपि गुरवः खलु।
ज्ञानेन तपसा चैव लोकमङ्गलमाचरन्।।४७।।

धर्मविप्लववेलायां पीठाधीशास्तदा किल।
कर्नूले ह्यात्मकूरे च गुन्तकल्लपुरे तथा।।४८।।

उपपीठानि संस्थाप्य ररक्षुस्ते परम्पराम्।
यात्रायां ह्युपपीठेषु गुरवो निवसन्ति हि।।४९।।

भिक्षावृत्तिशिवाचार्यःपीठस्यास्य जगद्गुरुः।
काश्यामायोजितायां च सभायां समुपस्थितः।।५०।।

पञ्चपीठमहाचार्यसम्मेलनमिदं खलु।
अपूर्वमभवत्तत्र विश्वाराध्यस्य सन्निधौ।।५१।।

सर्वप्रान्तीयभक्ताश्च शिवाचार्यास्तथैव च।
शास्त्रज्ञाःशास्त्रिवर्याश्च सर्वेऽत्र समुपस्थिताः।।५२।।

अपूर्वायां सभायां च निर्णया बहवः खलु।
समाजोत्थानविषया निर्णीतास्तत्र वै किल।।५३।।

सर्वत्रात्र भवन् साक्षी भिक्षावृत्तिमहागुरुः।
भिक्षावृत्तिगुरोः शिष्यो मुख्यो वागीशसद्गुरुः।।५४।।

उपपीठेऽभिषिक्तः स गुन्तकल्लस्थिते खलु।
द्वादशाधिकवर्षाणि काश्यां स्थित्वा ह्ययं खलु।।५५।।

अधिगम्य सुपाण्डित्यं जगद्गुरुपदे स्थितः।
स्वातन्त्र्यस्य च संग्रामे देशभक्तिं समर्प्य च।।५६।।

मातृभूमेऋणान्मुक्तो वागीशो हि जगद्गुरुः।
साहित्यादिषु शास्त्रेषु कृतभूरिपरिश्रमः।।५७।।

कवित्वमधिगम्यासौ जातः शास्त्रकविः खलु।
रचितानि च काव्यानि भाषासु विविधासु च।।५८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आयुर्वेदे महाज्ञानी चिकित्सन् प्रत्यहं किल।
यावज्जीवं स भक्तानां निदाने निरतोऽभवत्।।५९।।

संचरन् सततं योगी सर्वप्रान्तेषु वै खलु।
प्राचार्यो धर्मतत्त्वस्य ख्यातनामा बभूव ह।।६०।।

कन्नडे संस्कृते चैव ह्यान्ध्रे हिन्द्यां तथैव च।
लेखने भाषणे चैव गतिस्तेषामबाधिता।।६१।।

पीठे च ह्युपपीठेषु यात्रासौविध्यहेतवे।
अन्नक्षेत्रं समारब्धं वागीशगुरुणा खलु।।६२।।

सर्वासामेव विद्यानां विकासार्थमनेन यत्।
संस्थाप्य विविधाः संस्थाः कार्यं गुरुतरं हि तत्।।६३।।

बाबूराजेन्द्रनामानं राधाकृष्णं तथैव च।
राष्ट्रपतिद्वयम् पीठे चाहूयानेन सन्ततम्।।६४।।

क्षेत्रस्य प्रविकासो हि कृतो बहुमुखःशुभः।
पीठाचार्यसुमेधावी ह्यजरामरतां गतः।।६५।।

चत्वारिंशच्च वर्षाणि कार्यं कृत्वा महत्तरम्।
आचार्यसन्निधौ पीठे ह्यभ्यसेचदुमापतिम्।।६६।।

पञ्चवर्षाणि यावच्च दर्शयित्वा सुमार्गकम्।
सामरस्यं समावाप्य कीर्तिकायो विभासते।।६७।।

उमापतिशिवाचार्या विद्वांसो वाग्मिनःखलु।
हसन्मुखाश्च निर्वैराः राजहास्यप्रियाःकिल।।६८।।

पुराणपटवो ह्येते शिष्यहृत्तापहारकाः।
प्रसार्य धर्मतत्त्वं हि भक्तप्राणायिता बभुः।।६९।।

काश्यां यदायदा जातं धर्मसम्मेलनं शुभम्।
तदा तदा समागत्य भक्तान् उद्धृतवानसौ।।७०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वास्थ्यस्य व्यत्ययादेव शिष्यं स्वं मृगयन्नयम्।
सिद्धरामशिवाचार्यो हिप्परगिमठाधिपः।।७१।।

क्षेत्रस्य च यडूरस्य काडसिद्धेश्वरस्य च।
मठाधिपो महाज्ञानी सदा भक्तहिते रतः।।७२।।

कुलीनःशास्त्रवेत्तेति चिन्तयित्वा मुहुर्मुहुः।
सुयोग्य इति निर्णीय मृत्युपत्रं लिलेख ह।।७३।।

पश्चात् सर्वेषु पीठेषु निवेद्य तान्निमन्त्र्य च।
पीठे श्रीशैलके तत्र पण्डिताराध्यसन्निधौ।।७४।।

मुहूर्ते च शुभे श्रीमान् उमापतिजगद्गुरुः।
अभिषिच्य स्वकं शिष्यं पट्टबन्धं विधाय च।।७५।।

मुकुटं स्वर्णिमं तस्य परिधाय च मस्तके।
दण्डं कमण्डलुं दत्त्वा नूत्नं नाम समादिशत्।।७६।।

चन्नश्च सिद्धरामश्च पण्डिताराध्य एव च।
जगद्गुरुस्वरूपेण पीठे तत्राद्य राजते।।७७।।

गुरुनिष्ठःकविर्वाग्मी ह्यागमार्थविशेषवित्।
दर्शने चक्रवर्ती च शास्त्रार्थज्ञो विचक्षणः।।७८।।

पाण्डित्यस्य प्रकर्षेण ह्यभ्यासस्य बलेन च।
प्राप्ता श्रीसिद्धरामेण पण्डिताराध्ययोग्यता।।७९।।

काश्यां गुरुकुले स्थित्वा विश्वाराध्यस्य सन्निधौ।
अधीतवानयं शास्त्रं गुरूणां कृपया महत्।।८०।।

उमापतिगुरोरेव कारुण्येनैव केवलम्।
भक्तोद्धारं सदा कुर्वन् चरत्येव निरन्तरम्।।८१।।

वीरभद्रो महातेजा दक्षाध्वरविनाशकः।
यडूरे च महाक्षेत्रे लिङ्गरूपेण राजते।।८२।।

वीरभद्रालयस्यास्य विस्तारं हि शनैः शनैः।
कुर्वन्नेव महाचार्यो भक्तवन्द्यो बभूव ह।।८३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



क्षेत्रे भक्तनिवासार्थं बहूनि भवनानि च।
निर्मितानि प्रसादार्थमन्नक्षेत्रं महत्तरम्।।८४।।

साङ्गानां सर्ववेदानामध्ययनार्थमेव च।
क्षेत्रे गुरुकुलं भव्यं नव्यं संस्थापितं महत्।।८५।।

यद्दूरे च महाक्षेत्रे कोटिबिल्वार्चनादिकम्।
कृत्वा धार्मिककार्याणि क्षेत्रकीर्तिमवर्धयत्।।८६।।

द्वादशाब्दसुसाफल्यं पीठारोहस्य यन्महत्।
तदर्थमधुना चैव समारब्धो महोत्सवः।।८७।।

तस्यैव स्मरणार्थं च बृहती योजना खलु।
गुरुणाऽऽयोजिता सम्यक् लोककल्याणकारिणी।।८८।।

कंबीसेवारतानां च निवासमण्टपं किल।
यात्रिणामनुकूलार्थं यात्रार्थिनिलयं तथा।।८९।।

रोगिणामुपचाराय चिकित्सालयमद्भुतम्।
वेदवेदाङ्गतन्त्राणां शिक्षणस्यकुलं महत्।।९०।।

आङ्गलमाध्यमशालायाःस्थापनार्थमहर्निशम्।
प्रान्तेषु किल सर्वेषु संचरन्नस्ति वै गुरुः।।९१।।

आन्ध्रीयसर्वकारोऽपि गुरुसंकल्पसिद्धये।
अकरोद्भूरिभूदानं सन्तुष्टोऽभूद् जगद्गुरुः।।९२।।

सर्वप्रान्तीयभक्ताश्च दानं दत्त्वा महत्तरम्।
जगद्गुरुकृपां प्राप्य सर्वे धन्याबभूविरे।।९३।।

सूर्यसिंहासनस्यास्य गुरूणां कृपया खलु।
योजनाः सर्व एवैते यान्तु पूर्णत्वमेव च।।९४।।

चन्नश्रीसिद्धरामेण पण्डिताराध्ययोगिना।
सूर्यपीठस्य सत्कीर्तिर्वर्धिता वर्धतां सदा।।९५।।

त्रिलिङ्गक्षेत्रे श्रीशैलशिखरे मल्लिकार्जुनज्योतिर्लिङ्गे कलौ युगे मल्लिकार्जुनलिङ्गातः श्रीमान् पण्डिताराध्यः उद्बभौ। माघकृष्णचतुर्दश्यां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



महाशिवरात्रौ लिङ्गात् प्रादुर्भूते तस्मिन् सुधाकुण्डक्षेत्रं सूर्यसिंहासनपीठेन समलाङ्कृतम् अभूत्। श्रीमान् पण्डिताराध्यः दीक्षादानेन शक्तिपातविधानेन शिवाद्वैतप्रबोधनेन च इष्टलिङ्गपूजापरायणं श्रीवीरशैवधर्मं भूतले प्रतिष्ठापयामास। तस्य शिवयः सदानन्दः शिवाचार्यः पिङ्गलं रोगपीडितं मुक्तरोगं विधाय तेन प्रार्थितः तस्मै त्रिविधां दीक्षां प्रदाय तम्अनुगृहीतवान्। सोऽयम् अष्टावरणसम्पन्नः पञ्चाचारपरायणः षट्स्थलेन मार्गेण पर्यटन् एकेनैव जीवनेन मुक्ति समवाप। एष शिवाचार्यः सदानन्दः शैवपीठगुरून् आहूय महोत्सवं चकार। आगतैः आचार्यैः घण्टामठः नन्दुलमठ; रुद्राक्षमछ'' सारंगमठश्चेति पीठशाखारूपेण मल्लिनाथसन्निधौ राजन्ते। भगवान् शिवानन्दः स्वम् अधिकारं मल्लिकार्जुनशिष्याय प्रदाय शिवयोगमार्गेण शिवसायुज्यं समवाय। मल्लिकार्जुनसद्गुरोः पाण्डित्यं महिमानं च अनुभवन् नन्नचूडः कविः आन्ध्रभाषामयं कुमारसम्भवं रचयित्वा मल्लिकार्जुनगुरवे समर्पितवान्। सूर्यसिंहासनपीठे विश्रुतात् चन्द्रगुण्डशिवाचार्यात् शिवतत्त्वं बुद्ध्वा महाकविः मुदनूरुःमहाज्ञानी समभवत्। अस्य पीठस्य पण्डितत्रयसंज्ञका; आचार्याः प्रथन्ते— प्रथमः श्रीपतिः, द्वितीयः मञ्चणः, तृतीयः मल्लिकार्जुनः। श्रीपतिः पटवस्त्रे अग्निं बद्ध्वा लीलां समाचरति स्म। अनेन शिवाद्वैतपरं श्रीकरभाष्यं ब्रह्मसूत्राणां निर्मितम्। सोमनाथादिकविभिः श्रीपतेः चरितम् आंग्लभाषायां लिखितं गृहे गृहे प्रसिध्यति। तद्वत् मञ्चणस्य मल्लिकार्जुनस्य च आंगलभाषया विपुलं साहित्यं आन्ध्रे प्रसिध्यति। विश्रूयते।

## श्री शैलपीठ का कलियुग का इतिहास

त्रिलिंग क्षेत्र के श्री शैल शिखर पर मल्लिकार्जुन ज्योतिर्लिङ्ग से कलियुग में श्रीमान पंडिताराध्य प्रकट हुए उन्होंने सूर्यसिंहासनपीठ को अलंकृत किया। दीक्षा, शक्तिपात एवं शैवधर्मप्रबोधन से उन्होंने श्री वीरशैवधर्म को भूतल पर प्रतिष्ठापित किया। उनके शिष्य शिवाचार्य सदानन्द रोग पीड़ित पिंगल को मुक्त रोग से मुक्तकर तीन प्रकार की दीक्षा प्रदान की। वह आगे चलकर अष्टावरण सम्पन्न पञ्चाचार्य परायण रहकर, षट्स्थल मार्ग से विचरण करता हुआ एक ही जीवन से मुक्ति को प्राप्त कर लिया।

सदानंद शिवाचार्य जी ने सभी शैवपीठ गुरुजन को बुलाकर महोत्सव संपन्न किया। समागत आचार्यों द्वारा क्रमशः घंटामठ, नंदुलमठ, रूद्राक्षमठ और सारंगमठ की स्थापना हुई। शिवानंद महास्वामी ने अपने शिष्य मल्लिकार्जुन को उत्तराधिकारी बनाकर स्वयं शिव सायुज्य को प्राप्त हुए।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मल्लिकार्जुन शिवाचार्य के पाण्डित्य और महिमा का अनुभव कर नन्नचूड़ कवि ने आंध्रभाषा में कुमारसम्भव की रचना की और मल्लिकार्जुन गुरु को समर्पित किया। सूर्यसिंहासन पीठ के प्रसिद्ध शिवाचार्य चंद्रगुंड से शिवतत्व का प्रबोधन प्राप्त कर महाकवि मुदनुरू महाज्ञानी बने। इस पीठ के तीन आचार्य बहुविश्रुत हुए।

(१) श्रीपति

(२) मंचण

(३) मल्लिकार्जुन

श्रीपति सद्गुरु तो वस्त्र में अग्नि को बाँधकर लीला करते थे। इन्होंने ब्रह्म सूत्र के ऊपर शिवाद्वैतपरक श्रीकरभाष्य की रचना की थी। सोमनाथ आदि कवियों के द्वारा श्रीपति के चरित को अंग्रेजी में लिखा गया जो घर-घर में सुप्रसिद्ध है। आंध्र में इनके ही समान मंचण और मल्लिकार्जुन के भी विपुल साहित्य निर्मित एवं प्रसिद्ध हैं।

॥इति द्वादशाध्यायः॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ॥ त्रयोदशाध्यायः ॥

## ।।श्रीमत्काशीपीठस्य कलियुगीनमैतिह्यम्।।

विश्वेशलिङ्गसम्भूतं विश्वविद्याविबोधकम्।
विश्ववन्द्यं सदा वन्दे विश्वाराध्यं जगद्गुरुम्।।१।।

आनन्दकानने रम्ये गङ्गायाःपश्चिमे तटे।
विश्वेश्वरेण नाम्ना सज् ज्योतिर्लिङ्गं विराजते।।२।।

शिवरात्रौ शिवादेशात् कलौ युगे महानिशि।
शिवलिङ्गसमुद्भूतो विश्वाराध्यो जगद्गुरुः।।३।।

तदा विस्मितभक्तेभ्यो ह्यवतारप्रयोजनम्।
उक्त्वा स विस्तरेणैव सर्वानाश्वासयन् किल।।४।।

आजगाम स्वकं पीठं वने बैल्वे स्थितं परम्।
आनन्दकानने तत्र ज्ञानसिंहासनं खलु।।५।।

अधिष्ठाय महापीठे वीरशैवमतं परम्।
संस्थाप्य तत्प्रचारार्थं मठानस्थापयत् खलु।।६।।

शतैकादशवर्षाणि सञ्चरन् क्षितिमण्डले।
काश्मीरे सैन्धवे चैव गान्धारे गुर्जरे तथा।।७।।

नेपाले उत्कले चैव प्रयागे गाङ्गसन्निधौ।
एवमेव गयायां वै पंजाबे च तथैव च।।८।।

प्रान्तेष्वयमनेकेषु दिव्यान् संस्थाप्य सन्मठान्।
दीक्षयित्वा जनान् सर्वान् धर्मतत्त्वमबोधयत्।।९।।

पूर्णकुम्भस्य वेलायां विश्वाराध्यो जगद्गुरुः।
समपीठान् समाहूय प्रयागे संगमे खलु।।१०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शाहीस्नानं ततः कृत्वा बृहत् सम्मेलनं किल।
गङ्गातटे समायोज्य धर्मतत्त्वमबोधयत्।।११।।

मठे जङ्गमवाडीस्थे ह्याचार्यैःपञ्चकैस्तदा।
संस्थापितं बृहल्लिङ्गं प्रयागराजनामकम्।।१२।।

ततः सर्वे महाचार्या व्योममार्गेण वै किल।
काशीक्षेत्रं समागत्य जाह्नवीस्नानपूर्वकम्।।१३।।

गङ्गापूर्णैस्ततःकुम्भैः ह्याचार्यपञ्चकैः किल।
विश्वनाथाभिषेको हि कृतो मङ्गलकारकः।।१४।।

ततः सर्वे महाचार्या वनं बैल्वं समागताः।
तत्रस्थे ज्ञानपीठे च ह्युपविश्य ततो जनान्।।१५।।

वीरशैवमहाधर्मं सम्बोध्य सकलान् तदा।
लिङ्गदीक्षां शुभां दत्त्वा समुद्धारपरायणाः।।१६।।

पञ्चाचार्या हि ते सर्वे काश्यां सम्मिल्य वै तदा।
ज्ञानं तज्जानपीठे च बहुकालमुपादिशन्।।१७।।

माघे कृष्णे चतुर्दश्यां शिवरात्रौ महानिशि।
विश्वपण्डितयोरेव प्राकट्योत्सव एव च।।१८।।

वैभवेन महापीठे भक्तैः सम्मिल्य वै खलु।
आचरन्तः शिवाचार्याः सर्वे सन्तोषमाप्नुयुः।।१९।।

रेवणादिमहाचार्याः काशीपीठे महत्तरे।
स्वस्मारकाणि लिङ्गानि विधिनाऽस्थापयन्मुदा।।२०।।

सोमेश्वरादिलिङ्गानि तदा संस्थापितानि तैः।
अद्यापि च महापीठे पूज्यन्ते हि निरन्तरम्।।२१।।

काशीं समागताःसर्वे विश्वाराध्येन सत्कृताः।
पीठाचार्याः स्वकं पीठं प्रत्यागत्य सुसंस्थिताः।।२२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आनन्दकानने श्री काश्यां उत्तरवाहिन्याः भागीरथ्याः पश्चिमतीरे शिवरात्रौ विश्वेशलिङ्गाद् उद्भूतो विश्वाराध्यो जगद् गुरुः कलियुगे स्वंज्ञानसिंहासनं समधिष्ठाय वीरशैवधर्मं संस्थापयन् प्रचारार्थं मठानां स्थापनां कुर्वन् एकादशशतवर्षं काश्मीरे सिन्धुतीरे, गान्धारे, गुर्जरप्रान्ते उत्कले प्रयागे, नेपाले गयायां पंजाबप्रदेशे संचरन् मठान् विविधान् स्थापयन् कदाचिद् प्रयागसंगमे सर्वपीठान् आहूय शाहीस्नानपुरःसरं वृत्सम्मेलनमायोज्य धर्मतत्त्वप्रबोधनान्तरं जङ्गमवाडीमठाभ्यन्तरं प्रयागराजनामकं बृहल्लिङ्गं स्थापितवान्।

अथ व्योममार्गेण काशीं समागत्य सर्वे महापीठानाम् आचार्याः जाह्नवीस्नानं विश्वनाथाभिषेकं च विधाय ज्ञानपीठे उपविश्य वीरशैवमहाधर्मं सम्बोधयन्तः लिङ्गदीक्षां च विदधानाः बहुकालमुषित्वा श्री विश्वाराध्य-श्रीपण्डिताराध्ययोः प्राकट्योत्सवं विधाय रेवणादिमाचार्यैः सोमेश्वरादिलिङ्गस्थापनादूर्ध्वं श्रीविश्ववाराध्येन सत्कृताः काशीतः स्वंस्वं पीठं प्रतिनिवृत्ता बभूवुः॥१-२२॥

विश्वाराध्यो महाचार्यो धर्मकार्यं प्रपूर्य च।
मल्लिकार्जुनशिष्याय स्वाधिकारमदात् शुभम्॥२३॥

अनन्तरं महाचार्यो शिवादेशमवाप्य च।
अन्तर्दधे शुभे लिङ्गे विश्वनाथे महत्तरे॥२४॥

विश्वाराध्यगुरोःशिष्यस्तपःपूतो महाद्युतिः।
सिद्धान्तागममर्मज्ञो गुरुःश्रीमल्लिकार्जुनः॥२५॥

कारुण्येन गुरोरेव पुण्येन तपसा श्रिया।
सर्वेषां सुजनानां स कल्याणमकरोत् किल॥२६॥

अयं हि परमाचार्यो प्रयागं च गयां तथा।
नेपालं व्योममार्गेण गच्छति स्म दिने दिने॥२७॥

कलौ वर्षशतं चायुर्निर्दिष्टं पुरुषस्य च।
अथापि योगसंसिद्धो दीर्घजीवी भवत्यपि॥२८॥

शतत्रयमितं ह्यायुर्वर्षमेकादशाधिकम्।
कलौ कृत्वा च कल्याणं जित्वा कालं करालकम्॥२९॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



संजीवनीसमाधिं स योगस्यैव बलेन च।
गृहीत्वाऽव्यक्तरूपेण योगक्षेमं वहत्यसौ।।३०।।

अपारो महिमा यस्य योगधृक् स्वबलेन सः।
भक्ताभीष्टप्रदो भूत्वा निर्विकल्पोऽत्र राजते।।३१।।

भक्ताः सर्वेऽपि तं भक्त्या गुरुं श्रीमल्लिकार्जुनम्।
गादीस्वामीति नाम्ना वै भावयन्तो भजन्ति हि।।३२।।

अर्ध धर्मकार्यं प्रपूर्च्च महाचार्यो विश्वाराध्यः स्वशिष्याय मल्लिकार्जुन बुधाय उत्तराधिकारं प्रदाय श्रीविश्वनाथलिङ्गे लयलीलामन्वतिष्ठत्। श्रीमल्लिकार्जुनो योगी श्रीगुरुकृपया प्रयागं गयां नेपालं च स्वैरं गमनागमनादिना भ्रमन् ३११ वर्ष यावत् धर्मप्रचारं कल्याणकार्याणि चानुतिष्ठन् योगबलेन संजीवनसमाधिंगृहीत्वा जङ्गमवाडीमठमालोकयन् अव्यक्तरूपेण योगक्षेमं निर्वहति। भक्ताभीष्टप्रदस्यास्य गादीस्वामीति नाम्ना भजन्तः भावयन्तश्च निःश्रेयसं श्रेयांसि च प्राप्नुवन्ति।।२३-३२।।

तत्पश्चादागताःसर्वे सप्तसप्ततिसंख्यकाः।
पीठाचार्याश्च तन्नाम्ना विख्याता जगतीतले।।३३।।

एते सर्वे महाचार्या योगशक्तिसमन्विताः।
कार्यं गुरु स्वके काले कृतवन्तो महत्तरम्।।३४।।

पञ्चाशत्तम आचार्यः श्रीगुरुर्मल्लिकार्जुनः।
जयनन्दनरेशेन काशीराजेन पूजितः।।३५।।

एकदा श्रीनरेशेन मृतानां मोक्षमिच्छुना।
भूमिदानं कृतं तेन मल्लिकार्जुनयोगिने।।३६।।

मन्दिराद्गाङ्गपर्यन्तं कर्दमेश्वरनामका।
प्रदत्ता सर्वकल्याणमिच्छता भूमिरुज्ज्वला।।३७।।

प्रबोधिन्यां तु तद्दानमेकादश्यां तिथौ किल।
दानपत्रेण साकं हि दत्तं पुण्ये सुपर्वणि।।३८।।

देवनागरलिप्यां हि कर्गजे लिखितं हि तत्।
अद्यापि च महापीठे महद्भाग्येन रक्षितम्।।३९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तस्यैव दानपत्रस्य सत्या प्रतिलिपिःखलु।
प्रभुनारायणेनैव दत्ता तत्ताम्रपत्रके।।४०।।

तद्भूमौ स्थापितो ग्रामो जङ्गमपुरनामकः।
अद्यापि वर्तते ग्रामः काश्यां सर्वश्रुतः खलु।।४१।।

प्राचीनोऽत्र समाधिस्तु पूर्वाचार्यस्य वै किल।
तद् ग्रामे वर्तते सोऽयं भक्तैः सर्वैः प्रपूज्यते।।४२।।

विश्वमल्लो महाराजो नेपालस्य महाप्रभुः।
भक्तपुरे च नेपाले दत्तवान् दानमुत्तमम्।।४३।।

लिखितं श्रीशिलापट्टे दानपत्रं महत्तरम्।
जङ्गमाख्यमठे तत्र राजते भ्राजते शुभम्।।४४।।

सप्तसप्ततिसंख्याका गुरवो मल्लिकार्जुनाः।
संबभूवुस्तपःसिद्धा भक्ताभीष्टप्रदाः किल।।४५।।

अभवन् पीठसद्भक्ता राजानो हैन्दवो यथा।
अभूवन् तादृशा भक्ता हुमायुयवना नृपाः।।४६।।

खिष्टस्य षोडशाब्दे च यवनानां प्रशासने।
तत्यजुः पीठभक्तिं नो राजानो भक्तितत्पराः।।४७।।

भक्त्या दत्त्वा च भूदानं दानपत्रं विलिख्य च।
काले काले तथा सर्वैर्दत्तं पत्रं महत्तरम्।।४८।।

राजा ह्यौरंगजेबश्च पीठद्वारे महत्तरे।
गुरोः कृत्यं चमत्कारि ह्यनुभूय प्रभावितः।।४९।।

स्वानुभूतिं समुल्लिख्य दत्त्वा दानं महत्तरम्।
गुरोः सान्निध्यमागत्य रक्षां प्रार्थितवान् मुदा।५०।।

सर्वैर्यवनभूपैश्च यानि दत्तानि तानि च।
दानपत्राणि सर्वाणि मठेऽद्यापि लसन्ति हि।।५१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



काशीस्थोऽयं महापीठः काश्यामाद्यःप्रकीर्तितः।
पूजितः सर्वधर्मीयैः सनातन इतीर्यते।।५२।।

महनीये महापीठे ज्ञानसिंहासने किल।
ज्ञानिनो योगसिद्धाश्च ह्यभवन् गुरवःखलु।।५३।।

श्रीमल्लिकार्जुनमहाचार्याणां क्रमिकपरम्परायाम् ७७संख्याकाः श्रीमल्लिकार्जुननाम्नैव पीठाचार्याः सन्तः योगबलेन गुरु धर्मकार्यं कृतवन्तश्चकासिरे। एषु ५० तमः श्री मल्लिकार्जुनगुरु श्री जयनन्द-काशराजितः भूमिदानस्वरूपं मन्दिरादाभ्य गङ्गतीरं यावद् कदमेश्वरसंज्ञिकां बृत्परिमाणात्मिकां भूमिं लेभे। तदीयं देवनागरीलिप्या लिखितं दानपत्रं तदीयताम्रपत्र लिखितं प्रतिलिपिदानपत्रं प्रभुनारायणेन प्रदत्तं जङ्गमवाडीमठे सुरक्षितं विद्यते। तद्भूमिमध्ये ज्गमपुरनामा ग्रामो विद्यते। काश्यां जङ्गमपुरमध्ये प्राचीन पूर्वाचार्यसमाधिः अद्यापि समर्च्यते। तत्समवालमेव नेपालस्य महाराजविश्वमल्लेन भक्तपुरे (नेपाले) यद् भूमिदानं कडतं तदीयं शिलापट्टसमङ्कितं दानपत्रं जङ्गमवाडीमठे संराजते।

तदेवं ७७ संख्याकाः श्री मल्लिकार्जुन महाचार्याः तपःसिद्धा स्वस्वसमये वर्तमानैः सनातन हिन्दू राजभिरेवनं प्रत्युत् यवनशासकेनापि ुमायु प्रभृतिना सत्कृताः। यवनराजभिरपि दानपत्रलेखनपुरःसरं भूदानमाचरितमासीत्। स्वयम् औरंगजेबराज्ञापि श्रीमहाचार्यकृपया चमत्कृतेन स्वरक्षां प्रार्थितवता दानपत्रसहितं दानं वितिमासीत्। तदेवम् ज्ञानसिंहासनपीठस्य महामहिम्नः काशीमध्ये आद्यता भव्यता च देदीप्यमाना चकास्ति।।३३-५३।।

शिवलिङ्गशिवाचार्यस्तच्छिष्यस्तु हरेश्वरः।
हरेश्वरस्य शिष्यस्तु वीरभद्रो जगद्गुरुः।।५४।।

तदीयो हि महाशिष्यो राजेश्वरजगद्गुरुः।
पुनस्तदीयशिष्यःस्याच्छिवलिङ्गो जगद्गुरुः।।५५।।

शिष्यो हि शिवलिङ्गस्य पञ्चाक्षरजगद्गुरुः।
तदीयस्तु महाशिष्यो वीरभद्रजगद्गुरुः।।५६।।

वीरभद्रस्य शिष्यस्तु विश्वेश्वरजगद्गुरुः।
श्रीमान् सुज्ञश्च तच्छिष्यश्चन्द्रशेखरसद्गुरुः।।५७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अस्य जगद् गुरोः शिष्यो मल्लिकार्जुनसंज्ञकः।
एवं कलियुगे पीठस्याखण्डा हि परम्परा।।५८।।

एतेषां गुरुवर्याणामैतिह्यमधुना खलु।
लिख्यते सारतो ह्यत्र शृण्वन्तु श्रद्धया बुधाः।।५९।।

अथ श्रीशिवलिङ्गनामा शिवाचार्यः ज्ञानपीठाधिपो बभूव। तच्छिष्यः श्री हरेश्वरः श्री वीरभद्रः, श्री राजेश्वरः, श्रीशिवलिङ्गनामापरः, श्री पञ्चाक्षरः, श्री वीरभद्रनामापरः, श्री विश्वेश्वरः श्रीचन्द्रशेखरः, श्री मल्लिकार्जुनश्चेति क्रमेण पीठास्थास्य महाचार्याः जगद्गुरवो राजमानाः क्रमेणोत्तराधिकारिणं योग्यं चिन्वन्तः पीठमर्यादां परिपालयन्तः वीरशैवधर्मप्रचारप्रसारयोः संत्यग्नाः अनुभूयन्ते। तेषामैतिह्याभिमननं माहात्मयशंसनमपि महते श्रेयसे कल्पते।। ५४-५९।।

## ।।हरेश्वरजगद्गुरुः।।( ७९ )

विश्वाराध्यस्य पीठस्य एकोनाशीतिसंख्यकः।
गुरुरासीद् महायोगी हरेश्वरजगद्गुरुः।।६०।।

कर्नाटकात् समागत्य ह्यधीत्य शास्त्रकोविदः।
शिवलिङ्गगुरोश्चैव कृपाकारुण्यवर्धितः।।६१।।

योगसिद्धं तपःसिद्धं ज्ञानसिद्धं शुभप्रदम्।
सर्वसिद्धिकरं ज्ञात्वा हरेश्वरगुरुं तदा।।६२।।

काशिकेया जनाः सर्वे भक्तिभावेन सर्वदा।
मनोरथस्य सिद्ध्यर्थं सततं तं सिषेविरे।।६३।।

गच्छत्सु खलु वर्षेषु हरेश्वरगुरोःकिल।
कीर्तिस्तु धवला तस्य प्रश्रुता क्षितिमण्डले।।६४।।

सर्वदेशीयराजानो ह्यागत्य हि मठं तदा।
सत्कृपां सद्गुरोर् लब्ध्वा जग्मुस्ते कृतकृत्यताम्।।६५।।

मैसूरुनगरीराजः कृष्णराजवडेयरः।
एकदा नगरीं काशीमागत्य गुरुसन्निधौ।।६६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कृत्वा दण्डप्रणामं च विनयेन न्यवेदयत्।
स्वराजधानीमागन्तुं प्रजानां हितकाम्यया।।६७।।

राज्ञः प्रार्थनमाकर्ण्य हरेश्वरमहागुरुः।
तथेति वचनं प्रादात् लोककल्याणहेतवे।।६८।।

अथैकदा महायोगी राजेच्छापूर्तये किल।
मैसूरुनगरीं प्राप यात्रां कुर्वन्निरन्तरम्।।६९।।

आगतं तं गुरुं दृष्ट्वा राजा कृष्णवडेयरः।
स्वपुरे तत् प्रवेशार्थं तिर्यगान्दोलिकं किल।।७०।।

कृत्वा तु वैभवेनैव राजमार्गेषु वै तदा।
तृप्तस्तर्पितो चैव प्रजाः सर्वाश्च तत्क्षणम्।७१।।

गुरुभक्तिप्रभावेण परमानन्दतुन्दिलः।
पत्नीपुत्रसमेतश्च महोत्साहेन संयुतः।।७२।।

स्वराजभवने तत्र हरेश्वरमहागुरुम्।
आगमोक्तविधानेन स्वागतं व्याजहार ह।।७३।।

सिंहासने स्वकीये च ह्युपावेश्य गुरुं तदा।
धर्मपत्न्या समेतः स पादपूजां चकार ह।।७४।।

गौरवार्थं गुरोरेव भूयोभक्तिसमन्वितः।
श्वेतच्छत्रं हिरण्यं गां चामरयुगलं तथा।।७५।।

राजतानि च दण्डानि स्वाक्षरालंकृतानि च।
दत्त्वा तद्भूमिदानं च दानपत्रं ददौ तदा।।७६।।

प्रजानां धर्मबोधाय सभा ह्यायोजिता किल।
हरेश्वरगुरुस्तत्र सर्वानुद्दिश्य वै खलु।।७७।।

दुःखानां शमनोपायो धर्म इत्यभिधीयते।
ऐहिकामुष्मिकं सर्वं धर्मेणैव हि लभ्यते।।७८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



मरिष्यमाणजीवस्य मित्रं धर्म इति श्रुतः।
अतो यत्नेन कर्तव्यो केवलं धर्मसंग्रहः।।७९।।

मुम्मडीकृष्णराजेन्द्रः श्रुत्वा बोधं गुरोः किल।
प्रसन्नश्चितवान् सद्यो राजा धर्मपरायणः।।८०।।

शरीरं सर्वजीवानां साधनं सर्वकर्मसु।
अन्नेन जायते तद्धि ह्यन्नेनैव विवर्धते।।८१।।

तस्मादन्नमयः कोशः पञ्चकोशेषु गीयते।
अन्नदानान्महातृप्तिरतो ह्यन्नप्रदो भवेत्।। ८२।।

इत्थं विचिन्त्य राजैष ह्यन्नदानार्थमेव च।
स्वर्णमुद्राणि सम्प्रादात् संख्यया षट्शतानि च।।८३।।

प्रतिवर्षप्रमाणेन यावच्चन्द्रदिवाकरौ।
इत्येवं शासनं तावत् ताम्रपात्रे विलिख्य च।।८४।।

हरेश्वरगुरोस्तत्र सन्निधौ तत् समर्प्य च।
कृष्णराजेन्द्रआत्मानं कृतकृत्यममन्यत।।८५।।

पुनःप्रस्थानकाले तु गुरूणां गुरवे किल।
गजांश्च तुरगांश्चैव भूरि तद्दक्षिणां किल।। ८६।।

समर्प्य श्रद्धया राजा तुष्टस्तोषितवान् गुरुम्।
प्रसन्नःपरमाचार्यो स्थाय सर्वसद्गुरुः।।८७।।

राजोपचारं संप्राप्य हरेश्वरगुरुस्तदा।
आनन्दकाननं तावद्विवेशानन्दतुन्दिलः।।८८।।

अथ विश्वाराध्यज्ञानपीठस्य ७९तमः जगद्गुरुः श्री हरेश्वर शिवाचार्यः कर्नाटक प्रदेशात् काश्यां श्रीशिवलिङ्गशिवाचार्याद् गुरोः कृपया सम्प्राप्तज्ञानतपोयोगसिद्धिः धवलकीर्तिः पृथिवीमण्डले विश्रुतकीर्तिः धर्मयात्रां विदधानः मैसूररुनगर्यां श्रीकृष्णवडेयरनाम्ना नृपेण तिर्यगान्दोलिकसम्मानेन सम्मानितः राजानं प्रजाश्च वीरशैवधर्मं प्रबोध्य गोहिरण्य-छत्र-चामरसहित भूदान समर्चितः संबभौ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अथ मरिष्यमाण जीवस्य मित्रं धर्म इति गुरोरुपदेशमाकर्ण्य मुम्मडी कृष्णराजेन्द्रः अन्नदानात्मको धर्मो विशिष्यते इति विज्ञाय अन्नदानार्थं ६०० स्वर्णमुद्रां गुरवेन्यवेदयत्। सोऽयं काशीं प्रति प्रस्थिताय गुरवे गजतुरगादिसम्माननपुरःसरं भूरिदक्षिणादानेन श्रीगुरुंतुतोषा सन्तुष्टः श्री हरेश्वरमहाचार्यः आनन्दकाननं पुनराययौ।। ६०-८८।।

एकदा कूर्गुदेशस्य वीरशैवमहाप्रभुः।
गुरुभक्तिसमुत्कण्ठः चिक्कवीरवडेयरः।।८९।।

केनचित् कारणेनैव राजा ह्याङ्ग्लैर्विवादितः।
आङ्ग्लेन सर्वकारेण बलाद् देशाद् बहिष्कृतः।।९०।।

अत एव स्वदेशं स त्यक्त्वा राजा वडेयरः।
श्रितस्तु नगरीं काशीं पत्नीपुत्रादि-संकुलः।।९१।।

स्कन्दगोत्रीयराजाऽसौ चिक्कवीरवडेयरः।
काशीपीठं समागत्य हरेश्वरगुरोः शुभाम्।।९२।।

गृहीत्वाऽनुमतिं तत्र विश्वनाथस्य सन्निधौ।
काश्यामेव वसन्नासीद्गुरोराज्ञाबलेन हि।।९३।।

आङ्ग्लैर्विवादितो राजा न्यायप्राप्त्यै तदा तु सः।
इङ्ग्लैण्डसमागत्य ह्युच्चे न्यायालये किल।।९४।।

तत्र संस्थाप्य पक्षं स्वं तत्रैव संस्थितस्तदा।
स्वास्थ्यस्य व्यत्ययादेष तत्रैव निधनं गतः।।९५।।

शरीरं पार्थिवं तस्य जलमार्गेण वै खलु।
वाराणसीं समानीय जङ्गमवाटिकामठे।।९६।।

हरेश्वरस्य चादेशात् तत्तीव्रेच्छाबलेन च।
समाधिर्विहितस् तत्र तद्भक्तेर्गौरवात् किल।९७।।

मूलचन्दो महाशिल्पी मठस्य प्राङ्गणे तदा।
निर्ममे श्रद्धयोपेतो मन्दिरं सुन्दरं किल।।९८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वीरेश्वरेण नाम्ना वै तत्र संस्थापितं किल।
अद्यापि मन्दिरं तद्वै सर्वोत्कृष्टं विराजते।।९९।।

चिक्कवीरप्रभोरासन् महिष्यस्तिस्त्र एव हि।
गङ्गम्मा च तथा चैव देवम्मा चापरा खलु।।१००।।

नञ्जम्मा च तृतीया स्यात् नामान्येतानि वै किल।
पुत्र एको तदासीद्वै लिङ्गराजेन्द्रनामकः।।१०१।।

सर्वस्य परिवारस्य योगक्षेमं महागुरुः।
निर्वहन् परिवारं तं रक्षयामास वै किल।। १०२।।

तपस्वी योगसिद्धश्च हरेश्वरमहागुरुः।
राजभिर्बहुभिश्चैव पूजितोऽभून्निरन्तरम्।।१०३।।

राज्ञामर्थसहायेन जङ्गमवाटिकामठे।
क्षेत्रं नित्यान्नदानं च स्थापितं सुव्यवस्थितम्।।१०४।।

यात्रिणःसर्वदेशीयाः सर्वधर्मानुयायिनः।
विनैव भेदभावन्तु स्वीकुर्वन्ति प्रसादकम्।।१०५।

अध्येतारो हि शास्त्राणां ह्यनादिकालतः किल।
छात्राश्च बहवो ह्यत्र वसन्ति च महामठे।।१०६।।

छात्रेषु तेषु सर्वेषु भृत्यभावसमन्वितम्।
दृष्ट्वा तु वीरभद्रं तं हरेश्वरमहागुरुः।।१०७।।

शिष्यान् सर्वान् समाहूय मुहूर्ते शोभने किल।
शास्त्रोक्तविधिना तत्र पट्टबन्धं चकार ह।।१०८।।

विश्वाराध्यगुरोरस्य ज्ञानसिंहासनस्य च।
वीरभद्रः शिवाचार्यः पीठाशीतितमो गुरुः।।१०९।।

कदाचिद् कुर्गु देशस्य वीरशैवधर्मं समाश्रितः चिक्कवीरवडेयरो नृपः आङ्ग्लराज्ञा सह विवादे समुत्पन्ने आङ्ग्लशासकेन देशाद् बहिष्कृतः पत्नीपुत्रादिरिवृतः श्री हरेश्वरसद्गुरुं श्रीकाशीस्थं शरणमागतः श्रीगुरोराज्ञया काशीमुवास।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



न्यायप्राप्त्यर्थं राजा चिक्कवीरवडेयरः स्कन्दगोत्रीयः इंगलैंडदेशे न्यायालये गत्वा स्वपक्षं स्थापितवान् किन्तु तत्र स्थितस्य तस्य स्वास्थ्यव्यत्यासात् मृत्युमुपगतः। जलमार्गेण तदीयं पार्थिवशरीरं वाराणसीम् आनीय हरेश्वरगुरोरादेशात् जङ्गमवाटिकामठे तद्भक्तिगौरवात् समाधिः विहितः। तत्र महाशिल्पिना मूलचन्देन वीरेश्वरनाम्ना उत्कृष्टं मन्दिरं निर्मितं राजते। अस्य राज्ञः याः त्रिसः महिष्यः यश्च लिङ्गाराजेन्द्रनामा सुतः तस्य योगक्षेमं विदधानः श्री हरेश्वरगुरुः सर्वथा रक्षणं कृतवान्। श्रीहरेश्वरमहागुरोः महाप्रभावात् बहुभिः नृपैः कृतेन अर्थसहायेन मठे ज्ञानदानम् अन्नदानं च निरवच्छिन्नं प्रवर्तते। सोऽयं मागुरुः श्रीमान् हरेश्वरः सुयोग्यं वीरभद्रं शुभे मुहूर्ते सर्वेषां समक्षं विधिवत् पट्टबन्धेन नियोज्य अशीतितमं शिवाचार्यं व्यधात्। ॥८९-१०९॥

## ।। प्रथमवीरभद्रजगद्गुरुः।। (८०)

तेलङ्गानाख्यदेशे वै नैजामे मण्डले किल।
अस्ति वै बोधनं नाम नगरं चास्य जन्मभूः।।११०।।

नगरस्यास्य चैतिह्यं सनातनमितीर्यते।
काले काले च तन्नाम कारणैःपरिवर्तितम्।।१११।।

परशुहस्त रामेण त्रेतायामत्र वै किल।
तपस्तप्तो हि घोरं वै लोककल्याणहेतवे।।११२।।

भवचक्रात् समुद्धर्तुं सर्वान् जन्तून्विशेषतः।
चक्रेश्वरेण नाम्ना वै लिङ्गं संस्थापितं खलु।।११३।।

तदा प्रभृति देवेशः सुन्दरेशो महेश्वरः।।
चक्रेश्वरेण नाम्ना वै राजते भ्राजते शिवः।।११४।।

एक एव शिवो ह्यत्र नाम्ना चक्रेश्वरेण वै।
सदा समानआस्ते यद् एकचक्रपुरं ततः।।११५।।

एकचक्रपुरे तत्र नरभक्षी बकासुरः।
द्वापरे निवसन्नासीत् पीडयन्नरमण्डलम्।।११६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आततायिनमेनं हि बलशाली वृकोदरः।
द्वन्द्वे निहत्य तं तत्र भयाल्लोकविमोचकः।।११७।।

एकदा भीमसेनो वै ह्येकचक्रपुरे किल
स्वर्गादानीय चेन्द्रस्य गजमैरावतं खलु।।११८।।

प्रादात् कुन्त्यै स्वमात्रे यल्लक्ष्मीपूजामहोत्सवे।
नगरीयं ततः ख्याता नाम्नाऽसावमरावती।।११९।।

बहूनामेव धान्यानामुत्पत्तिस्थानतः खलु।
बहुधान्यपुरं चेति नाम तन्नगरस्य च।।१२०।।

बौद्धधर्मप्रभावेण तत्रत्या बहवो जनाः।
बुद्धतत्त्वमबुध्यन्त बोधनं नाम कीर्तितम्।।१२१।।

पद्मशब्दस्य कोशतः निधिरर्थोऽवगम्यते।
निधीनामागरत्वाच्च पुरं पद्मपुरं मतम्।।१२२।।

बहूनामस्य सन्नाम्नां कारणं भिन्नभिन्नकम्।
विज्ञाय लोकतो हेतुर्लिखितो लोकमङ्गलः।।१२३।।

बोधने बहवः सन्ति मठा वै नन्दिगोत्रिणाम्।
पुरातनो मठस् तत्र पुराणमठसंज्ञकः।।१२४।।

मठोऽयं पुत्रवर्गीयो चरपट्टसमन्वितः।
वर्तते सुप्रसिद्धो हि नगरे बोधने खलु।।१२५।।

तस्मिन् वंशे समुत्पन्नो विशेषांशःशिवस्य च।
महेश्वर इति ख्यातो वीरमाहेश्वरः खलु।।१२६।।

गौरी नाम्नी तु तस्यासीद् भार्या भाग्यविधायिनी।
शिवभक्तिसुधासिन्धौ निमग्नौ तावुभावपि।।१२७।।

दम्पत्योः शिवभक्त्या तु प्रसन्नो हि सदाशिवः।
तदीयफलरूपेण दत्तवान् पुत्रपञ्चकम्।।१२८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्राप्तेषु पञ्चपुत्रेषु वीरभद्रस्तु मध्यमः।
पुत्ररत्नं समालोक्य हर्षितौ तावुभावपि।।१२९।।

भविताऽयं महास्वामी बोधनस्य मठस्य च।
मनस्येवं विनिश्चित्य पाठयित्वा च बालकम्।।१३०।।

दिनशुद्धिं समालोक्य सर्वानाहूय तत्क्षणे।
विधिवद्विहितश्चैव ह्यधिकारमहोत्सवः।।१३१।।

योगस्ते सुमहानस्ति तं श्रीलो गुरुरुचिवान्
उन्नताध्ययनार्थं हि काशीं प्रेषितवान् मुदा।।१३२।।

गुरोरादेशमासाद्य बोधनस्य मठाधिपः।
वीरभद्रशिवाचार्यः श्रीकाशीं नगरीं श्रितः।।१३३।।

वीरशैवमहापीठे जङ्गमवाटिकामठे।
विवेश वीरभद्रो हि हरेश्वरमहाज्ञया।।१३४।।

योगसिद्धस् तपःसिद्धो ज्ञानसिद्धो महेश्वरः।
सर्वसिद्धिप्रदश्चासीद् हरेश्वरजगद्गुरुः।।१३५।।

तदीयच्छत्रछायायां वृद्धिमान् वीरभद्रकः।
विदुषां सन्निधिं प्राप्य विद्यामारब्धवान् किल।।१३६।।

वर्षद्वादशकं यावद् विद्वद्भ्यो बहुशः किल।
अधीत्य सर्वशास्त्राणि विद्वद्वन्द्यो बभूव ह।।१३७

कोविदं सर्वशास्त्रेषु सेवायां भृत्यभावनाम्।
दृष्ट्वा तु वीरभद्रं तं हरेश्वरमहागुरुः।।१३८।।

शिष्यान् सर्वान् समाहूय मुहूर्ते शोभने किल।
शास्त्रोक्तविधिना तत्र पट्टबन्धं चकार ह।।१३९।।

विश्वाराध्यगुरोरस्य ज्ञानसिंहासनस्य च।
अशीतितम आचार्यो भास्वानेष जगद्गुरुः।।१४०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विश्वाराध्यस्य पीठस्य गुणोदारं गुरुं किल।
प्राप्य नागरिकाः सर्वे कृतकृत्याश्चकासिरे।।१४१।।

राजाश्रयबलेनैव वीरभद्रो जगद्गुरुः।
मठे निर्मितवान् वास्तु सुन्दरं खंबमन्दिरम्।।१४२।।

राणीच्छत्रं च तावद्वै सर्वयात्रार्थिनां कृते।
निर्मितं क्षेत्रमन्नस्य मठे शाश्वतिकं खलु।।१४३।।

गणेशस्य सभागारः सुन्दरं चित्रमन्दिरम्।
तुरगानां गजानां च शालास्तत्र विनिर्मिताः।।१४४।।

हरेश्वरगुरोरेव सुन्दरं ध्यानमन्दिरम्।
एवं सर्वाणि वास्तूनि शिलाभिर्निर्मितानि च।।१४५।।

चिक्कवीरस्य राज्ञो वै मरणानन्तरं खलु।
पत्न्यः पुत्राश्च ते सर्वे मठमेव समाश्रिताः।।१४६।।

तदीयपरिवाराणां योगक्षेमादिकं किल।
वीरभद्रः शिवाचार्योऽनारतं प्रावहन्मुदा।।१४७।।

गङ्गम्मा तस्य राज्ञस्तु देवम्मा चापरा खलु।
नञ्जम्मा च तृतीया स्यात् तिस्रो राज्यस्सुमध्यमाः।।१४८।।

आसीदेकः सुतोह्येव लिङ्गराजेन्द्रनामकः।
काश्यां वसन्तः सर्वेऽपि ह्यत्रैव निधनं गताः।।१४९।।

सर्वेषां परिवाराणां लिङ्गानि स्मारकाणि च।
स्थापितानि मठे तत्र तत्तन्नाम्नेति विश्रुतम्।।१५०।।

आश्रितानां हिसर्वेषां छात्राणां यात्रिणां तथा।
योगक्षेमादिकं सर्वं निर्वहन् हि निरन्तरम्।।१५१।।

वर्षद्वादशकं यावद्वीरभद्रो जगद्गुरुः।
पीठस्य धर्मकार्यं तु निर्बाधं समपादयत्।।१५२

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



काशीक्षेत्रे तदानीं वै सर्वत्र नगरे खलु।
कालरानामको रोगो जनान् पीडयति स्म च।।१५३।।

महारोगेण तेनैव वीरभद्रो जगद्गुरुः
पीडितोऽभूत्तदानीं वै चिन्ता व्याप्ता मठे खलु।।१५४

वैद्यानां विविधानां च ह्युपचारो दिने दिने।
व्यर्थमेव तदाऽभूद्वै हीश्वरेच्छा बलीयसी।।१५५।

एवं चिन्तयतस् तस्य बटूराजेश्वरो हि यः।
स योग्य इति निश्चित्य समाहूतः समादृतः।।१५६

श्रीमान् राजेश्वरं स्नेहात् प्राह वाचं सुनिर्मलाम्।
निर्वर्तयेद् भवान् सर्वं व्याधिना ग्रसितोऽस्मियत्।।१५७।।

काशीस्थाःपण्डिताः सर्वे विश्वनाथविभूतयः।
गौरवेणैव तेषां तु साक्षाद्गौरवितः शिवः।।१५८।।

शिवरात्रिमहापर्वे सर्वानाहूय पण्डितान्।
विद्वज्जनसभां कृत्वा तोषयेद्दानकर्मणा।।१५९।

सिद्धान्तो वीरशैवानां प्रच्छन्नो ग्रन्थराशिषु।
विदुषां सहयोगेन प्रकाशय महीतले।।१६०।।

इत्यादिश्य च कर्तव्यं वीरभद्रजगद्गुरुः।
मृत्युपत्रं लिलेखाथो नाम्ना राजेश्वरस्य वै।।१६१।।

व्याधेस्तीव्रतमत्वाच्च वैफल्यादौषधस्य च।
विशेषसमयाऽभावादातुरेणैव केवलम्।। १६२।।

संक्षेपेणाभिषेकं च कृत्वैव स्वकरेण च।
किरीटं पट्टबन्धं च धारयित्वा तदा खलु।।१६३।।

विधिं सर्वं विधायैव यन्नूत्नं नाम घोषितम्।
राजेश्वरशिवाचार्य एकाशीतितमो गुरुः।।१६४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वाधिकारं हि पीठस्य शिष्यहस्ते प्रदाय च।
सद्गुरुर्वीरभद्रस्तु शिवसायुज्यमाप्तवान्।।१६५।।

राजेश्वरेण शिष्येण मन्दिरे च हरेश्वरे।
समाधिर्विहितस् तत्र यथाशास्त्रं यथाविधि।।१६६।।

गुरोः श्रीवीरभद्रस्याप्रसादाद् दीप्तिमान् मुदा।
राजेश्वरमहास्वामी पीठाध्यक्षो बभूव ह।।१६७।।

वदान्यं वैरनिर्मुक्तं वीतरागं महामतिम्।
राजेश्वरगुरुं प्राप्य सर्वे तोषमवाप्नुयुः।।१६८।।

श्रीवीरभद्रजगद्गुरुः तेलङ्गानाप्रदेशे नैजाममण्डले बोधनगरे जन्म लेभे। अत्र त्रेतायुगे परशुरामेन भगवता तपः तप्त्वा जन्तून् भवचक्रात् उद्धर्तुं चक्रेश्वरलिंगं स्थापितमासीत्। तदत्र सुन्देरेशमेश्वरः चक्रेश्वरनामा प्रथते। अद्यापि प्रतिष्ठासमकालात् समानरूपेण सर्वश्रेयः विदधाति अतः बोधननगरस्य अपरं नामधेयं विलसति एकचक्रपुरम् इति। अत्र कदाचित् नरभक्षी बकासुरः द्वापरे नरमण्डलं पीडयन् द्वन्द्वयुद्धे वृकोदरेण तः। अथ च लक्ष्मीपूजामहोत्सवे कुन्त्यै स्वर्गात् ऐरावतगजं यत् आनीतवान् भीमसेनः ततः प्रभृति एषा नगरी अमरावती नाम लेभे। बहुविधधान्यव्रीहीणां यतः उत्पत्तिस्थानं ततः बहुधान्यपुरम् इति एतदपि नाम प्रसृतम्। बौद्धकाले बहुभिः बुद्धतत्त्वस्य बोधनं प्राप्तम्। ततोऽस्य नाम बोधनगरं सञ्जातम्। अत्र नगरे नन्दिगोत्रिणां पुरातनाः मठाः अथ च चरपट्टवंशः प्रसिद्ध्यति। तत्र शिवविशेषांशः महहेश्वरः गौरी भार्यातः पुत्रपञ्चकं प्रापय। तेषु मध्यमः वीरभद्रशिवाचार्यः श्रीकाशीं समागतः हरेश्वरजगद्गुरोः आशिषा विद्वद्भ्यः आधीतसर्वशास्त्रः श्रीहरेश्वरगुरुणा ज्ञानसिंहासनस्य अशीतितमः आचार्यः उद्घोषितः। अनेन वीरभद्रेण राज्ञाम् आश्रयबलेन खम्बमन्दिरम् अन्नक्षेत्रं च निर्वाप्य गणेशसभागारः तुरगशाला गजशाला ध्यानमन्दिरं चेत्यादिकं शिलाभिर्निर्मितम्। दिवंगते चिक्कवीरे तस्य तिसृणां पत्नीनां पुत्रस्य च योगक्षेमादिकं कुर्वता समेषां तेषां स्मारक लिङ्गानि तत्तन्नाम्ना मठे स्थापितानि। तदेवं द्वादशवर्षाणि यावत् जगद्गुरुणा वीरभद्रेन धर्मकार्याणि नेकविधानि सम्पादितानि। अथ एकाशीतितमं श्रीराजेश्वरशिवाचार्यं पीठाधिकारिणं विधाय शिवसायुज्यं प्राप्तवान् वीरभद्रेश्वरः। राजेश्वरजगद्गुरुणा हरेश्वरमन्दिरे वीरभद्रशिवाचार्यस्य समाधिः विहितः॥११०-१६८॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।। राजेश्वरजगद्गुरुः ।।( ८१ )

काश्यां ख्यातस्य पीठस्य एकाशीतितमो गुरुः।
राजेश्वर इति ख्यातो जगद्गुरुपदे स्थितः।।१६९।।

## ।।जन्मस्थानस्य माहात्म्यम्।।

प्राचीने खलु काले तु ह्यान्ध्रे देशे च वै तदा।
राजधानी शुभा ह्यासीद् राजमहेन्द्रकीर्तनी।।१७०।।

पुरा त्रिपुरसंहारे बाणेनैकेन वै शिवः।
राक्षसान् कोटिसंख्याकान् जघानात्रैव वै खलु।।१७१।।

अतोऽत्र हि महादेवो नाम्ना कोटेश्वरेण सः।
वर्तते लिङ्गरूपेण भक्तानामिष्टसिद्धये।।१७२।।

मृकण्डसूनुरत्रैव तपस्तप्त्वा पुरा किल।
मृत्युञ्जयमहादेवाच्चिरञ्जीवित्वमाप्तवान् ।।१७३।।

अतोऽत्रैकं महालिङ्गं मार्कण्डेयेश्वराभिधम्।
राजते सर्वभक्तानां ह्यभीष्टफलदायकम्।।१७४।।

भद्रकालीसमेतस्य वीरभद्रस्य वै किल।
कल्याणमत्र जातं हि लोककल्याणकारकम्।।१७५।।

एवं बहुविधानां च लीलानां वै शिवस्य च।
साक्षिभूतमिदं क्षेत्रं शिवक्षेत्रं सुविश्रुतम्।।१७६।।

अत्रैव हि शिवक्षेत्रे गौतमो नाम सद्-ऋषिः।
किञ्चित् तृणप्रहारेण गां निवारितवानिह।।१७७।।

तदा यद् गौर्मृता जाता तृणस्पर्शेन तस्य वै।
गोहत्यादुरितं तावत् गौतमं तु समस्पृशत्।।१७८।।

गोहत्यादुरितं तावत् गङ्गास्नानेन केवलम्।
निवर्त्यत इति ज्ञात्वा महर्षिर्गौतमस्तदा।।१७९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तत्रैव स्वाश्रमे स्थित्वा गङ्गायै चरितं तपः।
तपसा गौतमस्यैव प्रसन्ना जह्नुकन्यका।।१८०।।

शिवस्यादेशमासाद्य गङ्गा त्र्यम्बकसन्निधौ।
ब्रह्मगिर्यां महाराष्ट्रे ह्यवतीर्णा बभूव सा।।१८१।।

ततो गौतमपर्यन्तं प्रवहन्ती समुत्सुका।
गोदावरीति विख्याता पुण्या श्री जह्नुकन्यका।१८२।।

आन्ध्रस्यादिकविस्तावन्नन्नय्याख्यो महामतिः।
लब्ध्वाऽत्र दुर्लभं जन्म रचयामास भारतम्।।१८३।

गोदावर्या नदीतीरे शिवक्षेत्रे विराजिते।
लब्ध्वा जन्म सुपुण्येन राजमहेन्द्रसत्पुरे।।१८४।।

तत्रस्थे सुप्रसिद्धे हि कोटिलिङ्गेश्वरस्थले।
शिवकोटीति चाख्यातः कश्चिन्माहेश्वरो जनः।।१८५।।

तस्याऽसीद्धर्मपत्नी तु पातिव्रत्यपरायणा।
नाम्ना राजेश्वरी चेति कुलशीलविभूषिता।।१८६।।

तस्मिन् वंशे समुत्पन्नःप्रातर्बालरविः किल।
अष्टमपुत्ररूपेण ह्यष्टसिद्धिप्रदायकः।।१८७।।

द्वादशेह्नि तु बालस्य नाम तद्घोषितं तदा।
राज्ञामीशो भवेदेष राजेश्वर सुनामभाक्।।१८८।।

अष्टमपुत्ररूपेण जातोऽयं बालकः शुभः।
संख्याशास्त्रानुसारेण भाग्यवानिति कथ्यते।।१८९।।

सिद्धीनां च वसूनां च योगाङ्गानां तथैव च।
गजानां च दिशां चैव तनूनां हि शिवस्य च।।१९०।।

एवमेव बहूनां हि वस्तूनां भद्रकारिणाम्।
संख्या त्वष्ट इति प्रोक्तं ह्यष्टमं मङ्गलं खलु।।१९१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पुत्रोऽयं ह्यष्टमःप्रोक्तः पूर्वोक्तगुणमण्डितः।
संप्राप्ते चाष्टमे वर्षे दीक्षां प्राप्य विधानतः।।१९२।।

अधीत्य सप्त वर्षाणि शिक्षां प्राथमिकां किल।
स्वग्रामे पूरयित्वा तु भाषाप्रावीण्यमाप्तवान्।।१९३।।

पित्रोराज्ञानुसारेण राजेश्वरबटुस्तदा।
संस्कृताध्ययनार्थं हि सुकाशीं नगरीं श्रितः।।१९४।।

जगद्गुरुः राजेश्वरशिवाचार्यः काश्यां ज्ञानपीठस्य एकाशीतितमः पीठाधीश्वरः बभूव। अस्य जन्म आन्ध्रे महेन्द्रभूपतेः राजधान्याम् अभूत्। त्रिपुरसंहारलीलायां भगवता शिवेन एकेनैव बाणेन कोटिसंख्याकाः राक्षसाः निहताः।अतः अत्र कोटेश्वरमहादेवलिङ्गं राजते। मृकण्डसूनुना मृत्युञ्जयमहादेवात् चिरजीविता अत्रैव प्राप्ता अतः अत्र मार्कण्डेयेश्वरमहालिङ्गं राजते। भद्रकालीसमेतस्य वीरभद्रस्य अत्र कल्याणम् अभूत् इत्येवं शिवलीलासाक्षिभूतं शिवक्षेत्रम् एतत् सर्वत्र विश्रूयते। इहैव गौतमस्य तृणप्राहरेण निवारिता गौः मृता। एतच्च गोहत्यादुरितं गंगास्नानं विना न शक्यते निवारयितुम् अतः तपसा शिवस्य आज्ञया त्र्यम्बक सन्निधौ ब्रह्मगिर्यां महाराष्ट्रे गंगा अवतीर्णा प्रवहन्ति गौतमसमक्षं समुपस्थिता गोदावरीनाम्ना सुविख्याता अभूत्। महामतिः महेन्द्रपुरे जन्म लेभे।

तत्र कोटिल्ङ्गिेश्वरमध्ये माहेश्वरस्य शिवकोटीतिनाम्नः राजेश्वरी-समाह्वभार्याम् अष्टसिद्धिप्रदाता बालरविसमद्युतिः अष्टमः पुत्रः जन्म लेभे यस्य द्वादशे अहनि राजेश्वर इति नामकरणम् अभूत्। सोऽयं भाग्यवान् सिद्धीनां वसूनां योगाङ्गानां दिग्गजानां शिवतनूनाम् इव मङ्गलाष्टकः अष्टमे वर्षे प्राप्तदीक्षाविधिः स्वग्रामे सप्त वर्षाणि अधीयानः भाषादक्षताम् अवाप्य श्रीकाशीनगरीं संस्कृताध्ययनाय आययौ।।१६९-१९४।।

## ।।काश्यामध्ययनं पीठाधिकारश्च।।

राजेश्वरोऽत्र काश्यां हि वीरभद्रगुरोस्तदा।
आज्ञामनुसरन्नेव गुरुकुलं समाविशत्।।१९५।।

अन्तेवासी भवन्नेष राजेश्वरबटुः शुभः।
सद्गुरूणां गृहं गत्वाऽध्ययनारम्भमाचरत्।।१९६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



साहित्यं न्यायमीमांसे सांख्यं योगं तथैव च।
एवं सर्वाणि शास्त्राणि ह्यधीत्य पारगोऽभवत्।।१९७।।

अधीतसर्वशास्त्रस्य राजेश्वरबटोस्तदा।
योगाभ्यासे रुचिर्जाता ह्यासक्तिर्वर्धिता किल।१९८।।

स्वाध्याये शिवयोगे च सदा कालं नयन्नसौ।
गुरोस्तद्वीरभद्रस्य कृपापात्रम् बभूव ह।।१९९।।

एकदा वीरभद्रो हि कालराव्याधिपीडितः।
राजेश्वरं तदा शिष्यं माहूयेत्थं समादिशत्।।२००।।

इतः परं भवानेव योगक्षेमं विनिर्वहेत्।
इत्यादिश्य च तन्नाम्ना मृत्युपत्रं लिलेख ह।।२०१।।

गुरुणा वीरभद्रेण ह्यादिष्टश्चाधिकारवान्।
राजेश्वरमहास्वामी पीठाध्यक्षो बभूव ह।।२०२।।

श्रीमान् राजेश्वरः गुरूणां गृहं गत्वा अध्ययनपरायणः साहित्ये न्याये मीमांसाशास्त्रे सांख्य योगे च नैपुणीं प्राप्य योगाभ्यासे दत्तावधानः गुरुणा वीरभद्रेन पीठाध्यक्षपदे नियोजितः।।१९५-२०२।।

## ।।विदुषां गौरवं ग्रन्थलेखनं च।।

उदारो वत्सलश्चैव लिङ्गपूजाधुरन्धरः।
शिवयोगे सदासक्तमना राजेश्वरो गुरुः।।२०३।।

पूर्वाचार्यान् स्मरन् नित्यं धर्मं च शुभमाचरन्।
विदुषो गौरवं कुर्वन् दिनानि व्यत्ययापयत्।।२०४।।

एकैकस्यापि शास्त्रस्य ग्रन्थानां हि तथैव च।
बहवःसन्ति विद्वांसः काश्यां सर्वत्र संस्थिताः।।२०५।।

विद्वत्सु तेषु सर्वेषु शिवभक्तिपरिप्लुतः।
शास्त्री शिवकुमारो हि मूर्धन्यः परिगण्यते।।२०६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कपाले श्रीत्रिपुण्ड्रांको गले रुद्राक्षमालिका।
मुखे च सर्वशास्त्राणि लक्षणं शास्त्रिणः खलु।।२०७।।

एकदा हि महारात्रौ जङ्गमवाटिकामठे।
तयोस्तु संगमो जातो गंङ्गायमुनयोरिव।।२०८।

शास्त्रिणां खलु सान्निध्ये शास्त्रार्थो विदुषां किल।
विविधेषु च शास्त्रेषु जातोऽपूर्वा च सा सभा।२०९।।

विद्यानिधिं दयागारं शिष्यवात्सल्यरूपिणम्।
शास्त्रिणं तं समाहूय राजेश्वरमहागुरुः।।२१०।।

ताम्बूलं च महावस्त्रं भूरि तद्दक्षिणां किल।
दत्त्वा तस्मै सभामध्ये गौरवं प्रददर्श सः।।२११।।

उभयोर्योगिनोर्मध्ये सम्बन्धोऽयं दृढोऽभवत्।
मध्ये मध्ये मठेऽस्मिन् वै ह्युभौ चर्चामकुर्वताम्।२१२।।

एकदा ह्युदरशूलेन पीडिताः शास्त्रिणः खलु।
संदेशं प्रेषयामासुः राजेश्वरगुरुं प्रति।।२१३।

औदर्यस्य च रोगस्य शमनार्थं तदा खलु।
निर्माल्यबिल्वपत्राणि हीष्टलिङ्गस्य वै किल।।२१४।।

दत्त्वा तु प्रेषयामास राजेश्वरगुरुस्तदा।
गुरुप्रसादं स्वीकृत्य स्वस्थाः श्रीशास्त्रिणोऽभवन्।।२१५।।

उदरव्याधिना मुक्तास्तुष्टाःशास्त्रिमहोदयाः।
एकदा मठमागत्य दृष्ट्वा राजेश्वरं गुरुम्।।२१६।।

बिल्वपत्रस्य लिङ्गस्य तथा लिङ्गार्चनस्य च।
माहात्म्यमधिकृत्यैव जिज्ञासावन्त आबभुः।।२१७।।

विदुषां तन्मनोभावं ज्ञात्वा राजेश्वरो गुरुः।
उभयोरपि माहात्म्यं यथाशास्त्रमुदीरयत्।।२१८।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



इष्टावाप्तिकरं लिङ्गमनिष्टपरिहारकम्।
इष्टलिङ्गमिति प्रोक्तं वेदशास्त्रेषु वै किल।।२१९।।

तदर्थमधिकं ज्ञातुं जिज्ञासा वर्तते यदि।
द्रष्टव्या भवता नूनं लिङ्गधारणचन्द्रिका।।२२०।।

कृते बिल्वार्चने तत्र कोटियज्ञफलं भवेत्।
प्रत्यहं क्रियतेऽस्माभिर्यावदायुर्निरन्तरम्।।२२१।।

लिङ्गार्चनस्य निर्माल्यं प्रसादः प्रेषितः किल।
शान्तं हि तत्प्रसादेन शूलमौदर्यमेव ते।।२२२।।

प्रासादिकोपदेशं तं राजेश्वरगुरोस्तदा।
श्रुत्वा शास्त्रिमहाभागा कृतकृत्यतमा बभुः।।२२३।।

पुनस्ते प्रार्थयामासुर्गुरुं राजेश्वरं तदा।
सारस्वती तु सेवा मे दीयतां क्रियते मया।।२२४।।

शास्त्रिणां वचनं श्रुत्वा राजेश्वरमहागुरुः।
व्याख्यातुमादिदेशैव लिङ्गधारणचन्द्रिकाम्।।२२५।।

शास्त्री शिवकुमारोऽपि श्रुत्वाऽदेशं गुरोस्तदा।
तथेति प्रतिशुश्राव ग्रन्थाऽरम्भं चकार ह।।२२६।।

चन्द्रिका तु शरत्काले प्रशस्ता परिदृश्यते।
ग्रन्थस्य च शरद्व्याख्या वस्तुतत्त्वं प्रकाशयेत्।।२२७।।

मनस्येवं विचार्यैव पूज्यास्ते शास्त्रिणः किल।
लिलिखुः श्री शरद्व्याख्यां विश्वमान्या इमे बभुः।।२२८।।

शरत्संवलिता तावल्लिङ्गधारणचन्द्रिका।
प्रकाशिता महारात्रौ काश्यां राजेश्वरेण वै।।२२९।।

एतद् ग्रन्थप्रभावेण वीरशैवस्य गौरवम्।
काश्यां सुस्थापितं जातं कीर्तिर्जाता सुनिर्मला।।२३०।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**राजेश्वरगुरोरेव कृपाच्छत्रे विवर्धिताः।**
**गुरुकुले त्वधीयाना विद्वांस आबभुः शुभाः।।२३१।।**

**धर्ममयानि च कार्याणि कृत्वा बहुविधानि हि।**
**काश्यां संवर्धितं तेन वीरशैवमतं परम्।।२३२।।**

लिङ्गपूजापरायणः राजेश्वरशिवाचार्यः धर्मानुष्ठानतत्परः विदुषां सम्माननं प्रतिदिन आचरन् विभाति स्म। काश्यां तदानीं सहस्रशः निवसन्तो विद्वांसः श्रीकाशीनगर्याः गौरवं वर्धयन्तः सम्बभूवुः। तेषु मूर्धन्यः शिवकुमारशास्त्री त्रिपुड्रलसितभालः विलसद्रुद्राक्षगलः कण्ठस्थीकृतसर्वशास्त्रः एकदा महाशिवरात्रौ जङ्गमवाटिकामठे राजेश्वरगुरुणा मिलितः। विविधविषयेषु शास्त्रेषु शास्त्रेषु शास्त्रिणाम् आध्यक्ष्ये विदुषां महती शास्त्रसक्षा आयोजिता अभूत्। ताम्बूलेन माहवस्त्रेण फुष्कलदक्षिणाद्रव्येण पूजा विहिता। गच्छता कालेन उभयोः योगिनोः मध्ये मठमध्ये शास्त्रचर्चाविधिना दृढः आत्मीयो भावः अवर्धत। एकदा उदरशूलेन पीडितः शास्त्रिवर्यः राजेश्वरं जगद्गुरुं सन्देशं प्रेषयामास। गुरुणा इष्टलिङ्गास्य निर्माल्यं बिल्वपत्रं यत् प्रेषितं तत् प्रसादबलात् शास्त्रिवर्याः पलायितरोगाः सविल्वपत्रस्य लिङ्गार्यनस्य माहात्म्यजिज्ञासां प्रकटीकर्तुं मठमागताः। इष्टलिङ्गबिल्वपत्रयोः माहत्म्यं सामान्येन प्रतिपादयता जगद्गुरुणा विशेषप्रतिपत्तये लिङ्गाधारणचन्द्रिकाग्रन्थम् अध्येतुं शास्त्रिवर्यः प्रेरितः। अथ सारस्वतसेवां विधातुम् उत्सुकाय शास्त्रवर्याय समादिशत्— "भवान् लिङ्गधारणचन्द्रिकां व्याख्यासंयुतां करोतु तथेत्युक्त्वा प्रतिश्रुत्य शास्त्रिवर्याः मनसि चिन्तितवन्तः शरत्काले चन्द्रिका समधिकं प्रशस्यते अतः लिङ्गधारणचन्द्रिकां शरद् व्याख्यायुतां करवाणीति निश्चित्य एतन्नाम्नीं टीकां लेलिखुः। सैषा शरत्संवलिता लिङ्गधारणचन्द्रिका काश्यां महाशिवरात्रौ राजेश्वरगुरुणा सम्प्रकाशिता। एतत्ग्रन्थप्रभावेण काश्यां वीरशैवधर्मदर्शनस्य गौरवं शास्त्रिवर्याणां कीर्तिश्च सममेव समवर्धत। विद्याविद्वत्प्रियस्य श्रीराजेश्वरगुटोः कृपाछत्रे सम्वर्धिता; गुरुकुले अधीयानाः बहवः छात्राः सुविद्वांसः बभूवुः। एतस्य पीठाध्यक्ष्ये धार्मिकानि बहुविधानि कार्याणि सम्पादितानि वीरशैवमतं च काश्यां सर्वत्र देशे च प्रचुरम् संवर्धितम् अभूत्।।२०३-२३२।।

## ।।उत्तराधिकारो लिङ्गाङ्गसामरस्यं च।।

**विद्याविभूषिताश्छात्रास्तदासन् बहवो मठे।**
**तेषु सर्वेषु छात्रेषु शिवलिङ्गा भिधो महान्।।२३३।।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विद्याविनयसम्पन्नो गुरुसेवाधुरंधरः।
शिवलिङ्गः शिवाचार्यपदवीं लब्धवान् गुरोः।।२३४।।

एकदा तु महायोगी राजेश्वरजगद्गुरुः।
शिवलिङ्गं समाहूय ह्येदं वचनमब्रवीत्।।२३५।।

भवान् पूर्णः समर्थोऽस्ति विश्वासो मम वर्तते।
इत्युक्त्वा सम्मतिं प्राप्य मृत्युपत्रं लिलेख ह।।२३६।।

गुरोरेव प्रसादेन शिवलिङ्गमहागुरुः।
प्राप्य पीठाधिपत्यं हि काशीपीठ भभूषयत्।।२३७।।

आरोहणाद्धि पीठस्य मासाभ्यन्तरे किल।
लिङ्गाङ्गसामरस्यं हि गतो राजेश्वरो गुरुः।।२३८।।

तेषां क्रियासमाधिस्तु जङ्गमवाटिकामठे।
हरेश्वरस्य सान्निध्ये विद्यते वैभवेन वै।।२३९।।

श्री राजेश्वरशिवाचार्यस्य शिवयेषु विशिष्टः विद्याविनयसम्पन्नः सेवाधर्मधुरन्धरः आसीत् शिवलिङ्गाभिधः। जगद्गुरुः राजेश्वरशिवाचार्यः विश्वासोपेतं समर्थं शिवल्गिां पीठाधिपत्येन संयोज्य मासाभ्यन्तरे लिङ्गाङ्गासामरस्यं समवाप। तदीयः क्रियासमाधिः हरेश्वरसान्निध्ये वैभवेन संजातः॥२३३-२३९॥

## ।।शिवलिङ्गशिवाचार्यः।।( ८२ )

विश्वविख्यातपीठस्य ज्ञानसिंहासनस्य च।
शिवलिङ्गशिवाचार्यो स द्वाशीतितमो गुरुः।।२४०।।

## ।विद्याभ्यासः।।

सिद्धरामतपो-भूमिः क्षेत्रं सोल्लापुरं परम्।
तत्रास्ति पाठशाला तु वारदनामविश्रुता।।२४१।।

स्वामी श्रीशिवलिङ्गाख्यो लालगुण्डीमठाधिपः।
संस्कृताध्ययनार्थं तु पाठशालां समागतः।।२४२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



व्याकरणे तथा न्याये छन्दःसाहित्यवर्त्मनि।
शिक्षाकल्पादिशास्त्रेषु गतिरस्यमहत्तरा।।२४३।।

## ।।काश्यामध्ययनं पीठारोहणं च।।

स्वामिनःशिवलिङ्गस्य विद्यावैशद्यमेव च।
दृष्ट्वा तु गुरवः सर्वे सन्तुष्टाः सन्त आबभुः।।२४४।।

मल्लप्पोऽपि महाभागो तुष्टस् तमब्रवीत् तदा।
दृष्ट्वा मोमुद्यते चेतो भवतो बुद्धिकौशलम्।।२४५।।

पाण्डित्यमधिकं चैव संपाद्यं भवता खलु।
ततो गच्छतु काशीं हि विशेषाध्ययनाय वै।।२४६।।

आशीर्वादं गुरोर्लब्ध्वा साहाय्यमार्थिकं खलु।
मल्लप्पेन गृहीतः सः स्वामी काशीं समागतः।।२४७।।

बटोस्तु शिवलिङ्गस्य राजेश्वरमहाज्ञया।
जातः प्रवेशस् तस्यैव मठे तस्मिन् महत्तरे।।२४८।।

अन्तेवासी हि भूत्वाऽसौ सेवां कृत्वा तथैव च।
बहुभ्यः श्रीगुरुभ्यः स नैकां विद्यामधीतवान्।। २४९।।

गच्छत्सु खलु वर्षेषु राजेश्वरमहागुरुः।
योग्यतां शिवलिङ्गस्य स्मरन्नेव मूहुर्मुहुः।।२५०।।

निश्चित्यैव मुहूर्तं तु मृत्युपत्रं विलिख्य च।
भक्तान् सर्वान् समाहूय चकारपट्टबन्धनम्।।२५१।।

ज्ञानसिंहासनस्य द्व्याशीतितमःपीठाधिपः शिवलिङ्गशिवाचार्यः बाल्ये शोल्लापुरक्षेत्रे वारदपाठशालायां व्याकरणे न्याये साहित्ये शिक्षाकल्पादिशास्त्रेषु च अधीती श्रीमल्लप्रप्रेरितः काशीम् आगत्य राजेश्वरशिवाचार्यं श्रितः बहुभ्यः गुरुभ्य; सम्पठन् विविधविद्यानैपुणीम् अवाप्य श्रीराजेश्वरमाहज्ञया शिवाचार्यपदवीम् अवाप्नोत्।।२४०-२५१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।काशीहिन्दूविश्वविद्यालयस्य भूदानम्।।

तीर्थराजे प्रयागे च लब्धजन्मा महामनाः।
मदनमोहनाख्योऽसौ मालवीयो महामतिः।।२५२।।

संस्कृतेरेव देशस्य रक्षायां बद्धकंकणः।
देशभक्तो महात्यागी दैवीगुणसमन्वितः।।२५३।।

महात्मगान्धिसम्मान्यः पार्श्ववर्ती सनातनः।
विद्याप्रेमी गृहत्यागी विद्याविनयभूषितः।।२५४।।

प्रयागे चैकदा सम्यक् कुम्भमेलामहोत्सवे।
महाभागेन तेनैव संकल्पो विहितस्तदा।।२५५।।

काश्यां विद्याप्रकाशिन्यां विश्वविद्यालयो महान्।
हिन्दूनां नामधेयेन स्थापनीयो महत्तरः।।२५६।।

मालवीयस्य संकल्पं श्रुत्वा सर्वे सभासदाः।
भक्ताश्च साधवः सर्वे हर्षोल्लाससुनिर्भराः।।२५७।।

जनोत्साहं समालोक्य मालवीयो महामतिः।
काशीमागत्य काश्यां हि दानयज्ञं समारभे।।२५८।।

दानपात्रं गृहीत्वा तु काश्यां हि सञ्चरन् खलु।
आगतो मालवीयो हि जङ्गमवाटिकां किल।।२५९।।

आगतं मालवीयं तं कृत्वा तु स्वागतं तदा।
शिवलिङ्गशिवाचार्यः कुशलं पृष्टवान् मुहुः।।२६०।।

मालवीय-महोद्देश्यं श्रुत्वा तत् सावधानतः।
शिवाचार्यो महास्वामी सद्यः सहर्षमुक्तवान्।।२६१।।

महामना भवानेव धन्योस्ति पृथिवीतले।
महद्भाग्येन काश्यां यद् विद्याकेन्द्र-विनिश्चयः।।२६२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्राच्यप्रतीच्यविद्यानां पठनं पाठनं तथा।
निरन्तरं भवेदत्र यावच्चन्द्रदिवाकरौ।।२६३।।

तदर्थं भवता ह्यत्र सर्वत्र भारते किल।
भिक्षाटनं हि कर्तव्यं भाति सन् ब्राह्मणो भवान्।।२६४।।

भिक्षाटनस्य माहात्म्यं ब्रुवन् धन्यो महागुरुः।
ददौ भूम्यास्तु दानं वै जङ्गमाख्यपुरस्य च।।२६५।।

शुभे षष्ठे च खिस्ताब्दौ जयनन्दो हि भूपतिः।
पूर्वजानां हि शान्त्यर्थं भूदानमकरोत् तदा।२६६।।

तदानीं स्थापितं तत्र जङ्गमाख्यं पुरं खलु।
सा भूमिरधुनास्माभिः संप्रदीयत आशु भोः।।२६७।।

आरब्धे मालवीयस्य दानयज्ञे तदा किल।
शिवलिङ्गशिवाचार्यकृतं तद् दानकं महत्।।२६८।।

काशिराजात् समारभ्य सर्वे ते भूमिपालकाः।
स्वस्वशक्तिप्रमाणेन भूदाने भागिनोऽभवन्।।२६९।।

उदारैर्दानशूरैश्च दत्तं दानं महत्तरम्।
गृहीत्वा मालवीयो हि विश्वविख्यातमेव च।।२७०।।

विश्वविद्यालयं तत्र स्थापयामास वै तदा।
सर्वदेशीयशिष्याणां मुक्तद्वारं व्यधान्मुनिः।।२७१।।

काश्यां संस्थापितस्यास्य विश्वविद्यालयस्य च।
शुभारम्भे महादानं जङ्गमस्य विशिष्यते।।२७२।।

तत्रत्येषु विभागेषु ख्यातो धर्मागमो विभुः।
दर्शनानिच धर्माश्च तत्राध्याप्यन्त आगमाः।।२७।।

वीरशैवागमानां च ह्यध्ययनम्प्रवर्तते।
आचार्यशोधपर्यन्तं नैरन्तर्यविभूषितम्।।२७४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



एतन्माङ्गलिकं कार्यमपूर्वं शाश्वतं शिवम्।
साधितं कमलेशेन विभागप्रमुखेन च।।२७५।।

तदीया धवला कीर्तिर्यावच्चन्द्रदिवाकरौ
वर्धतां प्रत्यहं लोके विद्या सर्वत्र वर्धताम्।।२७६।।

अथ महामनाः मदनमोहनमालवीयः विद्याविनयभूषितः भारतीयसंस्कृत; रक्षाव्रती एकदा प्रयागे कुम्भमेलामहोत्सवे काश्यां हिन्दूविश्वविद्यालयसंस्थापनाय गृहीतसंकल्पः संबभौ। एतदर्थं साधुभिः भक्तै; जनैश्च संवर्धितोत्साहः श्रीमान् मालवीयः काशीम् आगत्य दानपात्रं गृहीत्वा संचरन् जंगमवाटिकां जग्मौ। तं दृष्ट्वा प्रीतिप्रमुखवचनं स्वागतं व्याहरन् शिवलिङ्गशिवाचार्यः महामनसां महोद्देश्यं विज्ञाय संस्थापयिष्यमाणश्रीकाशीहिन्दू विश्वविद्यालये प्राच्यप्रतीच्यविद्यानां पठनपाठनादिकं यावत्-चन्द्रदिवाकरौ अनुशंसन् तां जंगमभूमिं बृतीं ददौ या षष्ठशताब्दे काशिराजेन जयनन्देन पूर्वं ज्ञानपीठाधीश्वराय प्रदत्ता आसीत्। ततः प्रभृति काशिराजः अन्ये च राजानः विश्वविद्यालयस्य कृते स्व-स्व सामर्थ्यानुसारं भूदानम् अकुर्वन्। उदारैः दानशूरैः दत्तं दानधनम् आदाय महामनोभिः स्थापिते विश्वविद्यालये विस्वस्मिन् विश्वे स्थितानां पिपठिषूनां कृते अध्ययनस्य द्वारम् उद्घाटितम् अस्ति।

एतस्मिन् काशी हिन्दूविश्वविद्यालये संस्कृतविद्याधर्मविज्ञानसंकाये विश्वविद्यार्थिभिः सेव्यमानः धर्मागमविभागः विलसति। तत्र वीरशैवागमानामपि अध्ययनं स्नातक-स्नातकोत्तरीय शोधपर्यन्तं निरन्तर प्रचलति। एतत् माङ्गलिकं कार्यं सम्बद्धविभागाध्यक्षेन आचार्यकमलेशविदुषा प्रारब्धमिति श्रीविश्वेश्वरप्रभुं याचे यावच्चन्द्रदिवाकरौ तदीया धवला कीर्तिः विद्या च सर्वत्र प्रवर्धतामिति।।२५२-२७६।।

## ।।पञ्चाचार्यमहासम्मेलनम्।।

धर्मोऽस्ति वीरशैवाख्यः सद्यो मुक्तिप्रदायकः।
निवारको हि वैरस्य सर्वेषां हितकारकः।।२७७।।

समत्वबोधकश्चैव सूतकानां निषेधकः।
मानवानां हि सर्वेषां हितमार्गोपदेशकः।।२७८।।

यो हि सर्वेषु धर्मेषु प्रथमः परिगण्यते।
आचार्यपञ्चकैःसोऽयं स्थापितो हि महीतले।।२७९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



केन्द्रस्थानानि तेषां वै सन्ति सर्वत्र भारते।
पञ्चपीठाख्यनाम्ना तु प्रसिद्धानि महीतले।।२८०।।

पञ्चपीठाभिषिक्तास्ते सर्वे सद् गुरवः किल।
पञ्चाचार्याःप्रकीर्त्यन्ते पञ्चभूताधिनायकाः।।२८१।।

परम्परा हि तेषां तु ह्यविच्छिन्ना निरन्तरा।।
एते पञ्च महाचार्या धर्मनिर्णायकाःखलु।।२८२।।

पञ्चभिर्न्यायपीठैश्च निर्णीतो न्यायनिर्णयः।
चरमः कथ्यते लोके सर्वमान्यश्च जायते।।२८३।।

तेषामाचार्यवर्याणां विशेषावसरे खलु।
सम्मेलनं भवत्येव सर्वलोकहिताय च।।२८४।।

गुरुणा शिवलिङ्गेन सर्वमेतद् विचिन्त्य हि।
पुनः सम्मेलनार्थाय महती योजना कृता।।२८५।।

अष्टादशोत्तरे तत्र ह्यूनैके विंशकेब्दके।
माघे मासे विनिर्णीतं मुहूर्तमेतदीयकम्।।२८६।।

प्रतिपीठं च गत्वा हि ततो दत्तं निमन्त्रणम्।
सर्वैश्च परमाचार्यैःस्वीकृतं तन्निमन्त्रणम्।।२८७।।

पीठाद्रम्भापुरीतस्तु पञ्चाक्षरजगद्गुरुः।
तपस्वी सिद्धलिङ्गस्तु ह्युज्जयिनीपीठतस्तदा।।२८८।।

भिक्षावृत्तिशिवाचार्यःसूर्यसिंहासनात् खलु।
एवं सर्वे महाचार्या प्रस्थाय पीठतः स्वकात्।।२८९।।

मध्ये मध्ये च कृत्वा तु ह्यर्चनं तत् त्रिसन्ध्यकम्।
आगता नगरीं काशीं गङ्गातटनिवासिनीम्।। २९०।।

स्वास्थ्यस्य वैपरीत्यात्तु विश्वलिङ्गमहागुरुः।
स्वीकुर्वन्निर्णयान् सर्वान् पत्रं प्रेषितवान् खलु।।२९१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



काशीपीठाधिपस्तत्र शिवलिङ्गमहागुरुः।
स्वयं गत्वा हि सर्वेषां स्वागतं व्याजहार ह।।२९२।।

परेद्युरपराह्णे च काश्यां तत्स्वागताय च।
अभूदभूतपूर्वो हि तिर्यगान्दोलिकोत्सवः।।२९३।।

पुरतो ह्युत्सवस्यास्य गजानामष्टकं खलु।
काशिराजेन दत्तं वै शोभा-संवर्धनाय तु।।२९४।।

काश्यां विद्यानगर्यां हि वीरशैवमहोत्सवः।
दिनत्रयं हि यावत्तु ह्यभूद्वै वैभवेन हि।।२९५।।

पारम्परिकपद्धत्या सञ्जाते हि महोत्सवे
सर्वधर्मीयसद्भक्ता भागिनो ह्यभवन् खलु।।२९६।।

कूटात् चतुष्पदात् तत्र लहुराबीरनामकात्।
महोत्सवो हि सञ्जातो यावज्जङ्गमवाटिकाम्।।२९७।।

चिन्तनं मन्थनं कृत्वा समाजस्य हिताय च।
बहवो नियमास्तत्र स्वीकृता ह्यभवन् किल।।२९८।।

वीरशैवधर्मः वैरनिरसनः सर्वहितः सद्यो मुक्तिप्रदः समत्वबोधकः सूतकप्रतिषेधकः धर्मेषु प्रथमः मीतले आचार्यपञ्चकैः स्थापितो राजते। एषाम् आचार्याणां भारते विभिन्नेषु प्रदेशेषु स्थितानि केन्द्राणि पञ्चपीठनाम्ना अन्य च तजाभिषिक्तानां पञ्चाचार्यनाम्ना प्रथन्ते। एभिः पञ्च भूताधिनायकै; महाचार्यैः विहितः न्यायनिर्णयः परमः सर्वमान्यश्च पूज्यते। विशिष्टे अवसरे सर्वलोकहिताय पञ्चाचार्याणां सम्मेलनं भवतीति शिवलिङ्गाचार्येण ऊनविंशशताब्द्यां माघे मासे निमन्त्रणविधिना काश्यां सम्मेलनस्य आयोजनं विहितम्। तत्र रम्भापुरीपीठतः पञ्चाक्षरजगद्गुरुः उज्जयिनीपीठतः सिद्धलिङ्गगुरुः सूर्यसिंहासनपीठतः भिक्षावृत्तिः जगद्गुरुः समागतवन्तः श्रीकाशीम्। स्वास्थ्यवैपरीत्यात् विश्वलिङ्गजगद्गुरुः निर्णयं स्वीकर्तुं पत्रं प्रेषितवान् आगन्तुं नापारयत्। यथावसरं सञ्जाते तिर्यगान्दोलिकोत्सवे काशिराजप्रदत्तेन गजानाम् अष्टकेन सुषमासंवर्धनम् अभूत्।

विधानगर्यां श्रीकाश्यां दिनत्रयं वीरशैवमोत्सवः लहुराबीरचतुष्पदात् जंगमवाटिकां यावत् पारम्परिक पद्धत्या सम्पन्नः अथ गोष्ठ्यां समाजहिताय

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



चिन्तमन्थनादिना बहवः नियमाः स्वीकृताः॥२७७-२९८॥

## ॥गुरुकुलस्य नामकरणम्॥

नागनूरुमठाध्यक्षः काशीनाथमहोदयः।
कार्याध्यक्षपदे ह्यासीत् बृहत्–सम्मेलनस्य वै॥२९९॥

तेन प्रोक्तं सभायां तु सर्वानुद्दिश्य वै खलु।
मठेऽत्र वर्तते चैकं गुरुकुलं पुरातनम्॥३००॥

तदेवं लब्धसत्कीर्तेः काशीगुरुकुलस्य तु।
अंकितं नाम नास्त्येव कर्तव्यमधुना हि तत्॥३०१॥

शास्त्रिणां भाषणं श्रुत्वा सर्वैः प्रमुदितैर्मुदा।
विश्वाराध्यस्य नाम्नैव तन्नामकरणं कृतम्॥३०२॥

आयोजितायां बृत्सम्मेलनस्य संगोष्ठ्याम् अध्यक्षेन नागनूरुमठाध्यक्षेन श्रीकाशीनाथेन काशीगुरुकुलस्य विश्रुतस्य नाम्नि विश्वाराध्यपदस्य सन्निवेशाय प्रस्तावो वितिः प्रमुदितैः सर्वैः अनुमादितश्च॥२९९-३०२॥

## ॥परल्यां तिर्यगान्दोलिकोत्सवः॥

एकदा परलीक्षेत्रे कोटिलिङ्गय्यनामकः।
तेलङ्गाणप्रदेशीयो वीरमाहेश्वरः खलु॥३०३॥

वैद्यनाथाय देवाय महारुद्राभिषेककम्।
माहेश्वरैस्तु कर्तव्य मित्येवं सुविचार्यतु॥३०४॥

आगतः परलीं तत्र व्यवस्थापयितुं तदा।
तत्रत्या वैदिकाः सर्वे स्वार्थाय विविदुःखलु॥३०५॥

अप्राप्ते सहभागित्वे त्वभिषेकविधौ तदा।
आरम्भिरे वितण्डां ते विक्षिप्ता वैदिकाः खलु॥३०६॥

वेदे कस्याधिकारोऽस्ति कस्य वा नास्ति तत्पुनः।
इति वादं गृहीत्वा ते गता न्यायालये तदा॥३०७॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पक्षयोरुभयोर्मध्ये वादो जातो महत्तरः।
विदुषां वीरशैवानां विवादे विजयोऽभवत्।।३०८।।

तदा सर्वे मिलित्वा तु शिवलिङ्गजगद्गुरोः।
आन्दोलिकोत्सवं कृत्वा विजयोत्सवमाचरन्।।३०९।।

एवं हि परलीक्षेत्रे महारुद्रमहोत्सवः।
वैभवेन सुसम्पन्नः सर्वे प्रमुदिता जगु।।३१०।।

एकदा तेलङ्गानाप्रदेशस्य माहेस्वरः कोटिलिङ्गय्यनामकः परलीक्षेत्रे माहरुद्राभिषेकं वीरमाहेस्वरैः कर्तुं समागतः। तत्र स्वार्थहेतवे विवादपरायणाः वैदिकाः वितण्डाम् आरब्धवन्तः।

ते कस्य वेदे उपधिकारः कस्य च नेति वादं गृहीत्वा न्यायालये गतवन्तः। वीरशैवैः सह वैदिकानां जाते विवादे वीरशैवाः विजयिनः संजाताः। तदनु माहेश्वरैः शिवलिङ्गजगद्गुरोः आन्दोलिकोत्सवं विधाय विजयोत्सवः आचरितः। अथ प्रमुदितैः सर्वैः मिलित्वा परलीक्षेत्रे महारुद्रमहोत्सवः वैभवेन सम्मानितः॥३०३-३१०॥

## ।।शिवसायुज्यप्राप्तिः।।

ज्ञानसिंहासनस्यास्य गुरुर्द्वाशीतिसत्तमः।
शिवलिङ्गशिवाचार्यःशिव एव न संशयः।।३११।।

विद्वान् वीरो महादानी गङ्गास्नायी शिवार्चकः।
विद्यार्थिवत्सलश्चैव भक्ताऽभीष्टप्रदायकः।।३१२।।

पञ्चविंशाब्दपर्यन्तं शासयन् धर्मपीठकम्।
वयोमानानुसारेण सुप्रविष्टो जरां दशाम्।।३१३।।

विकृतमात्मनःस्वास्थ्यं संवीक्ष्य सैष सद्गुरुः।
तासगांवमठाधीशं गुरुं पञ्चाक्षरं तदा।।३१४।।

समाहूय स्वपार्श्वे च धर्मतत्त्वं निरूपयन्।
पीठस्य व्यवहारं च सम्यग् बोधितवान् गुरुः।।३१५।।

माघे शुक्ले शुभे पक्षे तिथौ द्वादशसंज्ञके।
मुहूर्ते शोभने चैव सर्वानामन्त्रस्य वै तदा।।३१६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शास्त्रोक्तविधिना पट्टं कृत्वा तत्र जगद्गुरुः।
पञ्चाक्षराय शिष्याय ह्यधिकारं प्रदत्तवान्।।३१७।।

फाल्गुने मासि पक्षे वै शुभे कृष्णे तिथौ दर्शे।
भौमे वै वासरे चैव शिवसायुज्यमाप्तवान्।।३१८।।

कैलासमण्टपे तत्र विश्वाराध्यस्य सन्निधौ।
समाधिर्विहितस् तेषां नित्यपूजा विधीयते।।३१९।।

विद्वान् वीरः महादानी नित्यं गंगास्नायी छात्रवत्सलः शिवार्चासंसक्तः शिव इव भक्तैः समादृतः पञ्चविंशतिवर्षाणि धर्मपीठाधीश्वरपदम् अलंकुर्वन् स्वास्थ्यप्रातिकूल्ये ताशगाँवमठाधीशं पञ्चाक्षरगुरुम् आहूय पीठव्यवहारेण परिचयं विधाय शास्त्रोक्तविधिना माघे शुक्ले द्वादश्यां तिथौ पञ्चाक्षराय पीठाधीशत्वं समर्त्य मासाभ्यन्तरे एव शिवसायुज्यं शतः। एतस्य समाधिः कैलाशमण्डपे विश्वाराध्यसन्निधौ विहितः यत्र नित्यपूजा प्रचलति।।३११-३१९।।

## ।।पञ्चाक्षरशिवाचार्यः।। (८३)

ज्ञानसिंहासनस्यास्य गुरुस्त्र्यशीतिसत्तमः।
पञ्चाक्षरस्वरूपो हि गुरुःपञ्चाक्षरःस्मृतः।।३२०।।

महत्त्वं यत्र राष्ट्रस्य महाराष्ट्रं तदेव हि।
तत्र तावत् प्रसिद्धं हि सांगलीमण्डलं खलु।।३२१।।

तत्राऽस्ति तासगांवाख्यो ग्रामो ग्राममणिःकिल।
हिरेमठस्तु तत्रत्यो विख्यातोऽनादिकालतः।।३२२।।

मठोऽयं पुत्रवर्गीयः स्कन्दगोत्रीय एव च।।
पञ्चवर्णं हि तत्सूत्रं पीठं काशीति कथ्यते।।३२३।।

परम्परानुसारेण मठाधिपतयःखलु।
बहवो हि शिवाचार्या ह्यकुर्वन् धर्मशासनम्।।३२४।।

तत्र माहेश्वरश्चैको विरूपाक्षाख्यनामकः।
सुविद्वान् वेदविद्यायां कुलस्य च विभूषणः।।३२५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तस्यासीद्धर्मपत्नी तु पतिभक्तिपरायणा।
पतिव्रता सुशीला च शिवलिङ्गव्वनामिका।।३२६।।

तस्य वंशे समुत्पन्नो बालकोऽप्पय्यनामकः।
सर्वलक्षणसम्पन्नः शरच्चन्द्र इवापरः।।३२७।।

## ।।विद्याभ्यासःपट्टाभिषेकश्च।।

अष्टमे वयसि प्राप्ते बालके तत्पिता खलु।
धर्मोचितां हि दीक्षां तु विधिना समकारयत्।।३२८।।

बालं तं द्वादशाब्दं हि द्वादशादित्यतेजसम्।
हिरेमठस्य पट्टार्थं सर्वैर्निश्चयनं कृतम्।।३२९।।

शुभस्य शीघ्रं कर्तव्यमिति न्यायमनुस्मरन्।
भक्ता मठस्थाःसर्वे हि मुहूर्तं निरधारयन्।।३३०।।

शुभे तस्मिन् मुहूर्ते तु पट्टबन्धनपूर्वकम्।
हिरेमठगुरुस्थाने भक्तानां समुपस्थितौ।।३३१।।

अप्पय्यस्य बटोस्तत्र ह्यागमोक्तविधानतः।
सम्पन्नो ह्यभिषेकस्तु सन्तुष्टा भक्तबान्धवाः।।३३२।

एष पञ्चाक्षरशिवाचार्यः महाराष्ट्रजनपदे सांगलीमण्डलमध्ये ताशगाँवग्रामे स्कन्दगोत्रीये मठे विरूपाक्षमाहहेश्वरात् शिवलिङ्गाम्बायाम् अप्पय्यः सुतः अभूत्। तस्मै दीक्षां प्रदाय हिरेमठगुरुस्थाने अप्पय्यबटोः अबिषेकं विहितवान् तस्य पिता।।३२८-३३२।।

## ।।काश्याम् अध्ययनम्।।

पञ्चाक्षरशिवाचार्यो ह्याचार्यो नामतः खलु।
केवलेनाभिषेकेण शिवाचार्यपदं ययौ।।३३३।।

अतः प्रेष्यः शिवाचार्यःकाशीमध्ययनाय च।
एवं विचिन्त्य भक्ता वै काशीं सम्प्रैषयन् किल।।३३४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



गुरोःसान्निध्यमासाद्य बालःपञ्चाक्षरःकिल।
आरब्धाऽध्ययनस् तत्र भास्करप्रभ आबभौ।।३३५।।

न्याये व्याकरणे चैव साहित्ये ज्योतिषे तथा।
विविधेषु च शास्त्रेषु कृतभूरिपरिश्रमः।।३३६।।

## ।।काशीपीठारोहणम्।।

कायेन मनसा वाचा शुद्धं पञ्चाक्षरं तदा।
संवीक्ष्य सर्वभावेन शिवलिङ्गजगद्गुरुः।।३३७।।

मनस्येव स्वशिष्यं तं विनिर्धार्य तदा खलु।
पीठस्य कार्यभारं हि दत्त्वा तमादिदेश च।।३३८।।

गुरोरादेशमासाद्य गुरुःपञ्चाक्षरस्तदा।
मठस्य व्यवहारं तु कुर्वन्नासीद्दिने दिने।।३३९।।

गच्छत्सु खलु वर्षेषु शिवलिङ्गजगद्गुरुः।
पञ्चाक्षरशिवाचार्यकार्यं दृष्ट्वा तुतोष ह।।३४०।।

शास्त्रेषु व्यवहारेषु कुशाग्रं तं विचिन्त्य च।
धार्मिकं चाधिकारं च दातव्यमिति निश्चयात्।।३४१।।

माघे मासे शुभे चैव द्वादश्यां शुक्लपक्षके।
शुक्रे सद्वासरे चैव मुहूर्तं निश्चितं किल।।३४२।।

विद्वांसो वैदिकाः सर्वे ह्यागमार्थविशारदाः।
आहूताःखलु काशीस्थाःपरप्रान्तनिवासिनः।।३४३।।

प्रान्तैःसर्वैश्च सद्भक्ताःसर्वधर्मानुयायिनः।
बहवोऽत्र समागत्य ह्यभवन्साक्षिणः किल।।३४४।।

पूजानिष्ठाःशिवाचार्याःसर्वशाखानुवर्तिनः ।
श्रद्धया हि समागत्य सेवां चक्रुर्यथोचितम्।३४५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



कैलासमण्टपे तत्र ज्ञानसिंहासने किल।
पञ्चाक्षरं गुरुं तत्र उपावेश्य यथाविधि।। ३४६।।

पञ्चब्रह्ममयैस्तत्र स्थापितैः कलशोदकैः।
गुरुणा शिवलिङ्गेन त्वभिषेकः कृतो महान्।।३४७।।

धारयित्वा किरीटं च दत्त्वा दण्डकमण्डलुम्।
पट्टबन्धं तथा कृत्वा नूतनं नाम घोषितम्।। ३४८।।

काशीसिंहासनस्यास्य नूतनो हि जगद्गुरुः।
पञ्चाक्षरशिवाचार्यस्त्र्यशीतिसत्तमो गुरुः।।३४९।।

अभिषेकमात्रेण शिवाचार्यपदं लब्धवतः पंचाक्षरस्य काशीं प्रति आगमनं गुरोः सान्निध्यावाप्तिः न्यायव्याकरणसात्यादिशास्त्रेषु अधीतिनः ज्ञानपीठे अभिषेकं विधाय शिवल्गिजगद्गुरुः तुतोष। लौकिकैः शास्त्रीयैश्च विधानैः अभिषिक्तः पञ्चाक्षरशिवाचार्यः त्र्यशीतितमः पीठजगद्गुरुः व्यराजत।।३३३-३४९।।

## ।।विश्वाराध्यबैंकव्यहारः।।

गच्छत्सु खलु वर्षेषु शिवलिङ्गजगद्गुरुः।
पञ्चाक्षरशिवाचार्यमाहूयेत्थं समादिशत्।।३५०।।

जनानामर्थसंकष्टं परिहर्तुं मया किल।
विश्वाराध्यस्य सन्नाम्ना स्थापितं बैंकमेककम्।।३५१।।

अर्जितार्थस्य धर्मार्थे विनियोगेन वै खलु।
सुखं सम्पद्यते तस्मात् धर्ममेव समाचरेत्।।३५२।।

एवमर्थस्य माहात्म्यं शिवलिङ्गजगद्गुरुः।
बोधयित्वा स्वशिष्यं तु पुनर्वचनमब्रवीत्।।३५३।।

बहोःकालान्मठे तावत् बैंकस्य माध्यमेन वै।
व्यवहारो भवत्येव प्रजाश्च सुखिनः खलु।।३५४।।

व्याजस्य माध्यमेनैव सम्पाद्यापि नरो यदि।
वियुङ्क्ते धर्ममार्गे तु सद्गतिः प्राप्यते किल।।३५५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अतः परम्पराप्राप्तं लोककल्याणकारकम्।
बैंकस्य व्यवहारं तु यथावत् परिपालयेत्।।३५६।।

उपदेशं गुरोः श्रुत्वा अर्थसार्थक्यसाधनम्।
तथेति प्रतिशुश्राव पञ्चाक्षरजगद्गुरुः।।३५७।।

एवं शिष्याय संबोध्य व्यवहारं समीक्ष्य च।
संतोषेणैव परमं शिवसायुज्यमाप्तवान्।।३५८।।

कैलासमण्टपे तत्र ज्ञानसिंहासनस्य च।
सान्निध्ये विहितस्तस्य समाधिर्बहुसुन्दरः।।३५९।।

लौकिकान् धार्मिकानेव व्यवहारानहर्निशम्।
साधयन्नेव वर्षाणि व्यतियाप्य बहूनि च।।३६०।।

सर्वेषु व्यवहारेषु समीचीनेषु सत्स्वपि।
एकमेवार्थिकं कष्टं पीडयामास वै तदा।। ३६१।।

निधिस्थापितभक्तानां व्याजदाने तदा खलु।
अर्थाभावं तु विज्ञाय चिन्तितोऽभून्महागुरुः।।३६२।।

पीठस्यार्थिकसंकष्टं पौरा विज्ञाय तत्क्षणे।
स्वकीयस्य धनस्यैव प्रत्यावर्तनहेतवे।।३६३।।

प्रारब्धे च विवादे तु कनिष्ठे न्यायमण्डले।
तेषामेव जयः पक्षे तत्र तावदजायत।।३६४।।

श्रुत्वा तु निर्णयं तावत् खिन्नः पञ्चाक्षरो गुरुः।
प्रयागे चोत्तमे तत्र न्यायार्थं यत्नमाचरत्।।३६५।।

उत्तमे तत्र तावत् तु दशवर्षं निरन्तरम्।
पक्षयोरुभयोर्मध्ये वादः प्रचलितस् तदा।।३६६।।

श्रुत्वा वादांस्तथा चैव दृष्ट्वा पत्राणि वै किल।
हितार्थं तु मठस्यैव निर्णीतो न्ययनिर्णयः।३६७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



निर्मित इतिहासो वै निर्णयेनैष नूतनः।
आचन्द्रार्कस्थिति त्वेतत् सुस्थिरं मुदितं यशः।।३६८।।

पञ्चाक्षरशिवाचार्यगुरूणां यत्नतः किल।
पीठं हि सुस्थिरं जातं नाम तस्याजरामरम्।।३६९।।

प्रबलेनार्थकष्टेन पीडिते समये किल।
रक्षितं तन्निवार्यैव पीठं पञ्चाक्षरेण हि।।३७०।।

एकदा व्यतीतेषु वर्षेषु शिवलिङ्गजगद्गुरुः पञ्चाक्षरशिवाचार्यम् आदिशत्— "मया विश्वाराध्यनाम्ना एकं बैंकं स्थापितम् यत्र अर्जितस्य अर्थस्य धर्मकार्ये विनियोगो भवति। तत्र मूलधनस्य अर्थस्य धर्मकार्ये विनियोगो भवति। तत्र मूलधनस्य व्ययः न क्रियते केवलं ब्याजधनस्य धर्ममार्गे विनियोगः क्रियते। धर्माचरणेन जनाः सुखिनो भवति इति।" पञ्चाक्षरगुरुणा स्वगुरवे प्रतिश्रुतिः विहिता। सन्तोषेण शिवसायुज्यं गतस्य शिवल्गिाजगद्गुरोः समाधिः कैलाशमण्डपे विहितः।

समीचीनेषु व्यवारेषु प्रचलत्सु पीठस्य आर्थिकसंकष्टः उपस्थितः। पौराः स्वधनस्य प्रत्यावर्तनाय कनिष्ठं न्यायमण्डलं गतवन्तः। तत्र निर्णयः पौराणां पक्षे संजातः। अथ प्रयागे उच्चन्यायालये न्यायार्थं यत्नम् आचरतः दशवर्षानन्तरं मठपक्षे न्यायः सञ्जातः। पुनः पञ्चाक्षरगुरुणा यत्नतः अर्थकष्टपीडितस्य पीठस्य रक्षा चारु विहिता।।३५०-३७०।।

## ।।शिवसायुज्यप्राप्तिः।।

पीठस्य रक्षणायैव विश्वाराध्यो जगद्गुरुः।
पञ्चाक्षरेण रूपेण ह्यवतीर्णो महीतले।।३७१।।

गुरोराज्ञानुसारेण पञ्चाक्षरजगद्गुरुः।
पीठं संरक्षयामास धर्मेण च धनेन च।।३७२।।

वर्षाणि स त्रयस्त्रिंशत् सेवां कृत्वा महागुरुः।
शरीरेण तथा चैव मनसा जर्जरोऽभवत्।।३७३।।

शरीरे जर्जरे जाते पञ्चाक्षरजगद्गुरुः।
अग्रे पीठस्य सेवार्थं बटुं मनस्यचिन्तयत्।।३७४।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पीठस्य पूर्वविद्यार्थी वेदतीर्थाद्युपाधिभाक्।
चिदरेमठवंशस्थो वीरभद्रो हि पण्डितः।।३७५।।

योग्यो बटुस्तु पीठस्य निश्चित्यैवं महागुरुः।
इच्छापत्रं तु तन्नाम्ना विलिख्य गोपितं खलु।।३७६।।

बटुं निर्णीय निश्चिन्तो गुरुः पञ्चाक्षरस्तदा।
विश्वाराध्यं स्मरन्नेव शिवसायुज्यमाप्तवान्।।३७७।।

विज्ञाय विषयं सर्वं विपश्चिद् वीरभद्रकः।
अतिशीघ्रं समागत्य समाधिं तस्य निर्ममौ।।३७८।।

उत्तरा सा क्रिया चैव वीरभद्रेण शर्मणा।
विहिता विधिना चैव मन्दिरे तु हरेश्वरे।।३७९।।

जनाः आमनन्ति स्वयं विश्वाराध्यो गुरुः पीठरक्षणाय पञ्चाक्षररूपेण अवततार इति। अस्तु जगद्गुरुः पञ्चाक्षररूपेण अवततार इति। अस्तु जगद्गुरुः पञ्चाक्षरशिवाचार्यः त्रयस्त्रिंशत् वर्षाणि पीठसेवां कुर्वाणः मनसा शरीरेण च जर्जरः सन् चिदरेमठवंशस्थं पण्डितवीरभद्रं बटुं पीठाधिपं विनिश्चित्य शिवसायुज्यम् अवाप। वीरभद्रशिवाचार्येण स्वगुरोः विधिवत् समाधिं हरेश्वरमन्दिरे विहितवान्।।३७१-३७९।।

## ।।वीरभद्रशिवाचार्यः। (८४)

त्रिलिङ्गदेशे विख्याते नलगोण्डाख्यमण्डले।
ग्रामोऽस्ति जङ्गमानां च चर्लपल्लीति विश्रुतः।।३८०

तत्र रेणुकशाखीयः प्रसिद्धश्च पुरातनः।
वीरगोत्रानुयायी यो मठोऽस्ति चिदरेमठः।।३८१।।

तदन्वये समुत्पन्नो नागभूषणनामकः।
तस्यासीद् शामलांबेति धर्मपत्नी पतिव्रता।।३८२।।

धर्मनिष्ठादियोगेन कृपया श्रीगुरोस्तयोः।
पुत्ररत्नमभूद्दिव्यं विश्वकल्याणहेतवे।।३८३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पवित्रे श्रावणे मासे पौर्णमास्यां तिथौ किल।
पूर्णचन्द्रकलोपेतो जन्म लेभे स बालकः।।३८४।।

वीरोऽयं वीरशैवस्य धर्ममार्गप्रवर्तकः।
भविष्यति भवेत् काले चिन्तयन्निति तत्पिता।।३८५।।

वीरभद्र इति प्राह तन्नाम तद्वादशेऽहनि।
पित्रा कृतस्तु संकल्पो मिथ्या जातु कथं भवेत्।।३८६।।

ज्ञानसिंहासनपीठस्य ८४तमः अधिपतिः वीरभद्रशिवाचार्यः त्रिलिङ्गदेशे नलगोण्डमण्डले चर्ल्लयाल्लीग्रामे चिदरेमठे नागभूषणात् साम्बलाम्बायां जनिं लेभे। सोऽयं पित्रा वीरभद्रनाम्ना संयोजितः।।३८०-३८६।।

## ।। बाल्यं विद्याभ्यासश्च।।

तस्य प्राथमिकं तावद् सप्तकक्षात्मकं खलु।
स्वग्रामे नलगोण्डे च पूर्णमासीत्तु शिक्षणम्।।३८७।।

धर्मोक्तेन विधानेन पिता तन्नागभूषणः।
संस्कारानकरोत्तस्य यथाकालं यथाविधि।।३८८।।

वर्षे त्रयोदशे प्राप्ते बालके वीरभद्रके।
वार्धक्यात्पितरौ तस्य प्राप्तौ कैवल्यमेव च।।३८९।।

मातापित्रोर्वियोगेन अभावाद्रक्षकस्य च।
अनाथो बालको जातो वीरभद्रय्यनामकः।।३९०।।

निर्वाहार्थं किलैतस्य वृत्तिं शैक्षणिकीं तदा।
अङ्गीकर्तुः समारब्धः स्वग्रामे बालशिक्षणम्।।३९१।।

शासनस्य च शालायां सेवां कृत्वा तु वार्षिकीम्।
त्यागपत्रं विधायासौ स्वाध्याये निरतोऽभवत्।।३९२।।

राजधानीं ततो गत्वा बालोसो विदुषां गृहे।
स्थित्वा संस्कृतभाषायाःशुभारम्भंव्यधाद् दृढम्।।३९३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ततः श्रीवीरभद्रो हि गत्वा नीरडगुंभकम्।
ख्याते गुरुकुले तत्र सिद्धलिङ्गाख्यसंज्ञके।।३९४।।

प्रवेशं प्राप्य पद्धत्या सुधीरो विनियान्वितः।
तत्रत्यशास्त्रिवर्येभ्यः शुश्रूषया त्वहर्निशम्।।३९५।।

अधीत्य पञ्चकाव्यानि नाटकान्यपि सादरम्।
संस्कृतादिषु भाषासु पाण्डित्यं लब्धवान् किल।।३९६।।

इटगी–नामके ग्रामे प्रान्ते नैजामनामके।
आन्ध्रीयवीरशैवानामासीत्सम्मेलनं तदा।।३९७।।

बापूराव इति ख्यातो न्यायवादी तु धार्मिकः।
सम्मेलनस्य चाध्यक्षस्थानं भूषितवान् खलु।।३९८।।

छात्रैर्जिज्ञासुभिर्युक्तो वीरभद्रःसमागतः।
तस्यापि भाषणं जातं लोककौतुककारकम्।।३९९।।

बापूरावः सभाध्यक्षः श्रुत्वा भाषणमद्भुतम्।
परीक्ष्य प्रतिभां तस्य स्वसाहाय्यमघोषयत्।।४००।।

अस्य वीरभद्रस्य सप्तमकक्षापर्यन्तं शिक्षणं नलगोण्डनाम्नि स्वग्रामे संजातम्। यदा बालः त्रयोदशवर्ष देशीयः अभूत् तदा तस्य पितरौ कैवल्यं प्राप्तवन्तौ। स्वग्रामे बालशिक्षणं कुर्वन् अधीयान; एष बालः एकवर्षानन्तरं शासनशालासेवां परित्यज्य राजधानीं गतः। विदुषां गेहे तिष्ठन् संस्कृतभाषामधीयानः गुरुकुले शास्त्रिवर्येभ्यः संस्कृतभाषायां पञ्चसु काव्येषु नाटकेषु च पाण्डित्यं अवाप्तवान्। एकदा नैजामप्रान्ते इटगीग्रामे बापूरावस्य आध्यक्ष्ये भाषणप्रतियोगितायाम् अद्भुतवक्त्रे अस्मै बालाय सभाध्यक्षेण स्वसाहाय्यम् उद्घोषितम्।।३८७-४००।।

## ।।काश्यामध्ययनम्।।

भाग्यवान् वीरभद्रय्यः साहाय्येनार्थिकेन च।
कृतेन बापुरावेण काश्यामधीतवान् किल।।४०१।।

दत्तं तोटय्यभक्तेन नलगोण्डास्थितेन तु।
निवेदनात्मकं पत्रं पीठाधिपतिसन्निधौ।।४०२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पत्रं तद्गुरवे दत्त्वा तदाज्ञां परिपालयन्।
गुरुकुलं विवेशाथौ वीरभद्रोविनीतधीः।।४०३।।

पञ्चाक्षरशिवाचार्यकृपाच्छत्रबलेन वै।
मठे गुरुकुले तत्र निवसन्नियमेन तु।।४०४।।

यागेश्वरगुरूणां च शिष्यो भूत्वा निरन्तरम्।
अधीत्य सकलान् वेदान् वेदतीर्थो बभूव सः।।४०५।।

एवमेव क्रमेणैव काव्यानि सकलान्यपि।
अधीत्य वीरभद्रो हि काव्यतीर्थोऽभवत्खलु।।४०६।।

स्मृतीनां दर्शनानां च कृत्वा स्वाध्यायमेव च।
तीर्थोपाधिं मसौ प्राप्तः शास्त्रयोरुभयोरपि।।४०७।।

पाण्डित्यप्रतिभां दृष्ट्वा सर्वैः काशीस्थपण्डितैः।
तदीयगौरवार्थं तु सभा तत्र नियोजिता।। ४०८।।

आसीत् तत्र सभाध्यक्षो मुकुन्दाख्यो महामतिः।
तस्य कृत्वा परीक्षां तु शलाकाख्यां विनूतनाम्।४०९।।

सुष्ठु प्रश्नोत्तरंश्रुत्वा हृष्ट उद्घोषमाचरत्
विद्वत्सु रत्नरूपत्वाद्विद्यारत्नोऽसि त्वं खलु।।४१०।।

इत्येवं घोषयित्वा तु विद्यारत्नं तदा किल।
उपाधिं वीरभद्राय दत्त्वा सन्तोषमावहत्।।४११।।

अथ बापूरावकृतेन अर्थसाहाय्येन भाग्यवान् वीरभद्रय्यः काश्याम् अधीयानः पञ्चाक्षरशिवाचार्यकृपया मठे गुरुकुले निवसन् यागेश्वरगुरूणां शिष्यः सन् वेदान् अधीयान; वेदतीर्थः सम्बभूव। तथैव काव्यतीर्थः भवन् स्मृतीनां दर्शनानां च अध्ययनं विधाय तीर्थोपाधिविभूषित; समभूत्। अस्य पाण्डित्यप्रतिभायाः गौरवाय काश्यां पण्डितैः मुकुन्दस्य सभाध्यक्षत्वे विहितायां शलाकापरीक्षायां समुत्तीर्णाय वीरभद्राय विद्यारत्नमिति उपाधिः प्रदत्तः।।४०१-४११।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।लिपिपाण्डित्यम्।।

स्वकीयेन प्रयत्नेन गुरोश्च कृपया तथा।
चत्वारिंशल्लिपीनां च ज्ञानं स प्राप्तवान् खलु!।४१२।।

शिलालेखाननेकान् स ह्यपूर्वपठितान् किल।
पठित्वा तन्निगूढार्थं प्रकाश्य मानमाप्तवान्।।४१३।।

श्रीमान् वीरभद्र गुरोः कृपया स्वप्रयत्नेन च चत्वारिंशल्लिपीनां ज्ञानं सम्प्राप्य अपूर्वपठितान् अनेकान् शिलालेखान् पठित्वा तस्य निगूढार्थस्य प्रकाशनं कृतवान्।।४१२-४१३।।

## ।।गुरुकुलस्थापनं विभूतिपत्रिका च।।

चिदरेमठवंशीयो वीरभद्रो हि पण्डितः।
दशवर्षमुषित्वा हि काश्यां शास्त्राण्यधीत्य च!।४१४।।

गुरोराज्ञां गृहीत्वा तु ग्राममागत्य पण्डितः।
स्वाधीतानां हि शास्त्राणां बोधनाय विचिन्तितः।।४१५।

अत्रान्तरे तदा तस्मै बोधनाय निमन्त्रणम्।
आगतं ह्यादरेणैव ग्रामाद्यादगिरेस्तदा।।४१६।।

महाविद्यालये तत्र विख्याते शंकराख्यया।
प्रपाठ्य वर्षमेकं तु पुनः स्वग्राममागतः।।४१७।।

पुनः स हैदराबादे नागय्यस्य गृहे तदा।
विद्यालयं विधाय स्वं स्वयं प्राध्यापकोऽभवत्।।४१८।।

पत्रिकां स्वां विभूत्याख्यां प्रारभ्य मासिकीमसौ।
संपादकः स्वयं भूत्वा निनाद धर्मदुन्दुभिम्।।४१९।।

एषः वीरभद्रपण्डितः दश वर्षाणि काशीं वसन् शास्त्राणि अधीत्य गुरोराज्ञया स्वाधीतशास्त्राणाम् अध्यापनाय ग्रामस्थिते वर्षमेकं महाविद्यालये प्रपाठ्य हैदराबादमध्ये नागय्यगृहे विद्यालयम् उद्घाट्य प्राध्यापयन् मासिकीं पत्रिकां विभूतिनाम्नीं धर्मदुन्दुभिं मिनादयन् स्वयं सम्पादकः ब्यराजत।।४१४-४१९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।काशीपीठारोहणम्।।

पञ्चाक्षरशिवाचार्यःस्वेच्छापत्रं तदा खलु।
लिखित्वा वीरभद्रायस्वयं लिङ्गैक्यमाप्तवान्।।४२०

इच्छापत्रानुसारेण वीरभद्रस्तु पण्डितः।
सहसाऽगत्य काशीं सोऽकार्षीदन्त्येष्टिमुत्तमाम्।।४२१।।

आश्विने शुक्लपक्षे च दशम्यां च शुभे तिथौ।
अभिषेकमुहूर्तं हि पण्डितैर्निश्चितंतदा।।४२२।

पण्डितो वीरभद्रो हि पीठं रम्भापुरी-स्थितम्।
गत्वा सान्निध्यमासाद्य अकरोत् तन् निमन्त्रणम्।।४२३।।

जगद्गुरुशिवानन्दशिवाचार्यो महागुरुः।
कुर्वन् यात्रां स्वयानेन मार्गे पूजां विनिर्वहन्।।४२४।।

बोधयन् भक्तवर्गं च योगक्षेमं विचारयन्।
समायातो हि सानन्द आनन्दनगरीं खलु।।४२५।।

निश्चिते च मुहूर्ते तु शुभग्रहसमन्विते।
रम्भापुरीशसान्निध्ये भक्तानां च ह्युपस्थितौ।।४२६।।

दक्षिणोत्तरदेशानां स्वामिनां समुपस्थितौ।
जातःपट्टाभिषेको हि वीरभद्रगुरोस्तदा।।४२७।।

ज्ञानसिंहासनस्यास्य काशीपीठस्य वै किल।
चतुरशीतिसंख्याको वीरभद्रो जगद्गुरुः।।४२८।।

वीरभद्रशिवाचार्यो बहुभाषाविशारदः।
व्याख्यानं पञ्चभाषासु कृत्वा कीर्तिमवाप्तवान्।।४२९।।

अथ पञ्चाक्षरशिवाचार्यः वीरभद्रनाम्ना स्वेच्छापत्रं विलिख्य लिङ्गैक्यं समवाप्तवान्। तदनुसारं वीरभद्रः सहसा काशीमागत्य गुरोः अन्त्येष्टिं विधाय पण्डितैः निश्चितम् अभिषेकमुहूर्तं आश्विन शुक्ले दशम्यां विज्ञाय रम्भापुरीस्थितं पीठं गत्वा पीठाधीश्वरं निमन्त्रितवान्। तदनु जगद्गुरुः शिवानन्दशिवाचार्यः रम्भापुरीतः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



सानन्दम् आनन्दकाननं श्रीकाशीम् आगत्य स्वसान्निध्ये दक्षिणोत्तरदेशीयानां स्वामिनांमुपस्थितौ वीरभद्रगुरवे चतुरशीतितमं जगद्‌गुरुत्वं पट्टाभिषेकविधिना सम्पादितवान्। सोऽयं वीरभद्रशिवाचार्यः बहुभाषाविशारदः पञ्चसु भाषासु व्याख्यानं विधाय सुकीर्तिम् आप॥४२०-४२९॥

## ।विद्वद्भिरभिनन्दनम्।।

**एकदा हि महापीठे सभा ह्येका नियोजिता।**
**शताधिकाश्च विद्वांसः समाहूतास्तदाऽभवन्।।४३०।।**

**तस्यां विद्वत्सभायां तु शास्त्रेषु विविधेषु च।**
**अभूदभूतपूर्वो हि शास्त्रार्थो विदुषां मिथः।।४३१।।**

**ततो गभीरया वाण्या गीर्वाण्या हि जगद्गुरुः।**
**बभाषे शिवसिद्धान्तं सर्वसिद्धान्तशेखरम्।।४३२।।**

**सभायां गुरवे दत्तं काशीस्थगुरुभिस्तदा।**
**अभिनन्दनपत्रं च विद्वत्स्वाक्षरसंयुतम्।।४३३।।**

एकदा महापीठे आयोजितायां सभायाम् उपस्थितेषु शताधिकविद्वत्सुविविध शास्त्रेषु संजाते शास्त्रार्थे संस्कृतेन सर्वसिद्धान्तशेखरस्य शिवसिद्धान्तस्य प्रवचनं वीरभद्रशिवाचार्येन विहितम्। अतएव सुप्रसन्नैः विद्वद्भिः स्वस्वस्ताक्षरसंयुतम् अभिनन्दनपत्रं श्रीजगद्‌गुरवे समर्पितम् अभूत्॥४३०-४३३॥

## ।।ज्ञानमन्दिरग्रन्थालयस्थापना।।

**वीरभद्रशिवाचार्यैः काशीपीठाधिपैः किल।**
**स्वाधीतसर्वग्रन्थानां संग्रहो विहितोऽद्भुतः।।४३४।।**

**स एव संग्रहो ह्यत्र ज्ञानमन्दिरसंज्ञया।**
**ग्रन्थालयस्वरूपेण राजतेऽत्यद्भुतं महत्।।४३५।।।**

**मुद्रितास्तालपत्रीया ग्रन्था बहुविधा इह।**
**सर्वे ते स्वामिपादेन ह्यधीतास्तन्नुमो वयम्।।४३६।।**

ज्ञानपीठाधिपैः श्रीवीरभद्रशिवाचार्यैः अधीतसर्वग्रन्थानां यः संग्रहः सः ज्ञानमन्दिर संज्ञया ग्रन्थालयः पीठे राजते यत्र मुद्रितानां तालपत्रीयाणां च ग्रन्थानाम्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अस्तित्वं विद्यते।।४३४-४३६।।

## ।।ऋणमोचनं प्रसादव्यवस्था।।

काश्यां विश्वेश्वर - क्षेत्रे ज्ञानसिंहासने खलु।
सुदीर्घं दीयते दानं ज्ञानस्यान्नस्य चान्वहम्।।४३७।।

आरब्धं हि युगारम्भे दानमेतद् महत्तरम्।
आर्थिकेनैव कष्टेन जातं मध्ये तु खण्डितम्।।४३८।।

ऋणभारेण भारेण पूर्वपीठाधिपाःखलु।
चिन्तामग्ना गताः सर्वे विकासेन विना तदा।।४३९।।

न भारो मेदिनी गुर्वी भारो नैव हिमालयः।
ऋणभारो महाभारो वर्धते प्रत्यहं किल।।४४०।।

ऋणभारविमोक्षाय वीरभद्रजगद्गुरुः।
उपायान् सकलान् कृत्वा क्रमशोऽमोचयदृणान्।।४४१।।

वीरभद्रशिवाचार्यैर्विद्यार्थिवत्सलैस्तदा ।
अन्नक्षेत्रं समारब्धं छात्राणां यात्रिणां कृते।।४४२।।

काश्यां ज्ञानपीठे युगारम्भतः आरब्धं ज्ञानदानम् अन्नदानञ्च प्रवर्तते· आर्थिक कष्टकारणात् प्रत्यहं वर्धमानात् महाभारात् ऋणभारः अन्नदाने बाधकः अभूत्। वीरभद्रजगद्गुरुः विविधान् उपायान् आश्रित्य क्रमशः मठस्य ऋणभारं व्यपनयत्। पुनः तेन छात्राणां यात्रिणां च कृते अन्नक्षेत्रम् आरब्धम्। ४३७-४४२।।

## ।।महाशिवरात्रिपूजायोजना।।

विकासार्थं तु पीठस्यायोजनानि बहूनि च।
गुरुणा वीरभद्रेण योजितानि तदा खलु।।४४३।।

योजनासु च सर्वासु महतीयं सुयोजना।
गृहे स्थित्वा प्रसादस्य प्राप्तेर्या परियोजना।।४४४।।

सकृत्कृतस्य दानस्य स्थायित्वे स्थापितस्य च।
निधेर्व्याजेन भक्तेभ्यः प्रसादः प्रेष्यते खलु।।४४५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



प्रसादेन च भक्तानां प्रसीदति मनः किल।
मनःप्रसादसिद्ध्यर्थं योजनैषा प्रशस्यते।।४४६।।

वीरभद्रशिवाचार्यस्वामिभिर्योजना किल।
प्रचारिता हि सर्वत्र भक्तैः सम्मिलितं बहु।।४४७।।

सम्बन्धा बहुधा प्रोक्ता लोके बन्धनकारकाः।
संसारमोचनं चैष सम्बन्धो गुरुशिष्ययोः।।४४८।।

अतःसर्वान्हि सम्बन्धान् परित्यज्य सदा बुधैः।
गुरोरेव हि सम्बन्धः कर्तव्यो बन्धमुक्तये।।४४९।।

विश्वाराध्यः शिवाचार्यः शिवरात्रौ महानिशि
विश्वेश्वरमहालिङ्गात् प्रादुर्भूतो महीतले।।४५०।।

तत्प्राकट्यनिमित्तं य उत्सवः क्रियते शुभः।
तदर्थं प्रतिवर्षं स प्रसादः प्रेष्यते किल।।४५१।।

पूर्वोक्तायोजनायां तु भक्ता ये सहभागिनः।
प्रसादः प्रेष्यते तेभ्यो पीठेन प्रतिवत्सरम्।।४५२।।

वीरभद्रशिवाचार्यकृतैषा परियोजना।
वर्धिता गुरुभिःसर्वैः सम्बन्धश्च विवर्धितः।।४५३।।

आचार्यवीरभद्रेन पीठस्य विकासाय विहितेषु आयोजनेषु एका महती योजना आरब्धा यया स्वस्वगृहे स्थितः शिवभक्तः प्रसादम् प्राप्नयात्। भक्तैः सकृत् कृतस्य दानस्य स्थायितया स्थापनम्, स्थापितमिधेः ब्याजधनेन भक्तेभ्यः प्रसादसम्प्रेषणम् अत्यद्भुतं कृत्यम् आरब्धम्। सैषा आयोजना प्रसादप्राप्त्या भक्तानां मनः प्रसादसिद्धौ नितरां प्रशस्यते। लोकेषु गुरुशिष्ययोः सम्बन्धः संसारमोचकः तदन्यसम्बन्धास्तु बन्धनकारकाः एव भवन्ति। अतः बन्धमुक्तये शिष्यैः गुरुणा सह सम्बन्धः विधेय एव। यतः महाशिवरात्रौ विश्वेश्वरलिङ्गात् विश्वाराध्यः प्रादुर्भूतः ततः प्रतिवर्षं प्राकट्यनिमितं क्रियमाणस्यउत्सवस्य शिवप्रसादः आयोजनसहभागिभ्यः पीठेन प्रेष्यते। तस्मात् सम्बन्धवर्धिनी वीरभद्रकृता एषा परियोजना श्रीगुरोः भक्तानां च मोदवर्धनाय कल्पते।।४४३-४५३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



## ।।साहित्यसेवा।।

विद्यानिधिर्वीरभद्रशिवाचार्यो जगद्गुरुः।
लिपिज्ञो लेखकश्चैव कविर्भाषाविशारदः।।४५४।।

संस्कृतान्ध्रादिभाषासु साहित्यं विपुलं किल।
विलिख्य काव्यरूपेण कीर्तिकायो बभूव ह।।४५५।।

तेषु सर्वेषु काव्येषु श्रेष्ठं श्रेष्ठतमं खलु।
शतश्लोकात्मकं काव्यं छन्दोभिर्बहुभिर्युतम्।।४५६।।

पञ्चविंशतिलीलानां शिवस्य परमात्मनः।
शतश्लोकात्मके काव्ये कविना वर्णनं कृतम्।।४५७।।

जगद् गुरुपदस्थेन बालेन कविना कृतम्।
एतद् विजयते काव्यं वीरभद्रेण शर्मणा।।४५८।।

अष्टकानि तथा चैव पञ्चकानि तथैव च।
मुक्तकादीनि काव्यानि स्तोत्राणि लिखितानि च।।४५९

अष्टोत्तरशतं नाम्नां शिव-सद्गुरुणा किल।
लिखितं पद्यरूपेण विश्वाराध्यमहाप्रभोः।।४६०।

श्रीकरस्य च भाष्यस्य चतुःसूत्रात्मकस्य च।
भूमिका लिखिता तेन विद्वन्मान्या बभूव ह।।४६१।।

ग्रन्थानां विविधानां च विमर्शलेखनानि च।
विश्रुतान्यनुमोद्यन्ते विज्ञैः पण्डिततल्लजैः।।४६२।।

संक्षेपेण गुरोरस्य साहित्यमवलोकितम्।
विस्तरेण विमर्शश्च पुनः प्रस्तोष्यतेऽपि च।।४६३।।

विद्यावान् लिपिज्ञानवान् भाषाविशारदः लेखकः कविश्च भवन् वीरभद्रशिवाचार्यः संस्कृते आन्ध्रादिभाषासु च विपुलं साहित्यं लिखित्वा कीर्तिकायः राजते। भगवतः शिवस्य पञ्चविंशतिलीलानां शतश्लोकात्मकं काव्यं बहुभिः छन्दोभिः जगद्गुरुणा कविनासंदृब्धम्। वीरभद्रेण अवरकानि पञ्चकानि मुक्तकादीनि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्तोत्राणिकाव्यानि च रचितानि। श्रीविश्वाराध्यजगद्गुरोः नाम्नाम् अष्टोत्तरशतस्य पद्यानि सद्गुरुणा निर्मितानि। श्रीकरभाष्यस्य पद्यानि सद्गुरुणा निर्मितानि। श्रीकरभाष्यस्य चतुःसूत्र्याः प्रौढा भूमिका लिखिता। विविधानां ग्रन्थानां विमर्शाः अपि एतदीयाः विश्रूयन्ते। अतिविस्तृतम् एतस्य जगद्गुरोः साहित्यं जनैः सम्मान्यते।।४५४-४६३।।

वर्षत्रयेण वीरभद्रशिवाचार्यः ऋणभारात् पीठं विमोच्य ज्ञानमन्दिरं नाम ग्रन्थालयं प्रतिष्ठाप्य प्रसादपरियोजनया भक्तसंकुल प्रसादिनं विधाय उत्तरोत्तरम् अल्पीयसा कालेनैव अनुकरणीयाचरणः सम्बभूव। अथ कृशतां गतः विद्यया वपुषा च उत्तमाय योग्याय च व्यासनूरुमठाधिपाय इच्छापत्रं विलिख्य औषधं जाह्नवीतोयं वैद्योगहगाधरो हरः इत्येवं ध्यायन् महामन्त्रः समुच्चरन् शिवसायुज्यं समवाप।।४६४-४७२।।

## ।।शिवैक्यपर्वकालः।।

वर्षत्रयात्मकालेन वीरभद्रो जगद्गुरुः।
पीठं विमोचयामास ऋणभारात् सुधीरसौ।।४६४।।

ग्रन्थालयं प्रतिष्ठाप्य ज्ञानमन्दिरनामकम्।
दुर्लभान् सुबहून् ग्रन्थान् यत्र स्थापितवान् मुदा।।४६५।।

योजनां तामपूर्वां च प्रसादपरियोजनाम्।
कृत्वा प्रसादयामास वदान्यान् भक्तसंकुलान्।।४६६।।

उत्तरोत्तरकाले तु सर्वैरपि विवर्धितः।
अतश्चारित्र्यमेतेषां स्मरणीयं सदा सदा।।४६७।।

काले चाल्पे च तावत्ते कृत्वा भूरि परिश्रमम्।
अनुभूय कृशत्वं स्वं चिन्तिता मनसा खलु।।४६८।।

तत्कालीनेषु छात्रेषु व्यासनूरुमठाधिपः।
विद्यया वपुषा चैव योग्योऽयमिति निश्चितः।।४६९।।

इच्छापत्रं स्वकीयं स वीरभद्रो जगद्गुरुः।
विलिख्य नाम्ना तस्यैव गोपनीयं कृतं तदा।।४७०।।

शरीरे जर्जरे जाते रोगग्रस्ते कलेवरे।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



औषधं जाह्नवीतोयं वैद्यो गङ्गाधरो हरः।। ४७१।।

अतो गङ्गाजलं पीत्वा वीरभद्रो महागुरुः।
समुच्चरन्महामन्त्रं प्राप सायुज्यमुत्तमम्।।४७२।।

तदुत्तरं वीरभद्रशिष्य: विश्वेश्वर-शिवाचार्य: काशीज्ञानपीठे पञ्चाशीतितम: जगद्गुरु: बभूव। एतस्य जन्म कर्नाटकप्रदेशे हावेटीमण्डले मासूरुग्रामे समभूत्। तत्र केदारपीठशाखीय; हिरेमठ: परमेश्वर: रुद्रम्मा गर्भात् षट् पुत्ररत्नानि जनयामास। तेषु तृतीय: सिद्धलिङ्गा; सुलक्षण: रहटीहल्यां लब्धजन्मा जातकर्मसंस्कारेण शोधित:।।४७३-४७८।।

## ।।विश्वेश्वरशिवाचार्यः।।( ८५ )

काश्यां स्थिते महापीठे पञ्चाशीतितमो गुरुः।
विश्वेश्वरशिवाचार्य इति नाम्ना रराज वै।।४७३।।

राज्ये कर्नाटके तत्र हावेरीमण्डले खलु।
मासूरूनामके ग्रामे तस्यासीज्जन्म पावनम्।।४७४।।

इतिहासप्रसिद्धेऽस्मिन् ग्रामे मासूरुनामके।
केदारपीठशाखीयो मठोऽस्त्यत्र हिरेमठः।।४७५।।

परमेश्वररुद्रम्मदम्पत्योर्गर्भकोठरात् ।
पुत्ररत्नानि जातानि षडैश्वर्यनिभानि च।।४७६।।

तृतीयस्तेषु पुत्रेषु सिद्धलिङ्गोऽभवत्तदा।
सुलक्षणः सदाचारी गुर्वाज्ञापरिपालकः।।४७७।।

रट्टीहल्लयां हि तज्जन्म शिवाचार्यमठे किल।
जातं शुभदिने तस्य जातकर्म कृतं तदा।।४७८।।

## ।।प्राथमिकशिक्षणं संस्कृताध्ययनं च।।

मठाध्यक्षःशिवाचार्यःसिद्धलिङ्गम् महागुरुः।
अष्टमे खलु वर्षे हि दीक्षां कृत्वा तु बालकम्।।४७९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



संस्कृतस्य प्रशिक्षार्थं कडेनन्दीस्थितं यदा।
होलीहंपेश्वराख्यं तं मठं प्रेषितवान् मुदा।।४८०।।

तदा श्रीसिद्धलिङ्गार्यो गुरुमूर्त्याख्यशास्त्रिणाम्।
अन्तेवासितया स्थित्वा प्रारभेऽध्ययनं खलु।।४८१।।

समारभ्याक्षराभ्यासं यावत्काव्यमधीतवान्।
व्यतीतान्यष्टवर्षाणि विद्यासक्तस्य तस्य वै।।४८२।।

अयं सिद्धलिङ्गः अष्टमे वर्षे दीक्षाम् अवाप्य कडे नन्दीस्थं मठं गत्वा गुरुमूर्ति शास्त्रिणाम् अन्तेवासी भवन् अक्षराभ्यासात् आरभ्य अष्ट वर्षाणि काव्यम् अधीतवान्।।४७९-४८२।।

## ।।क्यासनूरुमठस्य पट्टाभिषेकः।।

शिवमोग्गासमीपस्थः क्यासनूरुमठः खलु।
रिक्तस्तु वर्तते तत्र नास्ति कोऽपि मठाधिपः।।४८३।।

विद्याविनयसम्पन्नः कुलशीलसमन्वितः।
सर्वसल्लक्षणोपेतः सिद्धलिङ्गो बटुःकिल।।४८४।।

भवेदयं मठाधीशो लोककल्याणकारकः।
इत्येवं हि विनिश्चित्य वागीशो हि महागुरुः।।४८५।।

शुभे चैव मुहूर्ते च शास्त्रोक्तविधिना खलु।
नगरे गुन्तकल्ले हि चकार पट्टबन्धनम्।।४८६।।

पट्टाभिषेकसमये वागीशगुरुणा किल।
श्रीवृषभशिवाचार्याभिधानमकरोत् तदा।।४८७।।

मठोऽयं पुत्रवर्गीयो बटुस्तु भिन्नवंशिकः।
परम्परावरोधित्वाद् अभिषेको विसंगतः।।४८८।।

इति वादं गृहीत्वा तु मठीया वंशजा जनाः।
न्यायालयं हि गत्वा तु वादे विजयिनोऽभवन्।।४८९।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वार्तामिमां समाकर्ण्य नूतनो हि मठाधिपः।
चिन्तार्णवे निमग्नःसन् गुरुसान्निध्यमागतः।।४९०।।

तत्र क्यासनूरुमठे रिक्ते पीठाधिपपदे वागीशः गुरुः वृषभशिवाचार्य नामकरणं विधाय गुन्तकल्ले नगरे सिद्धलिङ्गाय पट्टबन्धनं विहितवान्। किन्तु पुत्रवर्गीयस्य मठस्य कृते भिन्नवंशोद्भवस्य सिद्धलिङ्गस्याभिषेकः असंगतः इत्यतः वादम् विहितवन्तः मठीयवंशजाः न्यायालयेन विजयिनः उद्घोषिताः। ततश्च सिद्धलिङ्गाः चिन्तामग्नः सन् गुरुसमीपं समागतः।।४८३-४९०।।

## ।।संस्कृताध्ययनार्थं सोल्लापुरगमनम्।।

आगतं तं समालोक्य श्रीशैलस्य महागुरुः।
समीपे स्वं तमाहूय प्रीत्या वचनमब्रवीत्।।४९१।।

ललाटे लिखिता रेखा केन वा परिवार्यते।
स्वाध्यायवर्धनो भूत्वा भ्राजतां भाग्यवान् भवान्।।४९२।।

गुरोरादेशमासाद्य गतो सोल्लापुरं प्रति।
तत्रत्यपाठशालायां प्रवेशं प्राप्तवान्किल।।४९३।।

शास्त्रिणो जगदीशस्य सेवां कृत्वाऽनपायिनीम्।
अधीत्य काव्यशास्त्राणि भाषायां प्रौढिमाप्तवान्।।४९४।।

श्रीशैलमहागुरुः प्रीत्या सिद्धलिङ्गं संवर्धयन् प्रोवाच— "भाग्यवान् भवान् स्वाध्यायवर्धनः सन् भ्राजताम् इति"। गुरुराज्ञां शिरसि निधाय शोल्लापुरं गतः श्रीजगदीशशास्त्रिणः गुरोः काव्यशास्त्राणि अधीत्य भाषायां प्रौढिम् अलभत।।४९१-४९४।।

## ।।उच्चशिक्षार्थं काशीगमनम्।।

सुहृदो जत्कराख्यस्य साहाय्यं प्राप्य वै किल।
श्रीकाशीमेषआगत्य प्रारब्धाध्ययनोऽभवत्।।४९५।।

हितेन सहितं यत्तु तद्धि साहित्यमुच्यते।
तस्य त्वध्ययनं जातं ताराचरणसन्निधौ।।४९६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शास्त्रेषु कठिनं तावन्न्यायशास्त्रं प्रकीर्तितम्
गुरुभ्यः शिवदत्तेभ्यस् तस्य चाध्ययनं कृतम्।।४९७।।

एवमध्ययनं कृत्वा गुरुसेवां विधाय च।
साहित्ये न्यायशास्त्रे च पाण्डित्यं लब्धवान् यतिः।।४९८।।

जत्करसुहृदः साहाय्यं गृहीत्वा एष श्रीकाश्यां ताराचरणसन्निधौ साहित्याध्ययनम् अथ च शिवदत्तगुरोः न्यायशास्त्राध्ययनं विधाय यतिरसौ महान् पण्डितः सञ्जातः।।४९५-४९८।।

## ।।काशीपीठस्य पट्टाभिषेकः।।

श्रीवृषभशिवाचार्यः काशीं नन्दवनंश्रितः।
स्वाध्यायसद्गुणैरेव विश्रुतः संबभूव ह।।४९९

एतत्सर्वं समीक्ष्यैव वीरभद्रजगद्गुरुः।
परिवीक्ष्य स्वमस्वास्थ्यं विमृशन् बहुशो हृदि।।५००।।

निरणैषीदसौ योग्यः प्रमुदितान्तरङ्गकः
इच्छापत्रं स्कीयन्तु तन्नाम्ना व्यलिखत् सुधीः।।५०१।।

वैद्यानामुपचारस्य नैष्फल्यं यदजायत।
तदुच्चरन्महामन्त्रं शिवसायुज्यमाप्तवान्।।५०२।।

वीरभद्रशिवाचार्यसमाधिस्तत्र वै किल।
हरेश्वरगुरोरेव सन्निधौ समजायत।।५०३।।

शुभस्य शीघ्रं कर्तव्यमिति वाक्यमनुस्मरन्।
नूतनाः स्वामिपादास्तु मुहूर्तं सुविचार्य च।५०४।।

सर्वान्पीठान्स्वयं गत्वा भक्तानाहूय एव च
तिथौ धनत्रयोदश्यामभिषेको विनिश्चितः।।५०५।।

वीरसद्धर्मपीठेशौ विश्ववन्द्यौ जगद्गुरू।
आगतौ नगरीं काशीं जीवन्मुक्तिप्रदायिनीम्।।५०६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पीठेऽस्मिन् वर्तते तत्र कैलासमण्टपं खलु।
ज्ञानपीठं तु तत्रस्थमभिषेकस्थलं भूत्।।५०७।।

शताधिकाःशिवाचार्या बहवः शास्त्रिणस्तथा।
भक्तास्त्वमितसंख्याकास्तत्रासन्मण्टपे खलु।।५०८।।

चन्नवीरशिवाचार्यप्रमुखानामुपस्थितौ ।
अभिषेकस्तदा जातो वेदागमविधानतः।५०९।।

विश्वेश्वरशिवाचार्य इति तन्नाम घोषितम्।
सिंहासनं समारुह्य समेषां समुपस्थितौ।
गृहीत्वा धर्मदण्डं तु धर्ममुपदिदेश च।।५१०।।

पञ्चाशीतितमश्चैष पट्टः प्रेष्ठः प्रकीर्तितः।
पूर्वाचार्यमहिम्नैव सुष्ठु सम्पूर्णतामगात्।।५११।।

यश्चैषः सिद्धलिङ्गः श्रीवृषभशिवाचार्यः विद्याविनयान्वितः तस्य सदाचारेण प्रमुदितान्तरङ्गः वीरभद्रजगद् गुरुः तन्नाम्ना इच्छापत्रं विलिख्य महामन्त्रमुच्चरन् शिवसायुज्यं प्राप्तवान्। हरेश्वरगुरोः सन्निधौ श्रीवीरभद्रसमाधि; आरचितः। कैलाशमण्डपे वीरपीठेश; धर्मपीठेशश्च द्वौ जगद्गुरु शताधिकैः शिवाचार्यै; शास्त्रिभिश्च सह अमितसंख्याकानां भक्तानाम् उपस्थितौ विश्वेश्वरशिवाचार्यनाम्ना सम्भूष्य धनत्रयोदश्यां तिथौ पीठगुरुतां ददतुः। पूर्वाचार्यमहिम्ना एषः पञ्चाशीतितमः विश्वेश्वर शिवाचार्यः जगति विश्रुतः।।४९९-५११।।

## ।।प्रथमा गोकर्णयात्रा।।

विश्वेश्वरशिवाचार्यःपूजां तां मण्डलावधिम्।
पूरयित्वा तु पीठेऽस्मिन् धर्मयात्रां समारभे।।५१२।।

गोकर्णाख्ये महाक्षेत्रे हन्नेरडुमठाधिपः।
मडिवलशिवाचार्यो निरमान्मठमेककम्।।५१३।।

उद्घाटनाय तस्यैव समाहूतो महागुरुः।
कृतो हि वैभवेनैव तिर्यगान्दोलिकोत्सवः।।५१४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



ज्ञानाधिपतिना तत्र मठस्योद्घाटनं कृतम्।
वीरशैवमठोनाम्ना घोषितोऽभून्महत्तमः।।५१५।।

भक्तेन रावणेनैव नीयमानं महत्तरम्।
आत्मलिङ्गं हि चात्रैव स्थापितं गणपेन च।।५१६।।

अतो गोकर्णकं क्षेत्रं क्षितिमण्डलसंस्थितम्।
कैलास इति विज्ञेयं शिवभक्तैः सदा खलु।।५१७।।

वीरशैवमठे ह्यत्र कृते यात्रार्थिनां किल।
निवासस्य प्रासादस्य व्यवस्था वर्तते सदा।५१८।।

मडिवालशिवाचार्यस्वामिनां कार्यमीदृशम्।
दृष्ट्वा सर्वेऽपि तत्रत्याः प्रशशुर्हि मुर्हुर्मुहुः।।५१९।।

श्री विश्वेश्वरशिवाचार्यः मण्डलावधिं पूजां समाप्य काशीपीठतः धर्मयात्राम् आरब्धवान्। गोकर्णमहाक्षेत्रे हन्नेरडुमठाधिपः मडिवालशिवाचार्यः एकं मठं यद् निरमात्। तत्र च तिर्यगान्दोलिकोत्सवं विदधानः उद्घाटनमङ्गलाय ज्ञानपीठाधीशं सम्प्रार्थितवान्। धर्मयात्रार्थं सम्प्रवृत्तेन एनेन मठस्योद्घाटनम् अथ च तन्नामकरणं विहितम्– वीरशैवमठ इति। एकदा रावणेन कैलासाद् आनीयमानं शुभमात्मलिङ्गं यतो गोकर्णक्षेत्रे स्थापितं तत एवास्य गोकर्णक्षेत्रस्य क्षितिमण्डलस्य-कैलास-संज्ञा प्रथते। मडिवालशिवाचार्य निर्मितेऽस्मिन् वीरशैवमठे यात्रार्थिनां कृते निवासस्य भोजनस्य च व्यवस्था वरीवर्तीति मठ-तत्स्थापकयोः महती प्रशस्तिर्विद्यते।।५१२-५१९।।

## ।।महाराष्ट्रस्य धर्मयात्रा।।

वीरशैवो महाधर्मो सनातन इतीरितः।
अस्यानुयायिनः सर्वे सर्वत्र निवसन्ति हि।।५२०।।

महाराष्ट्रप्रदेशे च शिक्षासौविध्यलोपतः।
अर्थकष्टेन पीड्यन्ते बहवो बन्धुबान्धवाः।।५२१।।

अतस्तत् परिहारार्थं सर्वेषु मण्डलेषु च।
कर्तव्या दीर्घयात्रेति गुरुभिश्चिन्तितं किल।।५२२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



महाराष्ट्रस्य पूर्णस्य धर्मयात्राचिकीर्षया।
एकदा गुरुभिस्तत्र योजना सुष्ठु निर्मिता।।५२३।।

विश्वंभरं पुरस्कृत्य धर्मयात्रा सुनिश्चिता।
उद्धवो जंगमोऽप्यत्र प्रमुखो मार्गदर्शकः।।५२४।।

स्वामी रेवणसिद्धस्तु पराण्डाया मठाधिपः।।
धर्मप्रचारसन्मार्गे नेतृत्वमभजत्खलु।।५२५।।

ग्रामे ग्रामे च सर्वत्र तिर्यगान्दोलिकोत्सवः।
इष्टलिङ्गस्य पूजा च तत्त्वचिन्ता तथैव च।।५२६।।

प्रक्रमे दिनचर्यायां निश्चिता च दिने दिने।
सर्वेषु मण्डलेष्वेवं मास एकः सुयोजितः।।५२७।।

ग्रामीणानां हि बालानां वसतेर्भोजनस्य च।
सौलभ्यार्थं तु सर्वत्र विद्यार्थिनिलयाः खलु।।५२८।।

स्थापिता गुरुभिस्तत्र बहवः सुनियोजिताः।
सर्वक्षेत्रेषु ते सर्वे जना राष्ट्रहिते रताः।।५२९।।

विश्वेश्वरशिवाचार्यमहास्वामिमहोदयैः ।
या कृता धर्मयात्रा तु साऽभवद् भूरिदा शुभा।।५३०।।

सनातनः वीरशैवधर्मः सर्वत्र अनुयायिभिः निवसद्भिः धार्यते। तत्र महाराष्ट्रप्रदेशे शिक्षासौविध्यलोपात् अर्थकष्टेन पीड्यमानैः सत्संगतत्त्वप्रबोधसदाचारवंचितैः यथा वीरशैवधर्मप्रबोधः भवेत् तदर्थं विश्वेश्वरशिवाचार्यमहोदयैः धर्मयात्रा प्रवर्तिता। सम्पूर्णे महाराष्ट्रे सर्वेषु मण्डलेषु इयं दीर्घयात्रा प्रवर्तेत एतदर्थं मार्गदर्शकरूपेण जङ्गमः श्रीमान् उद्धवः उद्यतः अभूत्। तत्र च अग्रणीः विश्वम्भरः आसीत्, यस्तु रेवणसिद्धः स्वामी पराण्डामठाधिपः स धर्मप्रचारणे नेतृत्वं विहितवान्। सर्वत्र ग्रामे ग्रामे तिर्यगान्दोलिकोत्सवः प्रावर्तत, प्रतिमण्डलं मासानुष्ठेयात्मा दिनचर्या निश्चिता।

तत्र दिने दिने इष्टलिङ्गस्य पूजा तत्त्वचिन्ता आचारप्रबोधनं वीरशैवधर्ममाहात्म्यं च घटकतया समादृतम्। एतस्मिन् प्रक्रमे ग्रामवासिनां निवासस्य भोजनस्य छात्रावासस्य च सौलभ्यं प्रकल्पितम्। राष्ट्रहितकांक्षिणः सर्वसमाजोपकारकाः जनाः जगद्गुरुभिः सर्वेषु क्षेत्रेषु समुदायभावमापन्नाः यां धर्मयात्रां सम्पादितवन्तः सा सर्वेषां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शुभावहा भूरिदा धन्यताप्रदा च प्राभवत्॥५२०-५३०॥

## ।।केदारपट्टाभिषेकः।।

देवभूमौ हिमाद्रौ च त्र्यक्षरेण प्रतिष्ठितम्।
वर्तते पीठमेकं यद् वैराग्याख्यं पुरातनम्।।५३१।।

परम्परा तत् पीठस्य ह्यखण्डं वर्तते किल।
विरक्ता ज्ञानिनश्चैव बहवो गुरवःस्मृताः।।५३२।।

केनचित्कारणेनैव पीठं वैराग्यनामकम्।
विश्वलिङ्गगुरोःपश्चाद्रिक्तमासीत् तदा खलु।।५३३।।

विपत्तिं तां निराकृत्य शिष्यं निश्चित्य तत्क्षणे।
परम्परामनुसृत्य कर्तव्यं पट्टबन्धनम्।।५३४।।

इत्येवं निर्णयं कृत्वा पीठाचार्यास्तु वै तदा।
काशीपीठाधिपं तत्र नियोक्तुं कार्यसिद्धये।।५३५।।

परम्पराप्रमाणेन मुत्तनालमठाधिपः।
शान्तलिङ्गशिवाचार्यो निश्चितः शिष्य उत्तमः।।५३६।।

अयं शान्तः स्वभावेन विनयेन समन्वितः।
अधीत्य काश्यां विद्वद्भ्यो विद्यासंपद्विभूषितः।।५३७।।

गुरुणा नीलकण्ठेन प्रेम्णा यदेष संस्कृतः।
शिष्येषु तद् वरिष्ठत्वाच् चयनं खल्वजायत।।५३८।।

पीठे ओखीमठे तत्र मुहूर्ते च शुभे खलु।
आगमोक्तप्रकारेण संस्कारःसमजायत।।५३९।।

श्रीसालूरुमठाध्यक्षाः स्वामिनश्चन्नवीरकाः।
विधौ पट्टाधिकारे च नेतृत्वमभजन् खलु।।५४०।।

आचार्यत्रयसान्निध्यं भक्तानां च ह्युपस्थितिः।
सन्तोषदायकं जातं तत्रत्यानां कृते तदा।।५४१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विश्वेश्वरशिवाचार्यमहास्वामिप्रयत्नतः ।
अनाथं यद् महापीठं सनाथमभवत्तु तत्।।५४२।।

स्वभावस्य हि शान्तत्वात् शान्तलिङ्गजगद्गुरुः।
अनुगृह्णन्स्वभक्तान् स चरन्नासीदहर्निशम्।।५४३।।

कलिःशयानो भवति संजिहानस्तु द्वापरः।
त्रेतामेति समुत्तिठन् कृतं सम्पद्यते चरन्।।५४४।।

चरतेर्महिमा प्रोक्तः श्रुतौ जनहिताय च।
ये चरन्ति चरैवेति गतिस्तेषां हि निश्चितम्।।५४५।।

एतां श्रुतिमनुसृत्य शान्तलिङ्गजगद्गुरुः।
यावदायुर्हि सर्वत्र संचरन्कीर्तिभागभूत्।।५४६।।

शान्तलिङ्गशिवाचार्यकार्यकालादनन्तरम् ।
पीठे वैराग्यके तत्र पुनर्वादो बभूव ह।।५४७।।

विश्वेश्वरशिवाचार्यनेतृत्वे च पुनः खलु।
सिद्धेश्वरगुरोस्तत्र पट्टबन्धो ह्यजायत।।५४८।।

एवं वैराग्यपीठं हि मोचयन् संकटान् मुदा।
उद्धारकाग्रणीः स्वामी पीठाचार्यः सदा जयेत्।।५४९।।

देवभूमिः हिमाद्रिः भारतराष्ट्रश्रियम् उन्नमयति। तत्र श्रीमता त्र्यक्षरशिवाचार्येण वैराग्यसंज्ञकं पीठं पुरा स्थापितमासीत्। तस्य पीठस्य काचन विलक्षणा विलसति। अस्मिन् पीठे ये जगद्गुरवः अभूवन् ते सर्वे वैराग्यवन्तः ज्ञानवन्तश्च संबभुः। तत्र एतादृशाः वैराग्यपीठाधीशाः श्रीविश्वलिङ्गशिवाचार्याः जगद्गुरवः अपि सुप्रसिद्धाः शैवधर्मप्रसारकाः अभूवन्। केनचित् हेतुना एतस्मात् जगद्गुरोः अनन्तरं वैराग्यपीठं पीठाधीशरिक्तम् आसीत्। तां रिक्तिं निराकर्तुं सर्वैः पीठाचार्याः सम्मिल्य श्रीशान्तलिङ्गशिवाचार्यं श्रीनीलकण्ठगुरुणा सुसंस्कृतं मुत्तनाल-मठाधिपं वैराग्यपीठाधीशं कर्तुं निश्चिचिषुः।

श्रीशान्तलिङ्गशिवाचार्यस्य पट्टाधिकारसंस्कारविधौ नेतारः अभूवन् श्रीसालूरुमठाध्यक्षाः चन्नवीरस्वामिनः। पट्टाधिकारमहापर्वणि एतस्मिन् पीठाचार्यत्रयसान्निध्ये बहवः शिवभक्ताः समवेताः अभूवन्। श्री विश्वेश्वरशिवाचार्यमहास्वामिनां सत्प्रयासेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वैराग्य नामकं महापीठं सनाथं संवृत्तम्। शान्तस्वभावेन शान्तलिङ्गजगद्गुरुणा भक्तानां कृते अनुग्रहकर्मणा सदैव विचरणं समादृतम्। एवं विचरन्तः चरैवेति-चरैवेति श्रुतिवचनम् आदरयन्तः कीर्तिमन्तः सन्तः सुगतिं लभन्ते। तत एव इयमुक्तिः प्रथते—

"कलिः शयानो भवति संजिहानस्तु द्वापरः।
त्रेत्रामेति समुत्तिष्ठन् कृतं सम्पद्यते चरन्।।इति।

व्यतीते शान्तलिङ्गशिवाचार्यस्य कार्यकाले वैराग्यपीठे पुनः वादः प्रवृत्तः अथ विश्वेश्वरशिवाचार्यस्य नेतृत्वे वैराग्यपीठस्य कृते सिद्धेश्वरशिवाचार्यस्य पट्टबन्धः समभूत्। मुहुर्मुहः वैराग्यपीठस्य संकष्टमोचकः ज्ञानपीठाधीश्वरः श्रीमान् विश्वेश्वरशिवाचार्यः उद्धारकेषु अग्रणीपदं लब्धवान्।।५३१-५४९।।

## ।।शक्तिविशिष्टाद्वैतपीठस्थापना।।

**विद्यागारमही काशी सर्वविद्याप्रकाशिनी।**
**पाठ्यन्ते ह्यत्र शास्त्राणि तत्तद्विद्याविशारदैः।।५५०।।**

**विश्वविद्यालयेष्वत्र व्यवस्था सा सनातनी।**
**विदेशीयाः स्वदेशीयाश्छात्रा यया पठन्ति हि।।५५१।।**

**दर्शनं वीरशैवं तु पाठ्यते स्म मठे खलु।**
**देवस्वरूपमिश्राणामानुकूल्येन वै किल।।५५२।।**

**स्थापयामास पीठं वै शक्तिविशिष्टसंज्ञकम्।**
**वेदान्ताख्ये विभागे च प्रारब्धा पाठनक्रिया।।५५३।।**

**स्नातकादिषु कक्षासु पठन्ति बहवोऽत्र हि।**
**स्नातकोत्तरच्छात्राणामवकाशोऽस्ति शोभनः।।५५४।।**

**पुस्तकानि च पाठ्यानि मठेन मुद्रितानि च।**
**छात्रवृत्तेर्व्यवस्थाऽपि कृता विद्यार्थिनां कृते।।५५५।।**

**विद्यार्थिनामयं पूर्णःपुरातनमनोरथः।**
**कार्येऽस्मिन् महनीयेऽभूद् महती श्रीगुरोः कृपा।।५५६।।**

अस्ति तावत् सर्वविद्याप्रकाशिनी श्रीकाशी नगरीषु अनुत्तमा सर्वश्रेष्ठा प्रेष्ठा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



श्रीः। तासु-तासु विद्यासु कृतभूरिपरिश्रमैः प्रतिभाशालिभिः विद्वद्भिः सर्वाणि शास्त्राणि श्रीकाश्यां प्राचीनकालादेव नैरन्तर्येण अनुशील्यन्ते अध्याप्यन्ते च। अत्र ये विश्वविद्यालयाः तत्र काचन शोभना व्यवस्था जागर्ति यां समवलम्ब्य न केवलं भारतवर्षस्य अपितु सर्वेषां देशानां पिपठिषवः अत्रागत्य पठन्तो भवन्ति। पुरा केवलं ज्ञानपीठे जंगमवाडीमठे वीरशैवदर्शनं पाठ्यते स्म। आचार्यदेवस्वरूपमिश्रमहानुभावानाम् अवधानदानात् सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयस्य वेदान्तविभागे श्रीवीरशैवदर्शनं शक्तिविशिष्टद्वैत-वेदान्त-पाठ्यक्रमरूपेण निर्धारितं सत् विश्वविद्यालयव्यवस्थायाः पाठनाङ्गतया स्वीकृतमभूत्। तदाप्रभृति शक्तिविशिष्टाद्वैतवेदान्तनाम्ना श्रीवीरशैवदर्शं सम्पूर्णानन्दसंस्कृतविद्यालये वेदान्तविभागे स्नातके स्नातकोत्तरे शोधवर्गे च पठनपाठनादिना चारु अनुशील्यते। यानि पुस्तकानि वीरशैवदर्शन-सम्बद्धानि जंगमवाडीमठेन प्रकाशितानि तानि पाठ्यक्रमे संनिविष्टानि सन्ति। तत्र अध्ययनार्थिनां कृते मठपक्षतः छात्रवृत्तेः व्यवस्था अपि संप्रवर्तमाना जागर्ति। पुरा कालतः यः छात्राणां विश्वविद्यालये अध्ययनमनोरथः जागृतः आसीत् स मनोरथः श्रीगुरोः देवस्वरूपमिश्रमहाशयस्य कृपया सम्पूर्णः सन् तोषाय कल्पते।।५५०-५५६।।

## ।।शिवसायुज्यप्राप्तिः।।

शोभनेन स्वभावेन विश्वेश्वरमहागुरुः।
कुर्वन् बहूनि कार्याणि शिवसायुज्यमाप्तवान्।।५५७।।

आश्विने शुक्लपक्षे च तृतीयायां तिथौ किल।
सुपुण्यपत्तने तत्र शिवसायुज्यमाप्तवान् ।।५५८।।

रम्भापुर्यामथो चास्य केदारेश्वरके तथा।
उभयोरेव सान्निध्ये समाधिर्विहितः किल।।५५९।।

शिवाचार्याः समेऽप्येते काश्यां सम्मिल्य सन्मुदा।
सुदीर्घं सुविचार्यैव ह्यचिन्वन्निर्णयं बुधाः।।५६०।।

ऐकमत्येन संजातः काशीपट्टमहोत्सवः।
बभ्राजे ज्ञानपीठस्य स्वामी श्रीचन्द्रशेखरः।।५६१।।

सोऽयं विश्वेश्वरशिवाचार्यः महास्वामी चारुस्वभावः धर्मस्वाध्यायसंवर्धनः आचारान् शिक्षयन् पुण्यपत्तनमध्ये आश्विनशुक्लतृतीयायां शिवसायुज्यं प्राप्तवान्। तस्य च समाधिः पीठाधीशसान्निध्ये रम्भापुर्यां केदारेश्वरे च सम्पन्नः। अथ श्रीकाश्यां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



समवेताः सर्वे शिवाचार्याः विमृशन्तः ऐकमत्येन निर्णयं गृहीतवन्तः। तदनुसारं सञ्जाते काशीपट्टमहोत्सवे श्रीचन्द्रशेखरशिवाचार्यः ज्ञानपीठस्य महास्वामी भवन् बभ्राजे॥५५७-५६१॥

## ।।चन्द्रशेखरशिवाचार्यः।। (८६)

### पुराणमठवंशवैशिष्ट्यम्, बालकस्य जन्म बाल्यं च

महनीये महापीठे षडशीतितमो गुरुः।
श्रीचन्द्रशेखरः स्वामी शिवाचार्योऽत्र राजते।।५६२।।

सर्वजिद्वत्सरे तत्र मासे सुश्रावणे निजे।
लब्धजन्मा बभूवैष द्वादश्यां शुक्लके तिथौ।।५६३।।

सावन्त्रम्मा सती माता सिद्धय्योऽस्ति पिता महान्।
सुतसप्तकमध्येऽसौ द्वितीयश्चन्द्रशेखरः।।५६४।।

पवित्रं तत्कुलं प्रोक्तं विद्वद्वैभवभूषितम्।
पुराणमठचारित्र्यं किञ्चिदत्र तदुच्यते।।५६५।।

प्राकृतैश्वर्यपूर्णे हि राज्ये कर्नाटके खलु।
प्रसिद्धं पत्तनं तद्धो वृषभाचलसंज्ञकम्।।५६६।।

पुराणमठ इत्याख्यो मठोऽस्त्यत्र पुरातनः।
मठोऽयं वीरगोत्रीयः पद्विड्सूत्रस्य पालकः।।५६७।।

पुराणमठवंशीयाः सर्वे माहेश्वराःखलु।
भाषास्वथ च शास्त्रेषु कृतभूरिपरिश्रमाः।।५६८।।

स्वाध्यायनिरताःसर्वे पुराणपटवस्तथा।
पालयन्तो हि वेदाज्ञांभजन्तेनगौरवम्।।५६९।।

मठीया वैदिकाचार्याः सदा लोकहिते रताः।
अतो मठस्तु विख्यातो मण्डले मण्डलान्तरे।।५७०।।

तस्मिन्वंशे समुत्पन्नो बसवप्पय्यनामकः।
लिङ्गधारी सदाचारी वीरमाहेश्वरः खलु।।५७१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



विरूपाक्षश्चरन्तय्यः सिद्धय्यस्तु तृतीयकः।
चतुर्थः सिद्धरामय्यो तस्यासन्नात्मजाःखलु।।५७२।।

एते सर्वे महाभागाः समाजहितकारिणः।
एतेषु बन्धुवर्गेषु विरूपाक्षो विचक्षणः।।५७३।।

विरूपाक्षस्य पुत्रस्य परीक्ष्य प्रतिभां पिता।
कौमुदीं तर्कशास्त्रं च वेदमन्त्रानपाठयत्।।५७४।।

सोल्लापुरे तु सुक्षेत्रे मल्लप्पस्थापिते खलु।
गुरुकुलेऽप्ययं छात्रः प्रवेशं लब्धवान्किल।।५७५।।

सेवां तत्र प्रकुर्वन्हि स्वाध्याये वर्धयन्रुचिम्।
अधीतवान्हि शास्त्राणि सर्वाणि गुरुसन्निधौ।।५७६।।

द्वादशानि हि वर्षाणि तूषित्वा गुरुसन्निधौ।
गुरोराज्ञां गृहीत्वैव स्वगृहं स समागतः।।५७७।।

विद्याविनयसम्पन्नं दृष्ट्वा तज्जनकः सुधीः।
विवाहयोग्यं विज्ञाय कन्यायै चिन्तयन्नभूत्।।५७८।।

अब्बीगेर्याख्यसुग्रामे मण्डले गदगे स्थिते।
सालीमठसमुत्पन्ना कन्यामणिरितिश्रुता।।५७९।।

तत्र गत्वा तु शीघ्रं हि कन्यारत्नं परीक्ष्य च।
विवाहं रचयामास विरूपाक्षाख्यशास्त्रिणः।।५८०।।

कन्याऽसीत्पार्वती नाम्नी विरूपाक्षो वरःस्मृतः।
जातस्तयोर्विवाहस्तु शुभे सिद्धेश्वरालये।।५८१।।

होसूराख्ये शुभे ग्रामे गृहदेवोऽस्ति निर्मलः।
सर्वं माङ्गलिकं कार्यं पूर्णतामेति तत्र वै।।५८२।।

एतैःखलु महाभागैः पार्वत्या सहितैः किल।
गार्हस्थ्यं यापयद्भिर्हि पाठिता बहवो जनाः।।५८३।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



बबलेश्वरसुक्षेत्रे यादगिर्यां तथैव च।
इलकल्ले महाग्रामे पाठयन्ति स्म शास्त्रिणः।।५८४।।

तेषामासीत्सुपुत्रो हि सिद्दय्यनामकः खलु।
सिद्धेश्वरप्रसादेन जातोऽयं वंशदीपकः।।५८५।।

वर्षाभ्यन्तरकाले हि पुत्रस्य जननात्खलु।
कालःसमागतस्तेषां कालस्य करुणा कुतः।।५८६।।

तत्रेलकल्लसुग्रामे महान्तेश्वरसन्निधौ।
समाधिर्विहितस् तेषां जनैःश्रद्धान्वितैस्तदा।।५८७।।

स्वकः पुत्रस्तया मात्रा रक्षितः शिक्षितोऽपि च।
मुरूडीनामके ग्रामे शिक्षकः समजायत।।५८८।।

तद्विवाहस्तु सञ्जातः सावत्रम्माख्यकन्यया।
नागनूराख्यसुक्षेत्रे सञ्जाता सा बृहन्मठे।।५८९।।

सन्ततिर्हि महद्भाग्यं गृहस्थस्य प्रकीर्तितम्।
गुरुकृपाप्रसादेन प्राप्तं संतानसप्तकम्।।५९०।।

कन्यारत्ने तु जाते द्वे पुत्ररत्नानि पञ्च वै।
एतेषु सप्तरत्नेषु द्वितीयश्चन्द्रशेखरः।।५९१।।

स्वग्रामे तोगुणाख्ये हि जातं प्राथमिकं खलु।
जातं माध्यमिकं तस्य ब्याडगिनगरे किल।।५९२।।

स्वामिनः सिद्धलिङ्गस्य मातुलस्य गृहे वसन्।
कुर्वन्गृहीयकार्याणि पञ्चवर्षाण्यधीतवान्।।५९३।।

महत्तमे ज्ञानपीठे समासीनः श्रीचन्द्रशेखरमहास्वामी ८६तमः शिवाचार्यो विभाति। सर्वजिद्वत्सरे श्रावणे मासि शुक्ल-द्वादश्यामसौ श्रीसिद्धय्यपितुः सावत्रम्मागर्भाद् सुलब्धजन्मा सप्तसन्ततिमध्ये द्वितीयोऽद्वितीयः सुतः पवित्रकुलप्रसूतः विद्वद्वैभवसम्भृतो बाल्यलालनमवाप। अस्ति तावत् कर्णाटकराज्ये वृषभाचलसंज्ञकं विशालं पत्तनं प्राकृतैश्वर्यभूषितम्। अत्रैव राजते पद्विडितिसूत्रपालकः स्वाध्यायनिरतः पुराणमठवंशीयः माहेश्वरवर्गः पुराणपठनाग्रणीः वेदशास्त्रविधिमनुसन् शास्त्रेषु भाषासु

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



च महाधीती सुदूरक्षेत्रेऽपि विश्रुतो भावितश्च। पुराणमठस्यास्य वेदविद्वांसः लोकान् कृतार्थयन्तः मठसम्माननश्रियं सर्वत्र संवर्धयन्तो राजन्ते स्म। समुन्नतेऽस्मिन् पुराणमठे पुराऽऽसीत् किल वसवप्पय्यनामकः इष्टलिङ्गार्चनतत्परो वीरमाहेश्वर आचारवान् सुधीः। अस्यः चत्वारः सुताः कुलप्रतिष्ठां तन्वाना आबभुः— १. विरूपाक्षः २. चरन्तय्यः ३. सिद्धय्यः ४. सिद्धरामयश्चेति। यद्यपि चत्वारोऽप्येते समाजहितकारिणः विश्रुता अभूवन्, तथापि प्रथमो विरूपाक्षः सुतः शास्त्राध्ययनसम्पादिन्या अन्तर्मुख-प्रतिभया समुद्-दीप्तोऽस्तीत्येवं विभाव्य जनकः तंज्येष्ठं सुतं वैयाकरणसिद्धान्तकौमुदीम्, तर्कशास्त्रम्, वेदांश्चाध्यापयत्। अथ मेधावी श्रीविरूपाक्षः सोल्लापुरे सुक्षेत्रे श्रीमल्लपगुरुणा स्थापिते गुरुकुले लब्धप्रवेशः सर्वाणि शास्त्राणि अधीतवान्। गुरुकुले द्वादशवर्षाणि समधीत्य महापण्डितो भूत्वाऽऽसौ श्रीगुरोराज्ञां शिरसि निधाय स्वग्रामं पितुर्गृहं प्रत्यपद्यत।

अथ विद्याविनयोपेतस्य विरूपाक्ष शास्त्रिणः गगदमण्डले अब्बीगेर्याख्य-सुग्रामे सालीमठसमुत्पन्नया पार्वतीनामकन्यया सह होसूरग्रामे सिद्धेश्वर-गृहदेवे विवाहे जाते मङ्गलमयं दाम्पत्यं प्रारभत। गृहस्थाश्रमे पुण्ये वसता विदुषा श्रीविरूपाक्षशास्त्रिणा बवलेश्वरक्षेत्रे यादगिर्यां तावद् इलकल्ले महाग्रामे प्रेम्णा पाठितम्। गच्छता कालेन दम्पत्योरनयोः प्रीतिशुभावहः सिद्धेश्वरदेवप्रसादात् सिद्धय्यनामकः वंशदीपकः सुतः जातः। अथ विरूपाक्षशास्त्रिणः शिवसायुज्य-प्राप्तौ महान्तेश्वरसन्निधौ इलकल्लसुग्रामे समाधिः विहितः। अथ मात्रा रक्षितस्य शिक्षितस्य च सिद्धय्यस्य मरुडीनामके ग्रामे शिक्षकपदे नियुक्तिः संजाता। अस्य सावत्रम्मानामकन्यया सह जाते विवाहे दम्पत्योरनयोः द्वे कन्यके पञ्च सुताश्चाजन्यन्ता तेषु द्वितीयोऽद्वितीया श्रीचन्द्रशेखरः तोगुणश्ग्रामे प्राथमिकं, व्याडगिनगरे मातुलगृहे पञ्चवर्षाणि माध्यमिकं शिक्षणमवाप्तवान्।।५६२-५९३।।

## ।।अमरेश्वरगुरोर्दर्शनं संस्कृताध्ययनं च।।

ततस्त्यक्त्वा च तद् ग्रामं गुलेदगुड्डमागतः।
ददर्श बालकस्तत्र योगिनं ह्यमरेश्वरम्।।५९४।।

सामुद्रिकं तु बालस्य परीक्ष्य सोऽमरेश्वरः।
अन्तेवासीति निश्चित्य मृत्युपत्रं चकार च।।५९५।।

प्रेषयामास तं भूयोऽध्ययनाय गुरोः कुले।
सोऽपि सोल्लापुरं गत्वा वर्षषट्कमधीतवान्।।५९६।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वर्षत्रयं मठे तत्र होटगीमठसंज्ञके।
तथैव वारदाख्यायां शालायां हि त्रिवर्षकम्।।५९७।।

उभयत्राश्रयं लब्ध्वा गङ्गाधरगुरोः किल।
अन्तेवासी स भूत्वा तु साहित्याध्ययनान्वितः।।५९८।।

काव्यशास्त्रमधीत्यैवमुपाधिं काव्यतीर्थकम्।
प्राप्तवान् षट्सु वर्षेषु गुरुःश्रीचन्द्रशेखरः।।५९९।।

अथान्यगुरुतस्तेन शरणय्यत आन्तरम्।
न्यायशास्त्रमधीतं च प्रयत्नतारतम्यतः।।६००।।

## ।।अमरेश्वरमठस्य पट्टाभिषेकः।।

तस्मिन्नेव च वर्षे हि तद्गुरुर्ह्यमरेश्वरः।
षडशीतितमे वर्षे शिवसायुज्यमाप्तवान्।।६०१।।

समाधिस्तु कृतस् तेषां वृषभाचलपत्तने।
वटोःपट्टाभिषेकार्थं शिष्यैः सर्वैः सुनिश्चितम्।।६०२।।

वर्षे साधारणे चैव वैशाखे कृष्णपक्षके।
द्वादशम्यां तिथौ तत्र सुदिने सोमवासरे।।६०३।।

मुहूर्ते कर्कलग्ने च भक्तानां च ह्युपस्थितौ।
मडिवालशिवाचार्यस्वामिनां सन्निधौ किल।।६०४।।

पूर्णःपट्टाभिषेकश्च शास्त्रोक्तविधिना खलु।
घोषितो विधिना सम्यक् शिवाचार्यसमाह्वयः ६०५।।

सोऽयं चन्द्रशेखरः ग्रामान्निर्गत्य गुलेदगुड्डमागतः श्रीमन्तम् अमरेश्वरगुरुं योगिनमुपतस्थे। अथ सामुद्रिकविधिना बालं परीक्ष्य श्रीमानमरेश्वरः अन्तेवासीति तं विनिश्चित्य मृत्युपत्रं लिलेख।

अनेन गुरुणा बालोऽयं सोल्लापुरे गुरुकुले तावद् अध्ययनाय प्रेषितः वर्षत्रयं होटगीमठे तदनन्तरं वर्षत्रयं वारदाख्यशालायां श्रीगंङ्गाधर-सद्गुरोः अन्तेवासी साहित्यविद्यामधीयानः काव्यतीर्थमुपाधिं लेभे। तदनन्तरमसौ विद्यारसिकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



शरणय्यसद्गुरुतः महता श्रमेण न्यायशास्त्रम् अधीतवान्।

अथ स्ववयसः षडशीतितमे वर्षे श्रीमान् अमरेश्वरः शिवसायुज्यमधिगतः। तदीयः समाधिः वृषभाचलपत्तने विहितः। अथ साधारणे वर्षे वैशाख कृष्ण द्वादश्यां कर्कलग्ने मुहूर्ते मडिवाल शिवाचार्य स्वामिनां सन्निधौ पूर्णः पट्टाभिषेकोऽस्य विहितः, शिवाचार्यता च प्राप्ता बालेन एनेन॥६०१-६०५॥

## ।।काश्यां संस्कृताध्ययनम्।।

विश्वेश्वरशिवाचार्यगुरोरादेशतस्तदा ।
काशीमध्ययनार्थं श्रीचन्द्रशेखर आगतः।।६०६!!

विश्वेश्वराज्ञया सोऽयं जङ्गमवाटिकामठे।
प्रवेशानुमतिम्प्राप्य स्वाध्याये मन आदधे।।६०७।।

विश्वविद्यालये तत्र सम्पूर्णानन्दसंस्कृते।
विभागे श्रील-वेदान्ते देवस्वरूपसद्गुरोः।।६०८।।

वर्षत्रयमधीत्यासौ ह्याचार्यपदवीं खलु।
सुवर्णपदकैःसाकं लब्ध्वा कीर्तिंतेने महत्तराम्।।६०९।।

राज्ये च केरले तत्र गुरुवायूरुनामके।
क्षेत्रे विविधशास्त्रेषु स्पर्धायां चन्द्रशेखरः।।६१०।।

गृहीत्वा प्रतिभागित्वं वेदान्तविषये यती।
सम्प्राप्य प्रथमं स्थानं लब्धवान् कीर्तिमुत्तमाम्।।६११।।

आमूलचूडमध्येता सर्वदर्शनपारगः
वङ्गीयदेशतश्चायं तीर्थोपाधिमवाप्तवान्।।६१२।।

विद्याविनोदिनं चैनं वीक्ष्याह श्री - जगद्गुरुः।
श्रीधर्मदर्शनग्रन्थमाश्रित्य शोधमाचरेः।।६१३।।

गुरोराज्ञानुसारेण श्रीगुरुश्चन्द्रशेखरः।
षड्दर्शनीयसिद्धान्तैः श्रीसिद्धान्तशिखामणेः।।६१४।।

तुलनां कृतवान् सम्यक् सप्तवर्षेष्वनुत्तमाम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**आत्मज्ञः प्रातिभ प्रज्ञो विद्यावारिध्युपाधिमान्।।६१५।।**

**प्रतिभां श्रीस्वामिवर्यस्य दृष्ट्वा काशीजगद्गुरुः।**
**वाचस्पतिपदप्राप्त्यै गुरुणा प्रेरितो बभौ।।६१६।।**

**अलङ्घ्या हि गुरोराज्ञा सूक्तिरेषा स्मृताऽभवत्।**
**मुहुराब्धवान् शोधं सिद्धिकामो महामतिः।।६१७।।**

**अधीत्य सप्तवर्षाणि लिखित्वा च प्रबन्धकम्।**
**तत्त्वत्रयविमर्शाख्यम् मान्यमान्यो बभौ महान्।।६१८।।**

**एकोनविंशतिं वर्षं काशीवाससहोदरम्।**
**अधीती सर्वशास्त्रेषु जयताच्चन्द्रशेखरः।।६१९।।**

अथ विश्वेश्वर-शिवाचार्य-गुरोरादेशात् श्रीमान् चन्द्रशेखरः अध्ययनार्थं श्रीकाशीमागतः। जङ्गमवाटिका-मध्ये सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य वेदान्तविभागे श्रीदेवस्वरूपसद्गुरोः वर्षत्रयमधीत्य सुवर्णपदकप्राप्त्या सह आचार्यपदवीं कीर्तिञ्चातुलामवाप।। सोऽयं केरलराज्ये गुरुवायूरुनामके क्षेत्रे विविधशास्त्रीयस्पर्धायां विशिष्य वेदान्तविषये प्रथमं स्थानमवाप। समग्रदर्शनाध्ययनान्तरं वाग्मी विद्वानसौ दर्शनतीर्थपदवीमवाप। अथ श्रीगुरुः विद्याव्यसनिनमेनं समाकलयन् शोधकार्यार्थं प्रेरयामास। सप्तवर्षात्मकेन कालेनासौ षड्दर्शनसिद्धान्तैः सह श्रीसिद्धान्तशखामणेः तुलनात्मिकां समीक्षामादाय विद्यावारिधिरिति (पी-एच.डी.) उपाधिमलभत। विदुषः प्रतिभाप्रकर्षं संवीक्ष्य सद्गुरुरेनं पुनरुच्चैः शोधकार्याय समादिशत्। पुनः सप्तवर्षात्मकेन कालेन अधीतसद्विद्यः श्रीचन्द्रशेखरो मनीषी तत्त्वत्रय-विमर्शात्मकविशिष्टशोधकर्मणा वाचस्पतिरिति (डी.लिट्) उपाधिं लेभे। तदेवं विद्वन्मान्यः श्रीमान् एकोनविंशतिवर्षाणि निरन्तरतया श्रीगुरुभ्यः समधीयानो महान् विद्यारसिकः संवृत्तः।।६०६-६१९।।

## ।।काशीपीठस्य पट्टाभिषेकः।।

**तस्मिन्नेव च वर्षे हि मासे त्वाश्विननामके।**
**तृतीयायां तिथौ तत्र पुण्याख्ये नगरे खलु।।६२०।।**

**विश्वेश्वरशिवाचार्याः सायुज्यं प्राप्नुयुःकिल।**

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आकाशेन च मार्गेण तद्-देहः पार्थिवस्तदा।।६२१।।

काशीमानीय श्रीपीठे समाधिर्विहितः किल।
रम्भापुरी महत् क्षेत्रं केदारेश्वर-संज्ञकम्।।६२२।।

पीठाधिपसुसान्निध्ये विहिता तत्समाधिभूः
कैलासमण्डपे दीप्ते पुष्णात्यद्यापि या श्रियम्।।६२३।।

पीठस्य रिक्तता तावद्बहुकालं न शोभते।
इति तावद्विनिर्णीय पीठाचार्याःसमागताः।।६२४।।

उषित्वा तु समैः काश्यां मिथश्चर्चा विधाय च।
चन्द्रशेखर आचार्यो बटुत्वेन विनिश्चितः।।६२५।।

शुभस्य शीघ्रं कर्तव्यमितिन्यायेन तत्क्षणे।
मुहूर्तचयनं जातं पीठारोहस्य वै किल।।६२६।।

परमाचार्य-सान्निध्ये भक्तानां समुपस्थितौ।
उपाचार्यसमक्षं च पट्टबन्धो ह्यजायत।।६२७।।

शिवाचार्यस्तदानीं तु महाचार्यत्वमाप्तवान्।
नूतनं हि तदा जातमभिधानं जगद्गुरोः।।६२८।।

परम्परानुसारेण सभा तत्र नियोजिता।
देवस्वरूपमुख्या हि समाहूताश्च तत्र वै।।६२९।।

अभूतपूर्वं तत्राऽभूद्विदुषां शास्त्रचिन्तनम्।
सम्मानितो महास्वामी मानपत्रेण तत्र वै।।६३०।।

पीठाधिपतिनाऽप्यत्र सर्वे सम्मानिताः खलु।
संबभौ हि महाचार्यः प्रशंसाभाजनं महत्।।६३१।।

काश्यां हि मण्डलं यावन्नूतनः श्री-जगद्गुरुः।
धर्मानुष्ठानकृद् विद्वान् सर्वलोकहितो बभौ।।६३२।।

अथ पूनानगरे आश्विनतृतीयायां शिवसायुज्यमाप्तवतः विश्वेश्वरशिवाचार्यस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



पार्थिवः देहः काशीमानीतः समाधिश्च विहितः। समाधिविधिरेतस्य रम्भापुरी-केदारेश्वरपीठयोः अधीश-स्वामिनोः सान्निध्ये कैलासमण्डपे विहितः। रिक्ते ज्ञानपीठे काश्यामुपस्थितैः सर्वपीठाचार्यैः सुविचार्य परमाचार्यसान्निध्ये उपाचार्यसमक्षं शुभमुहूर्ते पट्टबन्धविधिना ज्ञानपीठाधीशतां प्रापितः श्रीचन्द्रशेखरः शिवाचार्यमहास्वामीति संज्ञां प्राप। परम्परामनुसृत्य आयोजितायां सभायां पण्डितप्रवराः श्रीदेवस्वरूपमिश्रमहानुभावाः तन्मुख्याश्चान्ये विद्वांसः शोभनं शास्त्रचिन्तनं कृतवन्तः। महास्वामिनां सम्माननानन्तरं विदुषां सम्माननं संजातम्। पुनश्च पीठाधिपतिना नवेन सर्वे विद्वांसः सम्मानिताः। मण्डलं यावद् जगद्गुरुःश्रीचन्द्रशेखरो महास्वामी सर्वलोकहितावहं धर्मानुष्ठानं कुर्वन् सर्वैः विद्वद्भिः पीठैः शिवभक्तैश्च पूर्णं समादृतोऽभूत्॥६०६-६३२॥

## ॥धर्मप्रचारयात्रा लोककल्याणकार्याणि॥

अस्यां मङ्गलवेलायां श्रीसिद्धान्तशिखामणेः।
मराठ्यां खलु भाषायामनुवादोऽत्र कारितः॥६३३॥

शरणय्या कपाले च शेषनारायणस्तथा।
त्रिभिर्विद्वद्वरेण्यैश्च कृतं कार्यं शुभङ्करम्॥६३४॥

सोल्लापुरे च सुक्षेत्रे मासे चाषाढनामके।
जातो गजोत्सवस्तत्र श्रीसिद्धान्तशिखामणेः॥६३५॥

रम्भापुरीश्वरेणैव श्रीरुद्रमुनिना कृतम्।
ग्रन्थलोकार्पणं भव्यं लोककल्याणकारकम्॥६३६॥

महाराष्ट्रस्य भक्तानां तद्दिनं सुदिनं स्मृतम्।
ग्रन्थं सम्प्राप्य सर्वे ते लेभिरे परमं सुखम्॥६३७॥

काशीपीठाधिपानां च धर्मयात्रा ततःखलु।
समारब्धा हि सर्वत्र सारेणात्र निगद्यते॥५३८

तिर्यगान्दोलिकाभिख्यः पारम्परिक उत्सवः।
ग्रामप्रवेशवेलायां गौरवार्थं विधीयते॥६३९॥

प्रथमो ह्युत्सवस्तेषां स्वग्रामे समजायत।
समेषामेव पीठानामुत्सवोप्यत्र भावितः॥६४०॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



वृषभाचलभक्ता हि दृष्ट्वा च तं महोत्सवम्।
प्रमुदितान्तरङ्गास्ते धन्यतां समवाप्नुयुः।।६४१।।

तोगुणाख्ये खलु ग्रामे ह्यपरेद्युरजायत।
उत्सवः परमो दिव्यो बागलकोटिमण्डले।।६४२।।

भक्तानां वत्सलस्सोऽयं श्रीगुरुश्चन्द्रशेखरः।
जन्मग्रामात्समारब्धां धर्मयात्रां निरन्तरम्।६४३।।

जनान्संस्कृत्य संस्कृत्य धर्मतत्त्वं प्रबोधयन्।
प्रदेशेषु च सर्वेषु चरन्नासीन्निरन्तरम्।।६४४।।

श्रावणे नवरात्रे च भक्तानामाग्रहेण तु।
अनुष्ठानं कृतं तेन लोककल्याणहेतवे।।६४५।।

चरैवेति चरैवेति श्रुतिं हृदि निधाय सन्।
चतुर्भाषाप्रवीणोऽयं चरन्नस्ति सदा खलु।।६४६।।

आन्ध्रे कर्नाटके चैव तेलङ्गाने तथैव च।
तमिले केरले चैव महाराष्ट्रे तथैव च।।६४७।।

मध्योत्तरप्रदेशेषु पंजाबे गुर्जरे तथा।
दिल्ल्यां च हरियाणायां सर्वप्रान्तेषु वै किल।।६४८।।

नैरन्तर्येण संचारी दीक्षां कृत्वा निरन्तरम्।
वीरशैवमहाधर्मं बोधयामास वै खलु।।६४९।।

एभिरेव महाचार्यैःसंस्कृतेःसंस्कृतस्य च।
रक्षार्थं स्थापिताश्चैव वेदविद्यालयाः खलु।।६५०।।

विद्यालयेषु सर्वेषु साङ्गा वेदास्तथैव च।
संगीतं योगशास्त्रं च संस्कृतं हि प्रपाठ्यते।।६५१।।

निवासःपठनं चैव वस्त्रं च भोजनं तथा।
निःशुल्कं लभ्यते सर्वं वदान्यमहिमाद्भुतः।।६५२।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



**वेदविद्यामधीयाना वीरमाहेश्वराः किल।**
**हव्यकव्यसुसम्पत्त्यै ग्रामं ग्राममटन्ति च।।६५३।।**

**सहस्राधिकसंख्याका वीरमाहेश्वरा जनाः।**
**पूजां निर्वर्तयन्तो हि रक्षन्ति संस्कृतिं खलु।।६५४।।**

मङ्गलवेलायामस्यां श्रीसिद्धान्तशिखामणेः मराठीभाषानुवादः महास्वामिना कारितः। शरणय्यप्रभृतिभिः त्रिभिः विद्वद्भिः कृतस्यानुवादस्य सर्वत्र प्रशस्तिः संजाता। शुभस्य शीघ्रमितिरीत्या सोल्लापुरे सत्क्षेत्रे आषाढमासे श्रीसिद्धान्तशिखामणेः गजोत्सवो महान् विहितः, तदेवमस्मिन् शुभकर्मणि रम्भापुरीश्वरेण श्रीरुद्रमुनिना लोककल्याणकारिणः अस्य ग्रन्थस्य लोकार्पणं विहितम्। तदेतद् दिनं महाराष्ट्रे निवसतां भक्तानां कृते पुण्यं दिनं समभूद् यत्र ग्रन्थरत्नमिदं सर्वैः लब्धम्। श्रीकाशीज्ञानपीठस्याधीशस्य तत एव धर्मयात्रा समारब्धा। यः किल तिर्यगान्दोलिकः पारम्परिक उत्सवः ग्रामप्रवेशवेलायां गौरवार्थम् अनुष्ठीयते सोऽयंप्रधानः प्रथमश्चोत्सवः श्रीचन्द्रशेखरमहास्वामिनां स्वजन्मभूमौ ग्रामे एव समायोजितः। समेषां पीठानामुत्सवोऽप्यत्र भावितः। सर्वेऽपि वृषभाचलवासिनः उत्सवेऽस्मिन् समवेताःसन्तोः धन्यतामन्वभवन्।

दिनाद् दिनम् क्रमेण तोगुणग्रामे बागलकोटिमण्डले उत्सवस्य आयोजनं क्रम प्रवृद्धं समजायम्। भक्तवत्सलः श्रीचन्द्रशेखरगुरुः स्वग्रामात्प्रारब्धायां धर्मयात्रायां प्रदेशस्य सर्वस्मिन् मण्डले एकैकस्मिन् प्रविशन् जनान् संस्कुर्वन् तान् धर्मतत्त्वं प्रबोधयन् आचारं प्रशिक्षयन् विचरन् बभौ। एवं धर्मयात्राप्रवृत्तानां जनानामाग्रहेण लोककल्याणाय महद् बृहच्चानुष्ठानमायोजितवान्। चरैवेति चरैवेति— श्रुतेर्य उद्घोषमय उपदेशस्तं हृदि संनिधाय श्रीमहास्वामी चन्द्रशेखरः चतसृषु भाषासु सम्प्रप्रवीणः सदैव धर्मप्रसाराय विचरन् आन्ध्रप्रदेशे कर्नाटकप्रदेशे तेलङ्गाना-प्रदेशे तमिलनाडुप्रदेशे केरलप्रदेशे महाराष्ट्रप्रदेशे मध्यप्रदेशे उत्तरप्रदेशे पंजाबप्रदेशे गुजरातप्रदेशे दिल्ली राजधानीप्रदेशे हरियाणाप्रदेशे क्रमेण सर्वेषु प्रान्तेषु निरन्तरं दीक्षादान पुरःसरं श्रीवीरशैव धर्मप्रबोधनमयं प्रव्यतनोत्।

महास्वामी शिवाचार्यः श्रीचन्द्रशेखर जगद्गुरुः-संस्कृतेः, संस्कृतस्य च संरक्षणाय बहूनां वेदविद्यालयानां संस्थापनाम् अकरोत्। तेषु सर्वेषु विद्यालयेषु वेदाः, संगीतं, योगशास्त्रम्, संस्कृतमयं विभिन्नं शास्त्रं च प्रपाठ्यते। एषु अधीयानाः छात्राः निःशुल्कम् आवासं वस्त्रं भोजनादिकं च लभमानाः लोककल्याणकर्माणि सम्पादयन्तो यद्भान्ति तत्र महास्वामिनः धन्यो वदान्यः अद्भुतश्च महिमैव परमो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



हेतुर्विभाति भक्तानां हव्यकर्मणि कव्यकर्मणि च सम्पादककर्तृत्वम् आत्मसात्कृत्य इमे वीरमाहेश्वराः वेदविद्याध्यनप्रवीणाः परःसहस्रं विद्वांसः पूजाविधिं निर्वर्तयन्तः भारतीयां संस्कृतिं रक्षन्तः संवर्धयन्तश्च जयन्तीति महास्वामिसत्प्रयासो नूनमुच्चैः विजयते।।६३३-६५४।।

## ।।जनकल्याणप्रतिष्ठानं शोधसंस्थानं च।।

भक्तानां हि समस्तानां कल्याणकार्यहेतवे।
स्थापितं तत्प्रतिष्ठानं काश्यामेव तदा खलु।।६५५।।

नाम्ना वै शैवभारत्या शोधसंस्थानमेव च।
काश्यां कार्यरतं चास्ति प्रकाशनमहास्थलम्।।६५६।।

निदेशकपदे चात्र द्विवेदो व्रजवल्लभः।
स्थित्वा कृत्वा च कार्याणि कीर्तिकायो बभूव ह।।६५७।।

निर्देशने तदीये च ह्यागमा बहवः खलु।
संशोध्यानूद्य भाषासु शिवरात्रौ प्रकाशिताः।।६५८।।

विद्वद्भिर्बहुभिश्चात्र कार्यं तत्क्रियते खलु।
ग्रन्थाःशताधिका ह्यत्र यावदद्य शिवार्पिताः।।६५९।।

बेंगलूरुनगर्यां या शाखा तत्र विधीयते।
भाषायां कन्नडाख्यायामनुवादो निरन्तरम्।।६६०।।

प्रतिवर्षं धनुर्मासे बोधनं लिङ्गपूजनम्।
धर्मकार्याणि चान्यानि चलन्त्येव निरन्तरम्।।६६१।।

कर्णाटके च गदगे शाखा ह्यस्य विराजते।
वेदविद्यालयस्तत्र सर्वोत्कृष्टो हि राजते।।६६३।।

अधीत्य वेदवेदाङ्गान् छात्राश्च बहवः खलु।
संस्कृतिं वर्धयन्तो हि ग्रामं ग्राममटन्ति च।।६६४।।

लातूरे च महाराष्ट्रे शाखा ह्यस्य विराजते।
तत्रास्ति मन्दिरं चैकं विश्वनाथस्य वै किल।।६६५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



तत्रैव सुविधायुक्तो विद्यार्थिनिलयस्तथा।
स्थापितो गुरुणा चैव विद्यार्थिवत्सलेन च।।६६६।।

पीडिता ह्यर्थकष्टेन छात्रा ग्रामनिवासिनः।
उषित्वा निलये ह्यत्र शास्त्राभ्यासपरायणाः।।६६७।।

नगरे सोल्लापुरे ह्यस्य शाखा ह्येकाधिराजते।
वधूनां च वराणां च कल्याणं तत्र साध्यते।।६६८।।

सत्कर्म-संस्थानप्रतननकुशलः श्रीमहास्वामी चन्द्रशेखरशिवाचार्यः सर्वभक्त-कल्याणहेतवे काश्यां जङ्गमवाडीमठे श्रीशैवभारतीशोधप्रतिष्ठानं संस्थापितवान्। अत्र श्रीव्रजवल्लभद्विवेदमहाभागाः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य सांख्ययोगतन्त्रागम-विभागाध्यक्षचराः निदेशकपदं विभूषयन्तः प्रकाशनम् नैकविधसंगोष्ठीसभायोजनादिकं च सम्पादयन् तन्त्रागमग्रन्थान् संशोध्य प्रकाश्य भाषानुवाद प्रकाशनं च विधाय सौहार्दमूर्तयः सन्तः सम्प्रति कीर्तिकायाः आजीवनं श्रीमन्माहेश्वर-महास्वामिवर्येण समादृताव्यराजन्त। सत्साहित्यप्रकाशनकर्म शिवरात्रिमहापर्वाणि द्विवेदनिर्देशने समारब्धमद्यापि सम्प्रवर्तते तत एव तु बहूनां विदुषां सत्प्रयासेन. परः शतग्रन्थाः महाशिवरात्रपर्वणि श्रीविश्वेश्वरशिवार्पिताः सन्तः धर्मं, सदाचारं, योगं, दीक्षां च प्रबोधयन्तः अध्यात्मविधिमवगमयन्तः सर्वत्र समाद्रियन्ते। अस्य प्रतिष्ठानस्य शाखा बेंगलूरुनगरे स्थापिता चकास्ति, यत्र कन्नडभाषायां संस्कृततन्त्रागमादिसद्ग्रन्थानामनुवादकार्यं नैरन्तर्येण प्रचलति। अत्र प्रतिवर्षं धनुर्मासे बोधनं लिङ्गपूजनं विविधं धर्मानुष्ठानं च प्रचलति। तद्वत् कर्नाटकमध्ये गदगे प्रतिष्ठानशाखा या प्रचलति तत्र सर्वोत्कृष्टो वेदविद्यालयः प्रचलति। अत्र वेदवेदाङ्गादिषु अधीतिनश्छात्राः ग्रामे ग्रामे पर्यटन्तः धर्मकार्याणि सम्पादयन्तः संस्कृति-संरक्षणविधौ संलग्ना भान्ति। एका प्रतिष्ठानशाखा महाराष्ट्रे लातूरनगरे राजते। तत्र विशालं श्रीविश्वनाथमन्दिरमधिराजते। तत्प्राङ्गणे महास्वामिना विद्यार्थिनिलयो विनिर्मितः, यत्र अर्थकृशाश्छात्राः निवसन्तः शास्त्राभ्यासपरायणाः धर्मकार्यं सम्पादयन्ति। अथ प्रतिष्ठानस्यैव शाखैका सोल्लापुरे नगरे राजते यत्र वरवधूकल्याणसंस्कारः प्रवर्तते।।६५५-६६८।।

## ।।शिक्षासमितयस्तत्-कार्यं च।।

गङ्गायाःपश्चिमे तीरे पार्श्वे वाल्मीकिकुण्डके।
चन्दौलीमण्डले ग्रामे बलुवानामके खलु।।६६९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



अस्ति विद्यालयस्तत्र हिन्दीमाध्यमिकःखलु।
ग्रामीणाःछात्रछात्राश्च ह्यभ्यस्यन्ति निरन्तरम्।।६७०।।

विद्याकाशीति विख्याते प्रसिद्धे पुण्यपत्तने।
आङ्गलमाध्यमिका शाला ह्यस्ति विश्वेश्वराङ्किता।।६७१।।

तेलङ्गानाप्रदेशे च शादाख्यनगरे किल।
कर्नाटके च राज्ये च बिसनल्ल्यां तथैव च।।६७२।।

वेदविद्यालयाःसन्ति प्रसिद्धा मण्डले खलु।
संस्कृतं योगविद्या च वेदविद्या तथैव च।।६७३।।

संगीतःपाठ्यते तत्र सर्वं निःशुल्क एव च।
छात्राः परः सहस्रास्तु पठन्त्यत्र सदैव हि।।६७४।।

अथ वाराणसीतो नातिदूरे चन्दौलीमण्डले गङ्गायाः पश्चिम-तीरे श्रीमद्वाल्मीकिकुण्ड-पार्श्वे बलुवानाम्नि ग्रामे एकः हिन्दी-माध्यमिकः विद्यालयः काशीपीठाधिपेनानेन संस्थापितः समुल्लसति। अत्र ग्रामीणाः छात्राः छात्र्यश्च विद्याभ्यसनं कुर्वन्ति।

तद्वत् पुंण्यपत्तनमध्ये विद्याकाशीतिनाम्ना प्रख्याते आङ्गलभाषामाध्यमेन श्रीविश्वेश्वरपाठशाला प्रचलति। तेलङ्गानाप्रदेशे शादाख्यनगरे अथच कर्नाटकराज्ये विसनल्लीमध्ये वेदविद्यालयाः स्थापिताः सन्तिः, यत्र संस्कृतम्, संगीतम्, योगविद्या वेदविद्या च प्राधान्येन पाठयते। एषु वेदविद्यालयेषु निःशुल्कं समधीयानाः सहस्रशश्छात्राः वसन्ति।।६६९-६७४।।

## ।।यात्रानिवासो ह्यन्नक्षेत्रं च।।

प्रसिद्धिर्वर्तते काश्यामन्नपूर्णा निरन्तरम्।
दत्वान्नं सर्वभूतानां प्राणान् रक्षति रक्षति।।६७५।।

विश्वनाथो महादेवो ज्ञानं दत्त्वा हि जीविनाम्।
बुद्धिं च रक्षययत्येव सर्वसिद्धिप्रदायिनीम्।।६७६।।

अत एव च पीठेस्मिन् ह्यनादिकालतः खलु।
ज्ञानान्नयोःसदा दानं चलत्येव सन्ततम्।।६७७।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



परम्परामनुसृत्य श्रीगुरुश्चन्द्रशेखरः।
यात्रार्थिनां निवासार्थं भक्तावासान् बहून् किल।।६७८।।

श्रीमठे स्थापयामास ह्यन्नक्षेत्रं समृद्धिमत्।
भाषाधर्मप्रदेशानां भेदभावो न कश्चन।।६७९।।

प्रत्यहं ह्यत्र वै भक्ताः सहस्रसंख्यया किल।
आगच्छन्ति च गच्छन्ति तुष्टाःसर्वे भवन्ति हि।।६८०।।

श्रीकाशीक्षेत्रे जगदम्बा काशीपुराधीश्वरी श्रीमाता अन्नपूर्णा भगवती विशालाक्षी अन्नदानेन भूतानां प्राणान् रक्षतीति महती प्रसिद्धिर्विद्यते। तद्वद् महादेवो विश्वनाथः आनन्दकानननिवासी ज्ञानदानपुरःसरं प्राणिनां सर्वसिद्धिदायिनीं बुद्धिं परिरक्षति— एददपि विश्रूयते। तदनुसारम् ज्ञानपीठे अनादिकालतः ज्ञानदानम् अन्नदानं च प्रवर्तते। तामेनां परम्परामनुसृत्य श्रीचन्द्रशेखरो महास्वामी जगद्गुरुः श्रीजङ्गमवाडीमठे यात्रार्थिनां निवासाय बहून् भक्तावासान्, समृद्धं चान्नक्षेत्रं च निर्माय विपुलं यशः समवाप। आवासभोजनादौ भाषाभेदं धर्मभेदं प्रदेशभेदं विनैव सहस्रशो जनाः प्रतिदिनम् आगच्छन्तो गच्छन्तश्च धर्मदेशाटनं कुर्वाणा विभान्ति।।६७५-६८०।।

## ।।विद्वत्पुरस्काराः।।

आत्मज्ञमर्चयेद्भूति-काम इति श्रुतिर्यतः।
ततोऽत्र श्रीमहापीठे क्रियते विद्वदर्चनम्।।६८१।।

बहवोऽत्र पुरस्काराः विविधेषु-विषयेषु च।
शिवरात्रौ प्रदीयन्ते ससम्मानं धनेन च।।६८२।।

मिश्रो देवस्वरूपश्च द्विवेदो व्रजवल्लभः।
कटुम्बशास्त्रिणश्चैव कपाले चन्द्रशेखरः।।६८३।।

मिश्रो परमहंसश्च मठो लिङ्गय्यनामकः।
पाण्डेयोऽमरनाथश्च परड्डी मल्लिकार्जुनः।।६८४।।

शिवप्पा च खके चैव महानन्दा खके तथा।
समुद्राल्लक्ष्मणय्यो हि गणेशन् शास्त्रिणस्तथा।।६८५।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



स्वामी शिवकुमारश्च शास्त्री गङ्गाधरस्तथा।
शुक्लो वै रामयत्नश्च पसारकर एव च।।६८६।।

प्रतापो ह्यान्ध्रदेशीयो रेवाप्रसाद एव च।
जगन्नाथो हि तैलङ्गो बीवेंकटाचलं खलु।।६८७।।

गौरी युक्रेनदेशीया कमलेशो दत्त एव च।
एवमाद्या महाभागा श्रीपीठे मानिताःकिल।।६८८।।

अन्यान्यविषयेष्वेव मानिता बहवः खलु।
सन्त्यसंख्या हि विद्वांसः काश्यामन्यत्र एव च।।६८९।।

ज्ञानसिंहासने पीठे विदुषां गौरवं खलु।
प्रवृत्तं चिरकालात्तु चलत्येव निरन्तरम्।।६९०।।

आत्मज्ञमर्चयेद् भूतिकामः - इतिश्रुत्यर्थमनुसृत्य ज्ञानपीठेन सादरभरं विद्वदर्चनं विधीयते। प्रतिवर्षं महाशिवरात्रिपर्वणि परःशतंविद्वांसः शिवबुद्ध्या सम्पूज्यमानाः सत्क्रियन्ते। बहुभ्यो विद्वद्भ्यः विविधविषयेषु धनसम्मानमण्डिताः पुरस्काराः प्रदीयन्ते। क्रमेण विशिष्टपुरस्कारसम्मानेनार्चितानां विदुषामत्र नामानि गण्यन्ते— आचार्यदेवस्वरूपमिश्रः, राष्ट्रपण्डितः श्री व्रजवल्लभद्विवेदः, कुलपतिः कुटुम्बशास्त्री, कपालहृदयंचन्द्रशेखरः, श्रीपरमहंसमिश्रः, श्रीमठोलिङ्गय्यः, पण्डितप्रवरः अमरनाथपाण्डेयः, परङ्गीनिवासी श्रीमान् मल्लिकार्जुनः, शिवप्पा खके, महानन्द-खके, समुद्रवासी लक्ष्मणय्यः श्रीगणेशन् शास्त्रीमहोदयः, श्री शिवकुमारस्वामी, श्री गङ्गाधरशास्त्री, पण्डितप्रवरो रामयत्नशुक्लः, श्रीमान् पसारकरः, आन्ध्रप्रदेशीयः श्रीप्रतापः, सनातनकविः श्रीरेवाप्रसादः, पं०श्रीजगन्नाथतैलङ्गः, श्रीमान् वी वेङ्कटाचलः, युक्रेनदेशस्य गौरी, महामहोपाध्यायः कमलेशदत्त त्रिपाठी, तदन्ये च बहवो विद्वांसः पुरस्कृताः सम्मानिताश्च ज्ञानपीठेन। विद्वत्सम्मानना चैषा विविधविषयेष्वनुवर्तमाना परः सहस्रविद्वत्सु सम्प्रवर्तमाना काशीस्थान् अन्यत्र स्थितांश्च समाह्लादयति। चिरकालात् सम्प्रवृत्तम् एतद् गौरवम् श्रीज्ञानपीठे निरन्तरं प्रचलतीति श्रीविश्वेश्वरकृपाऽत्र हेतुः विजयते।।६८१-६९०।।

## ।।रशिया-देशे धर्मस्थापनम्।।

डेनिश् नामकःकश्चित् क्रियायोगप्रशिक्षकः।
जिज्ञासुःशिवयोगस्य रशियादेशतःखलु।।६९१।।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



आगत्य भारतं देशं काशीं चारु समागतः।
तत्रत्यं ज्ञानपीठं च शिवयोगमहास्थलम्।।६९२।।

ज्ञात्वा दृष्ट्वा महायोगी शिवयोगस्य बोधकान्।
ग्रन्थान् संगृह्य तत्रस्थान् बेंगलूरूसमागतः।।६९३।

तत्रस्थं ज्ञानपीठेशं गुरुं श्रीचन्द्रशेखरम्।
प्रणिपत्य महाभागं विनयादब्रवीद्वचः।।६९४।।

साधको हठयोगस्य क्रियायोगप्रशिक्षकः।
माहात्म्यं शिवयोगस्य ज्ञात्वा चात्र समागतः।।६९५।।

भो कल्याणमहाभाग शिवाचार्यशिखामणे।
आचार्यवर्य संप्राप्तं रक्ष मां शरणागतम्।।६९६।।

इति विज्ञापयन् योगी श्रीगुरुं प्रियवादिनम्।
